अभिराजराजेन्द्रविरचितम्

॥ रूपरुद्रीयम् ॥



621

IAN (D.U.)
INGERI

4-2-94.

21027

रूपरुद्रीयम्

(एकादशनव्यैकाङ्किसङ्कलनम्)

मिश्रोऽभिराजराजेन्द्रः
प्रयागविश्वविद्यालयीयः संस्कृतप्रवाचकः

वैजयन्त प्रकाशन
इलाहाबाद

□ प्रकाशक :

वैजयन्त प्रकाशन

८, बाघम्बरी मार्ग इलाहाबाद ।

□ ग्रन्थ :

रूपरुद्रीयम्

(ग्यारह नवीन एकांकियों का संग्रह)

□ ग्रन्थकार :

अभिराज डॉ० राजेन्द्रमिश्र

रीडर, संस्कृत-विभाग,

इलाहाबाद विश्वविद्यालय, इलाहाबाद ।

□ प्रथम संस्करण :

अगस्त 1986 ई०

□ ग्रन्थमूल्य :

पचीस रुपये मात्र

□ मुद्रक :

शुभचिन्तक प्रेस

३१३ बक्सी खुर्द, दारागंज

इलाहाबाद–६

21027

ROOPARUDRIYAM

(Collection of Eleven New Sanskrit One-act Plays)

Abhiraj Dr. Rajendra Mishra
Reader in Sanskrit,
University of Allahabad.

Vaijayanta Prakashana
Allahabad

015,2N

☐ **Publisher :**

Vaijayant Prakashan

8, Baghambari Road, Allahabad.

☐ **Name of the Work :**

Rooparudriyam

(Eleven New One-act Plays)

☐ **Writer :**

Abhiraj Dr. Rajendra Mishra

Reader in Sanskrit,

University of Allahabad.

☐ **First Edition :**

August 1986 A.D.

☐ **Price of the Book :**

25.00 RS.

☐ **Printed at :**

Shubhchintak Press.

Daraganj, Allahabad.

आत्मवाचिकम् !

प्रस्तूयत इदानीं रूपरुद्रीयम् । एकाङ्किसङ्कलनेऽस्मिन् नाट्यप्रयोगानां संख्यैकादशेति न च न ज्ञातं सहृदयैः । ग्रन्थाभिधानमेव तद्रहस्यं सुष्ठु प्रकाशयति । ग्रन्थान्ते लिखितं परिशिष्टमेषां रूपकाणां बृहत्परिचयः प्रस्तौति । कदा कथं किमर्थं केन प्रयोजनेन वैतानि प्रेक्षणकानि रचितानि मयेत्येतत्सर्वं स्फारीभवति तेन ।

इदानीं यावन्नाहमज्ञातप्रायो वृन्दारकगवीपक्षधराणाम् । संस्कृतसमाजोऽपि न मेऽपरिचितः । वस्तुतः सहृदयस्नेहोद्गारापेक्षी मम काव्यशिखावलो येन संस्कृतानास्थातमस्काण्डमलीमसं भारतीमन्दिरं प्रसह्य प्रकाशयते ।

तदस्मिन् नव्ये वाग्व्यतिकरेऽस्ति किञ्चिद्वैविध्यं सहृदयमनःप्रीति-करम् । प्राग्वर्ति नाट्यपञ्चकं लोकवृत्ताश्रयं मध्यवर्ति नाट्यत्रयम् इतिहासा-श्रयं पश्चाद्वर्ति च नाट्यद्वयं पुरावृत्ताश्रयमिति भिन्नवृत्तत्वाद् भिन्नरुचीनां नाट्यपिपठिषूणां सर्वाण्यपि मनःप्रह्लादीनि भविष्यन्तीति विश्वासो नाट्यकारस्य ।

विविधज्ञानविज्ञाननिस्यन्दभूतत्वात् साहित्यधर्मदर्शनत्रिवेणिकं प्रयागा-यमाणं सुरभारतीसाहित्यमिदानीमपि स्वोपयोगित्वं न विजहाति । आत्मानं द्रवीकृत्य गंगायमुनयोः प्रवहन् हिमगिरिरिव संस्कृतं स्वकीयैरनन्तशब्दव्रा-तैरभिप्रायैश्च सर्वा भारतीयराज्यभाषाः पुष्णाति कन्दलयति पल्लवयति च । नेतिमानिनः केचन वैधेयाः कामं प्रलपन्तु, परन्तु यथावसरं प्रकटयिष्यति संस्कृतं स्वकीयं स्थेमानम् अगत्याग्राह्यत्वञ्च । कम्प्यूटरवालाऽपि संस्कृतमेव स्वयं वरयतीति कतिपयमासपूर्वमुद्घोषितमम्वरीष (अमरीका) देशयन्त्रज्ञैः । किमधिकमुच्येत संस्कृतस्य वर्तमानयुगोपयोगित्वविषये ?

सोऽहमस्मि संस्कृतजीवी। संस्कृतं विहाय नान्यद्रोचते। बहु पठितम्। भाषामाध्यमेन भाषान्तरमाध्यमेन वा पुष्कलं विश्ववाङ्मयमधीतम्। तथापि रमते न मरालस्य मानसं मानस विना! संस्कृते रत्नाकरायमाणे निखिलं तदितरवाङ्मयं पल्वलायते। इयमनुभूतिः संस्कृतपरिशीलनं विनोरीकर्तुं न शक्यते।

मदुपज्ञलघुनाट्यानां पञ्चमोऽयं संग्रहः। यदि रसज्ञाः संस्कृताधीतिन एव्वेकाङ्क्षिषु पूर्वापेक्षया परिष्कृतं समुच्छ्वसितञ्च नाट्यकृद्भावशिल्प-विकासं दृग्गोचरीकरिष्यन्ति तदेव भविष्यति मत्पारितोषिकम्।

अस्य संग्रहस्य भूमिकालेखनार्थं मया बहुशोऽनुरुद्ध आसीत् मयि समधिक-तरं स्निह्यन् प्रोफेसरशार्पमहाभागो बेल्जियमदेशीयगेण्टविश्वविद्यालयस्य-भूतपूर्वसंस्कृतविभागाध्यक्षः। परन्तु ममैवाधन्यतयाऽसौ कालिदासकाव्या-म्बुपाठीनो विगतमार्चमासस्य सप्तमतारिकायां सान्ध्यवेलायां सहसा दिवङ्गत इति सूचितोऽस्मि तदात्मजेन जे० शार्पमहोदयेन सप्तमागस्तदिनाङ्कित-पत्रद्वारा। अवसानकाले प्रो० शार्पे रघुवंशस्य अष्टमसर्गं परिशीलयन्नासीदिति विज्ञाय तन्महिमानं स्मरामि। नीललोहितश्शिवस्तस्य पाश्चात्त्यदेवर्षेः पुनर्भवं क्षपयत्विति कामयमानोऽहं सारस्वताध्यवसायमिमं सश्रद्धं सविनयं तस्मै समर्पयामि।

विदुषां वशंवदः
मिश्रोऽभिराजराजेन्द्रः

विषयानुक्रमः

एकाङ्किशीर्षं	पृष्ठसंख्या
१—अभीष्टमुपायनम्	३
२—मात्मानवसादयेत्	११
३—स्वप्नाज्जागरणं वरम्	२१
४—पुनर्मेलनम्	३३
५—कन्थामाणिक्यम्	४९
६—कुटुम्बरक्षणम्	६१
७—राजराजौदार्यम्	७१
८—को विजयते नैव ज्ञातम्	८३
९—रक्ताभिषेकम्	९७
१०—काश्यपाभिशापम्	१०९
११—एकं सद् विप्रा बहुधा वदन्ति	११९

मूलं श्रीकविकालिदासकविता श्रीहर्षवाणी तनुः
पत्रं श्रीजयदेवदेववचनं श्रीबिल्हणोक्तं सुमम् !
श्रीमत्पण्डितराजकाव्यगरिमा यस्यैकपूतं फलं;
जीव्याद्धन्त निसर्गजोऽयमभिराड्राजेन्द्रकाव्यद्रुमः !!

अभीष्टमुपायनम्

(यौतकसमस्याश्रितं रेडियोरूपकम्)

पात्रपरिचयः

आलोकः	(नाम्ना संकेतितो नायकः)
दीवानचन्द्रः	(आलोकस्य पिता)
रामेन्द्रः	(आलोकस्य मित्रम्)
टिङ्कू	(आलोकस्य अनुजः)
तुलसीरामः	(कन्याविवाहार्थी कश्चित् श्रेष्ठी)
डाली	(तुलसीरामस्य कान्वेण्टशिक्षिता कन्या)
शोभा	(आलोकस्य भगिनी)
विमला	(आलोकस्य माता)
वन्दना	(शोभासहपाठिनी)

कथासार

सेठ दीवानचन्द अपने सुयोग्य पुत्र आलोक का विवाह धनकुबेर सेठ तुलसीराम की कान्वेण्ट-शिक्षिता कन्या डाली से करना चाहता है ताकि इसी बहाने वह तुलसीराम की फैक्टरियों का स्वामित्व पा सके। परन्तु आलोक की माँ विमला दहेज के सर्वथा विरुद्ध है। वह अपने बेटे का विवाह एक चिर-परिचित सर्वगुण-सम्पन्न कन्या वन्दना से करना चाहती है जो उसकी कन्या शोभा की ही सहपाठिनी है।

आलोक का मित्र रामेन्द्र एक दिन प्रातः अखबार लाकर सूचना देता है कि आलोक प्रथम श्रेणी में एम्.ए परीक्षा पास हो गया है। सारा घर खुशी में डूब जाता है। उसी दिन सेठ तुलसी भी अपनी सुपुत्री डाली के साथ आ जाते हैं। डाली की वेष-भूषा और बातचीत के लहजे से विमला को बड़ी वितृष्णा होती है।

विवाह की बातें चल ही रही हैं किआलोक का छोटा भाई टिङ्कू दीवाल में स्वामी विवेकानन्द का चित्र टाँगने के प्रयास में तिपाई से गिर जाता है। उसे बड़ी चोट लगती है। डाली बैठी देखती रहती है परन्तु वन्दना अपनी साड़ी फाड़ कर उसका घाव बाँधती है और विमला को ढाँढस बँधाती है।

यह दृश्य देखकर, डाली के प्रति विमला का द्वेष पराकाष्ठा पर पहुँच जाता है। वह सेठ तुलसीराम को साफ जवाब देती है कि वह अपनी हृदयहीन कन्या लेकर चलते बने। वन्दना ही उसकी बहू बनने योग्य है और उसकी विनम्रता ही सबसे बड़ा दहेज है।

अभीष्टमुपायनम्

(यौतकसमस्याश्रितं रेडियोरूपकम्)

।। प्रथमं दृश्यम् ।।

नगरस्य सुरुचिसम्पन्ने निवेशे श्रेष्ठिनो दीवानचन्द्रस्य रुचिरं गृहम् । सर्वत्र हर्षोल्लासः । प्रातःकाले सर्वेऽपि गृहसदस्याः स्व स्वकर्मणि व्याप्ताः दृश्यन्ते । गृहलक्ष्मीः विमला प्रातराश निर्माय कन्याम् आह्वयति ।

विमला वत्से शोभे !

(उत्तरम् अनवाप्य तारस्वरेण)

शोभे ! क्व गताऽसि ? ईदृशी बधिरा कन्या न मया दृष्टा । श्वसुरालये न जाने कथं निवत्स्यति ?………शोभे ! किं पाताललोके प्रविष्टासि !

शोभा (ससम्भ्रमं धावन्ती)

अम्ब ! आगताऽस्मि । कथय किं करणीयं वर्तते ?

विमला क्व मृतासीः रे ! अहं महानसे विदहामि, त्वं पुनः मधुमक्षिकेव अस्थिरा भवसि । गच्छ, प्रातराशं स्वपितरम् उपनय । अहमपि क्षणानन्तरमागतास्मि इति कथय । अवधृतं न वा ?

शोभा अम्ब ! अवधृतम् । एषा गच्छामि ।

(इति प्रातराशं नयति)

दीवानचन्द्र : (शोभां दृष्ट्वा)

वत्से ! प्रातराशम् आनयसि किम् ? क्व वर्तते ते जननी ?

शोभा तात ! भवान् प्रातराशं गृह्णातु तावत् । अम्बा द्वित्रैरेव क्षणैः आगमिष्यति । एवमामन्त्र्य तयैव प्रेषिताऽस्मि ।

दीवानचन्द्र : साधु साधु ! गच्छ वत्से स्वमातरं भण केनचिद् विशेषप्रयोजनेन यथाशीघ्रं तां द्रष्टुमिच्छामि ।

शोभा यथाह तातः गत्वा जनन्यै निवेदयामि ।

(प्रविश्य अपटीक्षेपेण)

विमला किमस्ति तत् प्रयोजनं येनाद्य प्रातरेव मयि अतिमात्रं स्निह्यति भवान् ? अद्य खलु पश्चिमायां दिशि सूर्यं उदयति ।

दीवानचन्द्र : (ससीत्कारं चायपेयं पिबन्)

भाग्यवति ! आगतप्राया एव विवदसि ? लौहकर्मशालेव नितरां ते मस्तिष्कं दन्दह्यते । कदाचिदपि तावत् हिमशीतला भवतु भवती । एहि, मम पार्श्वे मुहूर्तमात्रमुपविश ।

विमला (पार्श्वमुपविश्य)

कथय साम्प्रतं स्वप्रयोजनम् । पुरुषैः मधुरालापे कृते मानसं मे नितरां शङ्कते ।

दीवानचन्द्र : (उच्चैर्विहसन्)

अयि भाग्यवति ! अलमाशङ्कया । अहं पुनः आलोकस्य विवाहसन्दर्भे त्वया सह किञ्चिन्मन्त्रयितुम् इच्छामि ।

विमला (हर्षेण समुच्छलन्ती)

किमुक्तं भवता, आलोकस्य विवाहसन्दर्भे ? हे प्रभो ! अद्य धन्यास्मि जाता ! प्रसन्नाः कुलदेवताः । तर्हि शीघ्रमुच्यताम् उच्यताम् । काऽपि कन्या दृष्टा भवता ? कदा भविष्यति विवाहः ?

दीवानचन्द्र : हे परमेश्वर ! गहनं महिलामायाजालम् ! क्षणेनैव हिमायन्ते क्षणेनैव प्रज्वलन्ति । पुत्रोद्वाहवृत्तं श्रुत्वैव पारदोऽवातरत् ?

विमला (कातरीभूय)

भोः शप वा कुप्य वा । न तेन मे किञ्चिद् विप्रकार्यते । परन्तु यद्भवेत् तत् स्फुटं भण ।

दीवानचन्द्र : (सस्नेहम्)

देवि ! धैर्यं धारय । एकश्वासेनैव प्रश्नशतं करोषि । एकधैव कथमुत्तरं ददानि ? गम्भीरोऽयं विषयः ।

विमला (अधैर्यम् नाटयन्ती)

भवतु भवतु ! अलं विलम्बितेन । कृपया शीघ्रं कथयतु भवान् । कीदृशी वर्तते सा कन्या ? कियती शिक्षिता ? कीदृक्स्वभावा च वर्तते ?

दीवानचन्द्र : देवि ! विवाहप्रस्तावास्तु अनेके वर्तन्ते । परन्तु तादृशमेव सम्बन्धं वरं मन्ये यस्मिन् सर्वमपि सिद्धं स्यात् ?

विमला (सवितर्कम्)
किं वक्तुमिच्छति भवान् ? किन्न वर्ततेऽस्माकं गृहे ? धनं धान्यं सन्ततिः सुखमयं गार्हस्थ्यं भवनम्—सर्वाणि जगदीशकृपया वर्तन्ते एव । केवलं सर्वगुणशीलनिधानभूता पुत्रवधूर्मया काम्यते ।

दीवानचन्द्र : (सोत्साहम्)
भाग्यवति! गतं तद् युगम् । इदानीं तु मनुष्यश्चन्द्रमपि समारोहति । सर्वे गुणाः काञ्चनमाश्रयन्ते । काञ्चनं विना कामिनी निरर्थका । पुनश्च मम पुत्रो रूपवान्, गुणवान्, सदाचारपरायणश्च । कथं न तर्हि यौतकरूपेण विशालां सम्पत्तिमर्जयेयम् ?

विमला (सनिःश्वासम्)
हे प्रभो ! कोऽयं भवतां दुर्विचारः । पुत्रं विक्रेष्यसि किम् ? पुत्रोऽपि नाम वृषभः छागः अन्नमिव प्रतीयते ?

दीवानचन्द्र : (सोद्वेगम्)
न जाने विधिना कीदृशी बुद्धिर्निर्मिता स्त्रीणाम् ? अये भाग्यवति! किं दशरथेन श्रीरामो विक्रीतः ? किं जनकेन वा स्वपुत्री सीता विक्रीता ? विवाहसम्बन्धे तु यौतकरूपेण धनस्य आदानं प्रदानं वा भवत्येव । प्राचीनोऽयं व्यवहारः ।

विमला (निरुत्तरीभूय)
साधु भणति भवान् । किन्तु क्वचित् इदमेव धनादानं यौतकं वा विषमिव सर्वं विनाशयति । मम तु (इत्यर्धोक्त एव)
(अकस्मादेव समाचारपत्रं हस्ते निधाय प्रविशति रामेन्द्रः)

रामेन्द्र : अम्ब ! अम्ब ! मुखं मे मधुरय मिष्टान्नैः । आलोकस्तु एम्०ए० परीक्षां प्रथमश्रेण्यामुत्तीर्णवान् । पश्य, समाचारपत्रं पश्य ।

विमला (हर्षेण गद्गदीभूय)
चिरञ्जीव वत्स ! अये वत्से शोभे ! क्वासि ? आलोकः प्रथमश्रेण्यामुत्तीर्णः । हे प्रभो ! महती कृपा वर्तते ममोपरि ।
(सर्वेऽपि कुटुम्बिनः पुञ्जीभूय मिष्टान्नं खादन्ति)

दीवानचन्द्र : सुप्रभातं वर्तते अद्य । विमले ! एतत् सर्वं संविधानकं नियमय तावत् । मम वचनं शृणु । अद्य दशवादने पूर्वाह्णे श्रेष्ठिवर्य-स्तुलसीरामः स्वकन्यया सहैव आगमिष्यति । एतदेव मया निवेदितव्यमासीत् प्रातःकाले । तत् स्वागतसम्भारे सम्यक् ध्यानम् अवधेहि ।

विमला (सस्मितम्)

आम् । ज्ञातमिदानीं प्रहेलिकातात्पर्यम् । परन्तु सुकन्यां विना नाहं स्ववत्सं परिणेष्यामि, इतीदानीमेव भणामि ।

दीवानचन्द्र : ज्ञातं ज्ञातम् । गच्छ तावत् ।

॥ जवनिकापातः ॥

॥ द्वितीयं दृश्यम् ॥

दीवानचन्द्रस्य आस्थानकक्षे श्रेष्ठी तुलसीराम; स्वकन्यया डाल्या सह तिष्ठति । समक्षमेव विमला दीवानचन्द्रश्च वर्तेते । चायपानं प्रवर्तते । शोभा स्वसहपाठिन्या वन्दनया सार्धम् आतिथ्यकर्मणि व्यापृता वर्तते । आलोकस्तु रामेन्द्रेण सार्धम् अन्तःप्रकोष्ठे तिष्ठति ।

तुलसीराम : (व्यञ्जनं भक्षयन्)

साधु साधु ! कियत् स्वादु वर्तते दधिवटकमिदम् ? भ्रातः दीवानचन्द्र ! कया निर्मितम् ? किं वत्सया शोभया ?

विमला नहि नहि ! शोभायाः सहपाठिनी वन्दना व्यञ्जनपक्वान्ननिर्माणे अतिनिपुणा वर्तते । तयैव निर्मितम् । वत्से वन्दने ! मुहूर्तमित-स्तावत् ।

वन्दना (ससंकोचं प्रविश्य)

अम्ब ! मामाह्वयति भवती ! किं कर्तुं युज्यते ?

विमला वत्से ! न किमपि करणीयम् । अयं महानुभावः त्वन्निर्मितं व्यञ्जनं बहु प्रशंसति । प्रणम तावत् । शोभे ! त्वमपि प्रणम । (उभे सलज्जं प्रणमतः)

तुलसीराम : चिरञ्जीव वत्से ! कस्यां कक्षायां पठसि ?

कल्पना : द्वादशकक्षायाम् ।

तुलसीराम : शोभनं शोभनम् । किन्तव विद्यालयेऽपि व्यञ्जननिर्माणकला शिक्ष्यते ? कान्वेन्टविद्यालयेषु तु नेयं व्यवस्था ।

कल्पना : श्रीमन् ! गृहविज्ञानमपि आवयोः पाठ्यविषयः । तस्मिन् गृहोपयोगि सर्वं शिक्ष्यते—भोजनकला, रोगोपचारकला, उद्यानकला ।

तुलसीराम : (विहसन्)

वत्से ! तस्मादेव कलावती जातासि । गच्छ, कल्याणं भवेत् ।

(उभे डाल्या आंग्लवेषभूषां पश्यन्त्यौ गच्छतः)

तुलसीराम : भ्रातः दीवानचन्द्र ! प्रकृतमनुसरामस्तावत् । भवतः परिवारं दृष्ट्वा सन्तुष्टोऽस्मि । यद्यपि मम कन्या कान्वेण्टविद्यालये शिक्षिता तथापि किञ्चित्कालपर्यन्तम् अत्रापि निवत्स्यति। पश्चात् अनुकूलां व्यवस्थां करिष्यामि । अथ आलोकविषये किं चिन्तितं भवता ?

दीवानचन्द्र : (हसन्)

किमहं चिन्तयिष्यामि ? यद्यपि आलोक एम०ए० परीक्षामुत्तीर्णः क्वचित् शिक्षणं कर्तुं वाञ्छति, किन्तु (इत्यर्धोक्ते)

डॉली : (निरर्गलं हसन्ती)

डैड ! व्हाट ए सिली आइडिया ? दि पुअर टीचर !

तुलसीराम : (सनिर्भर्त्सनम्)

डालि ! वत्से ! नैवमुपहसनीयम् । नेदं स्थानं कलिकाता । स्थानानुकूलमेव विचारा जायन्ते ।

(विमला आंग्लवाक्यार्थमनवगत्यापि वितृष्णां नाटयति)

तुलसीराम : दीवानचन्द्र ! शिक्षणेन किं भविष्यति ? मम एतावत्यः कर्मशाला वर्तन्ते । लक्षकोटिमितो मम व्यापारः । मयि मृते, सर्वमपि मम पुत्र्या एव हस्ते गच्छति ।

दीवानचन्द्र : (पत्न्या दृष्टिमवलोक्य सभयम्)

युज्यते युज्यते । सम्यगाह भवान् । भारतदेशे तु भिक्षावृत्तिरपि श्रेयस्करी न पुनः शिक्षा ।

ठिङ्कू (चित्रमेकं हस्ते निधाय प्रविश्य)

अम्ब ! स्वामिनो विवेकानन्दस्य चित्रमिदं कक्षभित्तौ योजयानि ?

विमला (सस्नेहम्)

योजय वत्स योजय ! तूर्णमहमागच्छामि ।

(इति गृहाभ्यन्तरं प्रविश्य ठिङ्कू त्रिपादीमानीय आरुह्य च चित्रं कीलितुं प्रयतते परन्तु असन्तुलनवशात् भूमौ निपतति । ललाटे क्षतं जायते । कोलाहलं श्रुत्वा सर्वे धावन्ति । वन्दना स्वशाटिकां विदार्य क्षतं बध्नाति । रुधिरस्रवञ्च स्तम्भयति)

विमला (धावन्ती प्रविश्य)

किमभूत् किमभूत् ? अये क्षतं जातम् ? हे प्रभो ! कीदृशं दुष्प्रभातमद्य वर्तते !

वन्दना अम्ब ! अलं परिदेवनेन । मया क्षतं बद्धम् । रुधिरस्रवोऽपि निरुद्धः । न किमपि अत्याहितम् ।

डॉली डैड ! ही शुड बी हास्पिटलाइज्ड !

विमला (सस्नेहं वन्दनामङ्के निधाय)

वत्से ! शीलसौन्दर्यकरुणायाः मूर्तिरसि त्वम् । त्वां सम्प्राप्य गृहमिदं पूजामन्दिरं भविष्यति । तव सद्गुणा एव मे अतुलनीयं यौतकम् । मम अभीष्टम् उपायनम् !!

(तुलसीरामं प्रति)

श्रेष्ठिवर्य ! श्रुतं भवता ? वृता मया स्वकीया पुत्रवधूः । भवान् क्वचिदन्यत्र गच्छतु । नमस्ते ।

(शोभा वन्दनाऽद्य मे भ्रातृजाया जाता इति भृशं क्रोशन्ती उच्छलति कूर्दति । नेपथ्ये च मंगलवाद्यध्वनिः श्रूयते)

।। जवनिकापातः ।।

नात्मानमवसादयेत्

(भाणप्रकृतिकमेकाङ्किरूपकम्)

पात्रपरिचयः

बन्धयूकः	(सूत्रधारः कश्चिच्चौरः)
पुरुषः	(कश्चिद् दरिद्रो गृहपतिः)
नारी	(काचिद् दरिद्रगृहिणी)

कथासार

इलाहाबाद नगर के रंगमञ्च पर दन्दशूक नामक एक चोर सूत्रधार की भूमिका में अवतरित होता है। सहृदयों को अपना उपहास करते देख वह आधुनिक राजनेताओं के चरित्र का कच्चा चिठ्ठा प्रस्तुत करते हुए बताता है कि कैसे वह उनकी तुलना में महत्तर है? वह यह भी बताता है कि कैसे वह चोर से राजनेता बननेवालों की तरह सेंध लगाते ही लगाते फिरौती उगाहनेवाला एक समर्थ डाकू बन गया है।

अचानक उसे याद आता है कि नाट्याचार्य डॉ० राजेन्द्र मिश्र ने उसे कुछ और ही अभिनय प्रस्तुत करने को कहा था जिसे प्रमादवश वह भूल गया। स्मृति आते ही वह अपनी नई भूमिका में अवतरित होता है। अब वह तिरुचिरापल्ली नगर (तमिलनाडु) का एक शातिर चोर है। कई घरों का माल लूटने के बाद वह एक हवेली की बाहरी टीम-टाम देखकर खिड़की से प्रविष्ट होता है और अधखुले किवाड़ की दरार से आती वार्ताध्वनि सुनने लगता है। यह वार्ताध्वनि एक दरिद्र पति-पत्नी की है जो पुआल की चटाई ओढ़े पूस महीने की भयानक शीत में काँप रहे हैं अपने नन्हें बच्चे के साथ!

यह करुण दृश्य देख चोर का हृदय पसीज उठता है। वह अन्य घरों से चुराई गई सम्पदा की गठरी भी किवाड़ की दरार से भीतर ठेल देता है और स्वयं बाहर चला जाता है। घोर मनस्ताप में डूबा वह भविष्य में कभी भी चोरी न करने का व्रत लेता है।

नात्मानमवसादयेत्

(भाणप्रकृतिकमेकाङ्करूपकम्)

पात्राणीव यथारुचि प्रतिपलं निर्माति जीवव्रजं
नानारूपगुणात्मशक्तिनिलयं नानार्यति नित्यशः।
लीलामात्रविनोदितो विघटयत्यात्मप्रमाणश्च य-
स्तं वन्दे वरटस्थितं जलजजं देवं त्रिदेवोत्तमम् ॥१

अपि च,

रात्रौ चन्द्रमसा तनोति रुचिरां कुन्दप्रियां कौमुदीं
दीप्तिं भास्करभासिताञ्च दिवसे सूर्येण योऽब्जप्रियाम्।
शैतल्यं सलिलेन भूरितपनं वैश्वानरेणानिशं
प्राणान् गन्धवहेन शर्म धरया तस्मै नमो वेधसे ॥२

(पुष्पाञ्जलिं विकीर्य)

भोभोः नाट्यदर्शनप्रतीक्षारताः सहृदयाः यामुनगाङ्गसङ्गमनिवासिनः! एष प्रणमति दन्दशूकः। ही ही ही ही भोः नाट्यारम्भे परम्परया समागच्छतः सूत्रधारस्य स्थाने मां दन्दशूकं दर्शं दर्शं कथमुपहसन्ति भवन्तः? भोः प्रजासृष्टिरिव काव्यसृष्टिरपि विधात्रधीना। कविरेव प्रजापतिरिति सत्यम्। यथाऽस्मै रोचते काव्यं तथेदं परिवर्तते। दन्दशूकस्य पाटच्चरस्य सूत्रधारीकरणं सूत्रधारस्य च दन्दशूकीकरणमित्युभयमपि तस्यापरवेधसो वामहस्तक्रीडा।

(सर्वतो गत्वा सदृष्टिक्षेपम्)

सोऽहमस्मि दन्दशूको नाम चोरः। भारते स्वतन्त्रे जाते ममापि पदवृद्धिर्जाता। समाजे प्रतिष्ठाऽपि किञ्चिदौन्नत्यमारूढा। स्वातन्त्र्यात्प्राक् सन्धिभेदक आसम्। मृद्भित्तिविदारणक्षमलोहक्षुरप्रमात्रसहायोऽहं निभृतनिभृतं ग्रामटिकासु आहिण्डमानोऽसितपक्षरात्रिषु कुक्कुरबुक्कनं परिहरन् सयत्नं क्वचित्सन्धिं विधाय मुष्टिमितमन्नं द्वित्राणि वा विक्टोरियाङ्कितरूप्यकाण्येव बहु मन्यमानो जीवनं निर्वहन्नासम्।

हन्त भोः ! ते हि नो दिवसा गताः ! भारते सम्प्राप्तस्वातन्त्र्ये सर्वेऽप्यस्मत्सहचराः परिवर्तिताः । यद्यदेवाचरति श्रेष्ठस्तत्तदेवेतरो जन इति नवनीतचौरवचनं प्रमाणीकृत्य मयाऽपि युगानुरूपं परिवर्तनं स्वीकृतम् । पूर्वकाये रक्षिजनोचितं बक्षोरतं (बुश्शर्ट) अधोभागे च पदलीनं (पतलून) भस्मवर्णं वसानोऽहमपि सन्धिभेदकादकस्मादेव दस्युराजो जातः ।

इदानीं नाहिण्ड्यते मया ग्रामवीथीषु ! प्रक्षिप्तं मया सन्धिविधानशुल्वसूत्रम् । जरदश्व इव परित्यक्तः क्षुरप्रः । कदर्थितम्मया प्राक्तनं संविधानकम् । इदानीं केवलं धनकुबेराणां वंशदीपान् प्रसह्य हरामि । लक्षमितञ्च धनं तेभ्यः स्वायत्तीकृत्य विमुञ्चामि । पणकमात्रमपि नात्र कलिविडम्बनम् । न खदिरं न चूर्णं तथापि समधिकतररक्तवर्णं ताम्बूलम् !

(कैतवेनाट्टहासं जनयन्)

एवंपरिचयः किमहं रोचे भवद्भ्यः ? दारक ! त्वं ब्रूहि । भ्रातः त्वं ब्रूहि । आर्ये ! भवती ब्रवीतु । पितामह ! भवानेव ब्रवीतु । अये न कोऽपि ब्रवीति ! तत्किमहं न रोचे मनागपि भवद्भ्यः ? तत् किं भवन्तः कामप्यपरां महीयसीं पदवृद्धिं मे समीहन्ते ?

(सकुटिलहास्यं हस्तमाकाशे भ्रामयन्)

आं ज्ञातम् । ज्ञातमिदानीम् । भवतां मनोवृत्तिरुपलक्षिता मया । केचन सहचरा मे प्रोन्नत्येदानीं विधायकाः सञ्जाताः । मामपि विधायकं द्रष्टुमिच्छन्ति भवन्तः । अस्त्येवं न वा ? (सहृदयेष्वट्टहासः)

विधायकोऽपि नाम लीलासलिम्लुचः ।

गृहपारावत इव गृहदस्युरयं प्राणी । न सन्धिच्छेदस्यावश्यकता, न दारकापहरणापेक्षा न वा रक्तपातसमस्या ! सर्वं साध्यते प्रतिभुवा । तूष्णीमास्थाय प्रजापालननाटकमभिनयन्नपि दृष्ट्या लुण्ठति सर्वस्वम् । अस्य मौनमेव भाषा । सङ्केत एव प्रणिधिः । विविधदृष्टिपाता एव जीवननिधनदुर्दशापर्यायाः । साक्षात्कृतान्तोऽयं प्रजावर्गस्य ।

तदिदानीं स्पष्टं जातम् । भोः सहृदयाः ! प्रतिशृणोम्यहं यदागामिनि विधानसभानिर्वाचने भवत्कृपयैव विधायकीभूय भवदाकांक्षां पूरयिष्यामि ।

(नेपथ्येऽनुश्रूयते)

सायंतने कमलिनीमलिशङ्कुविद्धां
संल्लालयन् विमलशीतकरानुलेपैः ।
विस्मृत्य शोकरयतो नियतेर्नियोगं
नोऽगं रविर्जिगमिषत्यथ पश्चिमस्थम् ॥३

अपि च,

चान्द्री निशेयमथवाऽसितशर्वरी वा
निश्चीयतेऽप्यनुदिते न विधाविदानीम् ।
सन्देहभञ्जितधृतिप्लवनास्तदित्थम्
अल्पाल्पमम्बरपथे प्रसरन्ति ताराः ॥४

(श्लोकाभिप्रायं विज्ञाय सललाटताडनम्)

दारक दन्दशूक ! इदानीं स्वकुटिलतया निहतोऽसि । अन्यत् कर्तुमाज्ञप्तो नाट्याचार्येण तत्रभवताऽभिराजराजेन्द्रेणान्यदेव कर्तुं व्यवसितः ? तदिदानीं नास्ति ते मोक्षोपायः । भवतु दुर्घटनातो विलम्ब एव श्रेयस्करः । साधु स्मारितमाचार्येण श्लोकाभ्याम् ।

(सहृदयाभिमुखीभूय साञ्जलिपुटप्रणामम्)

नमो नवनीतचौराय गोविन्दाय ! नमो बृहस्पतये चौर्यशास्त्रप्रवर्तकाय ! नमश्चतुर्वेदिने शर्विलकाय सन्धिज्यामितिपण्डिताय ! नमोऽस्मच्चौर्यसाक्षिभूतेभ्यो भवद्भ्यः ।

(सर्वे दर्शका निर्भरं प्रहसन्ति)

भो सहृदयाः ! प्रयागनगरवास्तव्याः ! सम्प्रत्यात्मना सहैव भवत्समाजमपि परिवर्तयामि ।

(डमरुकं वादयन् सहेलं नृत्यति)

सम्पन्नमिदानीं परिवर्तनम् ! एष 'दाक्षिणात्यचौरोऽस्मि जातः । भवन्तोऽपि त्रिशिरःपुरीवास्तव्याः वृन्दारकगवीकाव्यप्रसूनमरन्दमार्मिका मधुव्रताः । त्रिशिरःपुरीस्थायाः संस्कृतसाहित्यपरिषदः स्वर्णजयन्तीमहोत्सवे समागतानां भवतां मनोरञ्जनाय स्वाचार्येण किमप्येकाङ्करूपकं प्रस्तोतुमादिष्टोऽस्मि ।

तदाज्ञासमकालमेव प्रस्तूयते मया नात्मानमवसादयेदित्यभिधेयं किमपि नवीनतममेकाङ्करूपकम् । यावदहं प्रकृतरूपकानुकूलं नेपथ्यविन्यासं सम्पाद्यागच्छामि तावत्संगीतलयलहरीमाकर्णयन्तु भवन्तः ।

(नेपथ्ये संगीतध्वनिः स्फारीभवति)

विचारं त्वदीयं न जानामि बन्धो !
त्वदुत्थानगीतानि गायामि बन्धो !!
लतेयं स्वयैव ज्वलन्नीरसिक्ता
प्रकारं त्वदीयं न जानामि बन्धो !!

प्रसूनैर्विसोढो वियोगो लतानां
विहारं त्वदीयं न जानामि बन्धो !!
हृतं जीवनं सख्यमास्थाय यन्मे
प्रहारं त्वदीयं न जानामि बन्धो !!

विनैव श्रमं लक्षकोटीश्वरोऽसि
प्रभारं त्वदीयं न जानामि बन्धो !!
विनैवाग्निवर्णं दहस्याशु शस्यं
तुषारं त्वदीयं न जानामि बन्धो !!५

(नेपथ्येऽनुश्रूयते)

हः हः हः हः ऽ ऽ ऽ अधुना सर्वं ज्ञास्यसि ! अन्यापदेशरीतिमवलम्ब्य बह्वरण्यरोदनं कृतं त्वया। सम्यगुपालब्धम् । परन्तु किमनेन भवति? अन्धः प्रगुणीकरिष्यति महिषोडिम्भस्तावच्चर्विष्यति ।

(अपटीक्षेपेण प्रविश्य)

हः हः हः हः ऽ ऽ ऽ ऽ। भो दन्दशूकोऽस्मि। बहुषु नगरेषु स्वहस्तकौशलं प्रदर्श्य त्रिशिरःपुरीमिदानीमुपगतोऽस्मि। क्वचित्सन्धिविधानेन क्वचिन्मध्येमार्गं प्राणसंकटमयमुत्पाद्य क्वचित्सन्ततिव्यपहरणेन क्वचिच्च प्रवञ्चनमात्रेण प्रभूतं धनं समाहृत्य दाक्षिणात्यानाञ्चोपकर्तुं समागतोऽस्म्यत्र। श्रुतम्मया यदत्र धनकुबेराः पदे-पदे विद्वांसश्च प्रतिरथ्यं निवसन्ति। अतएव धनार्जनमिति मद्विद्यादुर्लालनञ्चेति उभयमपि प्रयोजनमत्र सिद्धिमेष्यति।

(नेपथ्येऽनुश्रूयते ध्वनिः छाऽऽर्छिः इति)

दन्दशूक : (सामर्षम्)

अये ! प्रथमग्रास एव मक्षिकापातः ? भोः नासारज्जुकटुको बलीवर्द इव कोऽयमनवसरं हम्भारवमनुनासिकं जनयति ? भवतु, किमनेन ? यतो हि,

प्रियगृहोद्यमिनी ननु कामिनी धनजिहीर्षुरथोऽपि मलिम्लुचः
विहितविघ्नशतैरपि वारितो न खलु योज्यपथात्प्रतिवर्तते ॥६

(निभृतपदैः परितः परिक्रम्य)

क्वाद्य कौशलं दर्शयामि ? सर्वाण्यपि गृहाण्यत्रवसतौ पक्वेष्टिका-विनिर्मितानि । क्वचिदपि वातायनमुद्घाटितं न दृश्यते येन सञ्चम्पमभ्यन्तरीभूय स्वसमीहितमनोरथं पूरयामि ।

(परितः पश्यन् भवनमेकं निर्दिशन्)

हन्त ! सिद्धमनोरथोऽस्मि । क्वचित्पर्याकुलकर्परः क्वचिद्विघटित-च्छदिर्भग्नतोरणः खण्डितवितर्दिकश्चायमेक एव गेहो व्युन्नि-द्रवातायनकवाटो दृश्यते । तदलमर्गलाभञ्जनप्रयासैः । सर्पोऽपि म्रियतां लगुडोऽपि न त्रुट्यतु ! भवतु प्रविशामि ।

(शनैः भग्नप्रायगृहसमीपमुपगम्य)

मन्येऽल्पसदस्यमिदं भवनम् । न दारकाणां विकलनिद्राणां नीनी-बहुलश्चीत्कारो न वा माज्यमाणानां पात्राणां खनत्कारो न वा प्रसुप्तानां कुटुम्बिनां घोणाहुङ्कारः । तत्किं विजनमेव गृहमिदम् ? भवतु, प्रवेशं विना न किञ्चिदपि ज्ञातुं शक्यते ।

(निश्शब्दं वातायनमार्गेण प्रविशति । पर्यटति चेतस्ततः)

अये ! प्रेतवनमिव भयावहं गृहम् । कण्डिनी पेषिणी, चुल्ली, उदकुम्भीति सर्वमेवात्र दृश्यते । परन्तु कस्मिश्चिदपि कक्षेऽट्टालि-कायां वा मञ्जूषा न वर्तते । तत्किं निखातं धनं दुष्टेन गृह-पतिना ? यद्येवं तर्हि प्रबोध्य संत्रासयिष्यामि । प्रताडनैस्तु प्रेता अपि पलायन्ते ।

(मध्यद्वारमुद्घाट्य पुरस्सर्तुं समीहते । वार्ताध्वनिं निशम्य)

अये कक्षान्तरे वार्ताध्वनिः श्रूयते । श्रोतव्यमिदानीम् ।

(इति क्षेत्रपुरुषीभूय मौनमवलम्ब्य तिष्ठति)

नारीकण्ठः (ससीत्कारं सदैन्यञ्च)

मुञ्च तावत् पलालास्तरणम् । दारकोऽयं मदुत्संगेऽर्धनग्नो जातः । कदाचिच्छैत्येन पीड्येत ।

पुरुषकण्ठः भाग्यवति ! अलममर्षेण । न मया पलालास्तरणं सम्यक् गृहीतम् ।

त्वत्प्रीत्या वत्सप्रयोजनेन च पूर्वमेव मुक्तम्मया । पश्य तावत् ।
कूर्मीभूय स्वपिमि ।

(नारी किञ्चिदुत्कन्धरीभूय पतिं पश्यति)

नारीकण्ठ : सत्यमेव कूर्मीभूतोऽस्मि ! मयाऽनार्यया मुधैवोपालब्धोऽसि । कियद् दुःखं सहसे ? हे परमेश्वर ! कथमेवं निष्ठुरोऽसि सञ्जातः? केभ्यश्चित् अपरिमेयमैश्वर्यं प्रददासि । आवाभ्यां तावद्दन्त-सीत्कारकारिणि पौषशीते ऊष्मप्रावारकमप्येकं न प्रयच्छसि ? किमावयोः पूर्वजन्मकर्माणि पुण्यलेशमपि नार्हन्ति ?

पुरुषकण्ठ : भाग्यवति ! अलमीश्वरमुपालभ्य ! ईश्वरस्तु साक्षिमात्रम् । स च कमपि दुःखाकरोति न वा सुखाकरोति । स्वकर्मविपाकं भजते मानवः ।

(पलालास्तरणं शिथिलयन्ती पत्नी रोदिति)

नारीकण्ठ : आर्य ! तृणकटं तावदाकर्ष । महच्छैत्यमनुभवसि । एषाऽहं दारकं स्वपटाञ्चलेन संवृणोमि ।

पुरुषकण्ठ : (ससम्भ्रमम्)

भाग्यवति ! अलं साहसेन । त्वदेतावन्मात्रेण स्नेहेन विपत्तिग्रस्तो भवेयम् । दारके रुग्णे सति रोगोपचारमपि कारयितुं न शक्ष्यामि । दरिद्रप्रिया रोगा इत्यपि साध्ववैमि ।

(दन्दशूको वार्ताक्रमं श्रावं श्रावं करुणया प्रह्वीभूय तिष्ठति)

दन्दशूक : (आत्मगतम्)

हन्त भोः एतावती दारिद्र्यसृष्टिर्न मयाऽवेक्षिता पूर्वम् । सर्वथा धिङ् मां परद्रव्यापहारिणं लुण्ठाकम् । योऽहमनुदिनं पराजितानि धनानि यथाकथाञ्चित् मुष्णन् क्लेशयामि तदर्जनपरायणान् । पापोपार्जितधनैश्च मदिरां निपीय वा द्यूतक्रीडां सम्पाद्य वा, वेशवाटमुपभुज्य वा दुष्कर्माणि सम्पादयामि । निर्गृहघट्टोऽस्मि रजकसारमेय इव । अपरतश्चेमौ दम्पती ययोः पार्श्वे कम्बल-क्रयमितमपि धनं नास्ति । सर्वथा धिङ् मां नृशंसमसाम्प्रत-कारिणम् ।

(अकस्मादेव शिशुः प्रबुध्य रोदिति)

पुरुषकण्ठ : दृष्टं त्वयाऽऽत्मप्रणयफलम् । शैत्यपीडितो दारकोऽत्रबुद्धः ?

नारीकण्ठ: न शैत्यपीडितः । मया सम्यगाच्छादितः ।

पुरुषकण्ठ : तत्कथं रोदिति ?

नारीकण्ठ : (विवशतामनुभवति)

कथं कारणमन्विष्यसि ?शान्तो भविष्यति । शिशवस्तु सुलभरोदना भवन्त्येव ।

पुरुषकण्ठ : (सदैन्यम्)

देवि ! सर्वं जानामि । कस्माद् गोपायसि ? मन्ये क्षुत्क्षामकण्ठो-ऽयं रोदिति ! किं करिष्यसीदानीम् ? हा दैव !

अर्चवितयवा रुषं गिरति कोपना पेषिणी
उपायधृतमत्कुणा हसति दारुणं मञ्चिका ।
बिभर्ति भयमाकुला निहतमूसला कण्डिनी
गृहे क्षपितवैभवे किमिव मामकं संकटम् ॥७

दन्दशूक : (अश्रूणिपातयन् आत्मगतम्)

बन्धो ! अलं दैन्यनिवेदनेन ! धनकुबेराणामीश्वरः सर्वं शृणोति ! दरिद्राणां नारायणस्तु नेत्रान्धः कर्णबधिरः पादखञ्जः हृदय-पाषाणश्च । तत्तादृशोऽक्षमस्य सर्वविधासमर्थस्येश्वरस्य समक्षं किमेवं वृथा प्रलपसि ?

इदानीं प्रबुद्धोऽस्मि! इदानीं विदितोऽस्मि । हृदयान्धकारो मे व्यपगतः । प्रकाशोज्ज्वलत्यं स्फारीभवति साम्प्रतम् । तद्बन्धो ! स्वसामर्थ्येण धनान्युपार्ज्य ते दारिद्र्यमपहरिष्यामि । इतः नात्मार्थमपितु त्वदर्थमेव धनोपार्जनं करिष्ये ।

(चीत्कुर्वन्तं दारकं बहुशो लालयन्ती नारी तन्मुखे स्वपयोधरं योजयति)

नारीकण्ठ : तूष्णीमुपगच्छ मम दारक ! अलमलं रोदनेन । पिब दारक ! दुग्धं पिब ।

(चुम्बनध्वनिं प्रकटयन्ती)

च्चु च्चु च्चु....। मम राजा ! मम चन्द्रः ! मम नेत्रतारकः । मा रुदिहि दारक !

(शिशुः यथाकथञ्चित् तूष्णीमेत्य स्तनं पिबति)

पुरुषकण्ठ : भाग्यवति ! इदानीं यथा सुखं स्वपितु तथा प्रयतितव्यम् । शिशु-निद्राया वृद्धरसनायाः वा किं खलु प्रमाणम् ? गृहाण, निखिल-मेव पलालास्तरणं योजय ।

नारीकण्ठ : (साभ्यर्थनम्)

भोः किमेवं साहसमनुतिष्ठसि ? दारकस्येदृशी चिन्ता ? न चात्मनः ? निशीथे नापगते क्व यास्यसि ?

पुरुषकण्ठ : देवि ! अलं चिन्तया ! भक्ष्याभावे मृतापि धेनुरुपकरोति । तद्भक्षणावशिष्टं बाहुपरिधिपरिमितं पलालमद्यापि गृहकोणे राराज्यते । तत्रैव गत्वाऽऽत्मप्रबन्धं विधास्ये ।

नारीकण्ठ : स्वामिन् ! यद्येवं तर्हि पलालभारमत्रैवानय । मत्पार्श्वमेव स्वपिहि । एकाकिनी खलु भयमनुभवामि ।

पुरुषकण्ठ : (मधुरं प्रहसन्)

विभेषि ? कस्माद् विभेषि ?

नारीकण्ठ : चौरात् !

पुरुषकण्ठ : (साट्टहासम्)

कीदृशी मुग्धासि ! निहतमतिके ! चौराः खलु दरिद्रगृहे किं करिष्यन्ति ? किन्तव दारिद्र्यं सन्द्रष्टुकामाः समेष्यन्ति ? सर्वथा वीतचिन्ता भव । पलालं संगृह्यात्रैवागच्छामि ।

(इति गृहकोणाभिमुखं गच्छति)

दन्दशूक : भगिनि ! सत्यमेव चौरस्त्वद्गृहं प्रविष्टः । परन्तु न भेतव्यम् ! इदानीं तव सोदरोऽस्मि जातः । एष दन्दशूकः शापितस्तव शीर्षेण यदितःप्रभृति दस्युवृत्त्या न जीविष्यामि । श्व एव प्रात-रेत्य सम्बन्धं विधाय सोदरीभूय च त्वद्दारिद्र्यं छेत्स्यामि ।

(कटिप्रदेशे आबद्धां दीनारसम्पुटिकां शिथिलीकृत्य)

एष ते सोदरः शिशोर्मातुलस्त्वत्पत्युश्च श्यालको दन्दशूकः भ्रातृ-चितदक्षिणया स्नेहसमुद्राचारं पालयति ।

(इति दीनारपुटिकां कवाटावकाशेनाभ्यन्तरं पुरस्सारयति)

भगिनि ! गच्छत्येष सोदरस्तेऽनभिज्ञातः । सर्वथा कुशलिनी भव ।

(अविरलाश्रुक्लिन्ने नयने पटाञ्चलेन सारयन् यथागतं शनैरपक्रामति)

॥ जवनिकापातः ॥

●

स्वप्नाज्जागरणं वरम् !

(प्रतीकाश्रितमेकाङ्किरूपकम्)

पात्रपरिचय :

सूत्रधार :	(कथापरिचायक:)
बलाका	(सुभगम्मन्या कापि विश्वविद्यालयप्राध्यापिका)
जननी	(बलाकाजननी)
स्वप्नर्षि :	(गुभैषी कश्चिदाचार्य:)
आदिमाक्	(पञ्चविंशतिवर्षदेशीय: कोऽपि देवपुरुष:)
नमोवाक :	(द्वात्रिंशद्वर्षदेशीय: कोऽपि देवपुरुष:)
परिपाक :	(चत्वारिंशद्वर्षदेशीय: कोऽपि देवपुरुष:)
विपाक :	(पञ्चाशद्वर्षदेशीय: कोऽपि देवपुरुष:)
कुम्भीपाक :	(षष्टिवर्षदेशीय: कोऽपि देवपुरुष:)

कथासार

विश्वविद्यालय की नवनियुक्त अध्यापिकाओं के अधकचरे ज्ञान तथा उनके अन्य सद्गुणों पर केन्द्रित यह एक प्रतीकात्मक व्यङ्ग्य एकाङ्की है, जो सम्भवतः उन्हें नहीं रुचेगा। परन्तु लोकधर्मिता का पक्षपाती रचनाकार बाध्य है इसे लिखने के लिये ! प्रत्यक्ष के लिये प्रमाण की अपेक्षा नहीं होती !

बलाका एक ऐसी ही रूपगर्विता प्राध्यापिका है। आदिभाक, नमोवाक परिपाक, विपाक तथा कुम्भीपाक ये पाँच प्रतीक पुरुष हैं जिन्हें माध्यम बना कर बलाका की सम्पूर्ण अध्यापनावधि के उत्तरोत्तर पतनोन्मुख कालखण्डों की अनुभव- संवेद्य मीमांसा प्रस्तुत की गई है

फिलहाल यह व्यङ्ग्यरूपक किसी विशिष्ट व्यक्ति या विश्वविद्यालय के लिये नहीं है।

स्वप्नाज्जागरणं वरम्

(प्रतीकाश्रितम् एकाङ्किरूपकम्)

निशि निशि नवैश्चित्रैश्चित्तं विमोह्य धृतभ्रमं
पथि पथि चिदाकाशे यो वै विरोहयति ध्रुवम् ।
उदयशिखरिस्कन्धे रूढे रवौ कृतविश्रमो
जयति नितरां स्वप्नप्रख्यः स कोऽपि नवेश्वरः ॥१

अपि च,

चञ्चज्जागरनिर्विशेषममलं दुःखं यदीयं सुखं
बोधान्तं सुखयत्यमोघनिलयं क्लिश्नाति वाऽनारतम् ।
चित्तं सारयति स्मृतिव्यतिकरैराह्लादरम्यैः फलैः
नेष्टोऽपि प्रथते समष्टिसुरुचिः स्वप्नाय तस्मै नमः ॥२

(नान्द्यन्ते ततः प्रविशति गृहीतपुष्पाञ्जलिः सूत्रधारः)

सूत्रधार : प्रयागविश्वविद्यालयशताब्दीसमारोहे समुपस्थिता अयि भोः नाट्यप्रयोगदर्शनलालसाः सहृदयाः ! अद्याहं समाज्ञप्तोऽस्मि रङ्गवेलानाट्यसंस्थाध्यक्षवर्यैरभिराजराजेन्द्रमिश्रमहाभागैः सर्वथा नूतनरूपकं किमपि प्रयोक्तुम् । तत्प्रस्तूयतेऽस्माभिरद्य स्वप्नाज्जागरणं वरमित्यभिधेयं नूतनमेकाङ्कम् । कर्त्ताऽरोऽस्य लघुनाट्यस्यास्माकं संस्थाध्यक्षमहाभागा एव ।

(नेपथ्ये श्रूयते)

पितरं सच्चिदानन्दं मातरं ज्ञानदेवताम् ।
प्रणमत्येष राजेन्द्रः सोदरं नर्मदेश्वरम् ॥३
मनोवाक्कर्मसम्भिन्नं ख्यातिदृष्ट्याऽधमाधमम् ।
प्रत्यूहपरिहारार्थं वन्देऽभिनवशूद्रकम् ॥४

(सविलासं परिक्रामन्)

श्रुतं भवद्भिः ? आर्याः ! स्वाभिधानोच्चारणसमकालमेव नाट्यकर्त्रा यथाऽऽत्मपरिचयः प्रस्तुतस्तेन स्फुटं प्रतीयते यत्प्रतीका-

वलम्बि नाट्यमिदम्। यतो हि कविः नारायणं सरस्वतीं शङ्करञ्च पितरं मातरं भ्रातरञ्च निगदति। प्रत्यवायभूतं पिशुनञ्चापि प्रणमति कविर्नवीनया पदशय्यया।

भवतु। महत्संकटाद् वारितोऽस्मि। अन्यथा प्राक्तनपरम्परामनुपालयता मयाऽपि नाम कविप्रशंसा प्रस्तोतव्यैवासीत्। तदलमिदानीमन्तरायीभूतेन मया। नाट्यमेव पश्यन्तु भवन्तः।

(परिक्रम्य सनिर्वेशम्)

भोः सहृदयाः! शिष्टजनवसतिं सम्प्राप्ता वयम्। इदमस्ति भवनं बलाकायाः विश्वविद्यालयीयायाः कस्याश्चित् प्राध्यापिकायाः। यौवनप्रासाददेहलीदत्तचरणेयं बाला मुखेन न्यूनं समधिकञ्च पाठयति कटाक्षच्छटाभिः। शिष्यत्वापेक्षया सेवकत्वमस्याः सम्पादयितुं समधिकतरं धृतलालसा वर्तन्तेऽधीतिनश्छात्राः। पश्यन्तु तावत्। प्रातर्दशवादनात् सायं चतुर्वादनं यावत् महता श्रमेण माणवकानध्याप्येदानीं सुखं शेते सरस्वतीसुषमेयम्। यथा हि,

नेत्रे सम्पुटिते कुवेलललिते स्वप्नश्रियं बिभ्रती
विस्तीर्णञ्च कपोलमण्डलमिदं पूर्णेन्दुशोभावहम्।
अव्यक्ताक्षरबन्धुरोऽयमधरो मन्ये सुषुप्तावपि
लोकं शिक्षयति प्रमोहविकलं सौन्दर्यशास्त्रं नवम् ॥५

तत् निभालयन्तु भवन्तः किमियं भणति!

(इति नाट्येन अपसर्पति। बलाकोत्स्वप्नायते)

बलाका (स्वप्नेऽध्यापनमभिनयन्ती)

प्रकृतमनुसरामस्तावत्। कादयो मावसानाः स्पर्शाः। ककार आदौ मकारश्चावसाने येषां ते वर्णाः स्पर्शसंज्ञामर्हन्ति। एतदुक्तं भवति यत् करग्रहणे चायपाने ताम्बूलभक्षणे पुस्तकादानप्रदाने मुखचुम्बने च स्पर्शो भवत्येव। छात्राः! अवगतः सूत्रार्थो न वा?
(श्रुतिमभिनीय)

किमाह? नेयं व्याख्या वरदराजाचार्यलिखिते व्याकरणे वरीवर्ति?

तर्हि किमनेन ? नव्यव्याकरणमिदम् । स्वप्रतिभयाऽभिनवां व्याख्यां प्रस्तौमि ।

स्वप्नर्षिः (अकस्मात् प्रविश्य)

बलाके ! किं पाठयसि ?

बलाका (ससम्भ्रमम्)

अये! उपाध्यायः समागतः? गुरुवर्य ! बलाका प्रणमति सादरम् ।

स्वप्नर्षिः भद्रे ! चिरञ्जीव । कथय, किं पाठयसि ?

बलाका (सोद्वेगम्)

गुरुवर्य ! किं वदानि! अद्यतनाश्छात्रा गोमयबुद्धय एव । अवगमिता अपि नावगच्छन्ति किञ्चित् । क्षेत्रपुरुषा इव निश्चलास्तिष्ठन्ति कक्षायाम् । केवलं मम मुखं पश्यन्ति ।

स्वप्नर्षिः (स्मेराननः सन्)

भद्रे ! कथं न पश्यन्तु वराकाः! क्षीरधवला चन्द्रिका सजलो जलधरः प्रभिन्नकुवलययुगलम् प्रमत्ता रोदरपटली बन्धूककुसुमम् परिस्फुटदाडिमबीजानि शुकशावकानुकृतिः—हन्त भोः एकस्मिन्नेव तवानने किं किं न राराज्यते ? श्रमं विनैव सर्वमेकत्रोपलभ्यते ।

बलाका (लज्जामनुभूय)

उपाध्याय ! जानामि भवतां सौहार्दम् । प्रकृत्यैव नर्मपेशलो भवान् । सामान्यवार्तालापेऽपि भवतां लोकोत्तरवर्णनानिपुणं काव्यं प्रभवति ।

स्वप्नर्षिः बलाके ! नाहं रूपसौन्दर्यप्रशस्तिचारणः । युगप्रवृत्तिं विज्ञायैव मया प्रस्तुतं वाचिकम् ।

बलाका भवतु । युक्तमाह गुरुवर्यः ।

स्वप्नर्षिः बलाके ! मन्येऽध्यापनकर्मणि महती रुचिस्ते । कं विशेषमत्र पश्यसि त्वम् ?

बलाका आचार्य ! प्राख्यातोपाध्यायः सन्नपि भवान् विशेषं पृच्छतीति भवदभिप्रायं नावैमि ।

स्वप्नर्षिः भद्रे ! अलमन्यथोत्प्रेक्ष्य । नारीजीवनस्य सार्थकतोद्वाह एवे- तिमानिना मयानुरुद्धासि । पुरुषे लवलीवलयकोमलत्वमिव नार्या-

मपि चण्डपाण्डित्यं न शोभते। नार्याः शोभा गृहदेहलीपरिमिते प्राङ्गण एव।

बलाका आचार्य ! कीदृशमद्य भणति भवान् ? नारीस्वातन्त्र्ययुगमिदम् !

स्वप्नर्षिः भद्रे ! साधु निगदसि। परन्तु युवती नारी प्राध्यापिका वा स्यात् आयकराधिकारिणी वा, राजनेत्री वा सर्वत्रापि सा स्वयौवनमूल्येन स्वरूपसौन्दर्यमूल्येनैव वाऽभिज्ञायते।

बलाका आचार्य ! पुरुषगुणपक्षपाती भवान्। पूर्वमीदृशो नासीत्। कोऽयं नूतनो व्यामोहः समजनि ?

स्वप्नर्षिः भद्रे ! स्वानुभवः सर्वं शिक्षयति। नैके भ्रमा मे तर्कं विनैव व्यपगताः। नारीविषयेऽपि ममायमेवानुभवः।

बलाका किं दायित्वं निर्वोढुं नार्यक्षमा ? किं नारी पुरुषं तुलयितुं न समर्था ?

स्वप्नर्षिः बलाके। ममाभिप्रायं न गृह्णासि ! नारी सर्वगुणमण्डिता सर्वकलापण्डिता। तथापि रूपसौन्दर्यमेव तस्या अभिज्ञानम्। पञ्चशरनाट्यव्यतिकररंगायमाणं तस्या जीवनमिति मन्मतम्।

बलाका (आत्मगतम्)

सम्यगाह आचार्यः। सम्प्रति कां वाचोयुक्तिमाश्रयानि ?

(प्रकाशम्)

आचार्य ! स्ववाचिके भवान् किं सत्यं पश्यति ?

स्वप्नर्षिः बलाके ! त्वयैवोक्तं यन्माणवकास्तवाध्यापनमुपेक्षमाणास्त्वदाननचकोरीभूतास्तिष्ठन्ति। किमिदम् ? किमत्र प्रभवतितरां ते लावण्यमध्यापनं वा ?

अनुदिनं समाचारपत्रेषु पठ्यते। अद्य कापि ग्रामसेविका केनापि खण्डविकासाधिकारिणा धर्षिता। अमुकनगरे अमुकभृत्या स्वगृहस्वामिना पारितोषिकैः प्रलोभ्य समुपभुक्ता !

किमिदं नाम ? पुरुषः कया दृष्ट्या नारीं पश्यति ? किं स्त्रीपुनोत्साहो न क्षमा नार्जवं न कार्यक्षमता न शौर्यं न धैर्यं न सहनशीलता न प्रतिभा न वा विविधदायित्वोद्वहनशक्तिः ? परन्तु मानवस्तस्यां केवलं चित्तप्रमाथि लावण्यं निरीक्षते नान्यत्।

बलाका (सादरम्)

सम्यगाह आचार्यः ।

स्वप्नर्षि : भद्रे ! नाहं पुरुषपक्षपाती । परन्तु निसर्ग एवात्र प्रभवति । यया दृष्ट्या नारायणो लक्ष्मीं भूतभावनः शिवो रुद्राणीं पुरन्दरः शचीं दिवसः सन्ध्यावधूटीमाकाशो वसुन्धरां पश्यति तयैव दृष्ट्या पुरुषोऽपि नारीं पश्यति । आसृष्टेर्युगान्तं यावत् नेयं दृष्टिः परिवर्तयितुं शक्यते । पुरुषः स्वपौरुषेण स्वगुणेन वा महीयते नारी पुनः स्वरूपलावण्येन ।

बलाका (लज्जामनुभूय)

भवतु । स्वपराजयं स्वीकरोमि ।

स्वप्नर्षिः भद्रे ! तव पराजय एव विजयः । यतो हि सौन्दर्यनिधानभूतासि ।

(कवाटताडनध्वनिं निशम्य)

बलाके ! कोऽपि संवृतं कपाटं ताडयति । गच्छ, उद्घाट्य द्वारम् । गच्छाम्यहम् । स्वस्ति भवत्यै !

(अकस्मादेव महानुल्कापिण्ड इव कक्षे पतति । चण्डध्वनिश्च स्फारीभवति । अट्टहासं जनयन् पञ्चविंशतिवर्षदेशीयः कोऽपि सुदर्शनो युवकः प्रकटीभवति ।)

बलाका (उत्थातुं प्रयतमाना साश्चर्यम्)

भोः कोऽसि त्वम् ? अर्गलितेऽपि द्वारे कथमागतोऽसि ? किन्तेऽत्रागमनप्रयोजनम् ?

आदिमाक् (अट्टहासं जनयन्)

हः हः हः हः हः ऽ ऽ ऽ । देवि ! अन्यानपि हरिद्राकन्दलीभूतान् प्रश्नान् युगपदेव पृच्छ तावत् । सर्वं श्रुत्वैव स्वपरिचयं दास्ये ।

बलाका (सोद्वेगम्)

भोः अलमुपहासेन । कथय, कोऽसि त्वम् ?

आदिमाक् देवि ! त्वन्नियतसहचरोऽस्मि । तथापि नाभिजानासि ?

बलाका भोः सुभगम्मन्य ! अलं प्रहेलिकया । स्पष्टं भण, कोऽसि त्वम् ?

आदिमाक् अयि कोपने ! न शोभते रोषस्ते । अहमस्मि ते प्रियवयस्यः ।

संस्कृतज्ञा मामादिभाजं कथयन्ति । आङ्ग्लभाषाविदस्तावत् ऐडहाक् (Adhoc) नाम्ना सम्बोधयन्ति माम् ।

बलाका (सोद्वेगम्)

एवम् ? आदिभाक् भवान् ! भो भद्रपुरुष ! रमणीयस्ते परिचयः । साम्प्रतं ब्रूहि निजागमनप्रयोजनम् ?

आदिभाक् बलाके ! एतन्मात्रमाख्यापयितुं समागतोऽस्मि यत् संवत्सरद्वयमात्रमितमावयोः सख्यम् ।

बलाका (प्रश्नगर्भां दृष्टिं योजयन्ती)

सर्वथा मूढः प्रतिभासि ! किमधरोत्तरं बुक्कसि ? कीदृशमावयोः सख्यम् ? कदा स्थापितं मयेदं सख्यम् ?

आदिभाक् पश्य कोपने ! विश्वविद्यालयप्राध्यापिका कियदेव पूर्वं नियुक्तिं लभेत एकविंशतिवर्षदेशीया तु भवत्येव । एतत्पूर्वं कः खलु एम्० ए० परीक्षामुत्तरति ? भवत्यपि द्वाविंशतितमे वर्षे स्ववयसो नियुक्तिमुपगता । इदानीं त्रयोविंशतिवर्षदेशीयाऽसि । पञ्चविंशतिं यावत् विधाताऽपि त्वां विरोद्धुं न समर्थो भविष्यति ।

बलाका न खल्ववगच्छामि ते कूटव्याहरणम् ।

आदिभाक् (स्मितं जनयन्)

बलाके ! पश्य ! पञ्चविंशतिवर्षाणि यावत् सौन्दर्यं नापक्षीयते । दिग्विजयिनी भवति रमणी । न तावद् वैदुषीबलेन अपितु भुवनविमोहनक्षमेण लावण्यबलेनैव प्राध्यापकपदे नियोज्यते सा ।

बलाका मृषावादोऽयम् । किमहं सौन्दर्यबलेन नियुक्ताऽस्मि ?

आदिभाक् अथ किम् ? सौन्दर्याभिभूतास्ते गुणाः । बलाके ! द्राक्षामधुरं स्मितकमेव तेऽमरुशतकम् । नासाश्रवणमणिबन्धचरणाङ्गुल्यलङ्कारा एव रूपकोत्प्रेक्षाद्यलङ्काराः । त्वया सह सम्पन्नो वार्तालाप एव ब्रह्मानन्दसहोदरभूता रसचर्वणा । तवाङ्गसौष्ठवमेव रीतिसम्प्रदायः । तव सरसवाचिकमेव वक्रोक्तिसम्प्रदायः । तवानुकूल्यमेवौचित्यसम्प्रदायः ! तव (इत्यर्धोक्ते)

बलाका (निर्भरं विहसन्ती)

आदिभाक् ! सत्यमेव सरस्वतीपुत्रोऽसि ! रोचसे त्वं मह्यम् । इदानीं स्वीकरोम्यावयोः सख्यम् ।

आदिभाक् (पदगतिं समाकर्ण्य ससम्भ्रमम्)

बलाके ! यथावसरं पुनरागमिष्यामि । एष ममाग्रजो नमोवाकः समागच्छति ।

(पुनरपि कक्षे सूर्योदय इव जायते । द्वात्रिंशद्वर्षदेशीयः कोऽपि सहृदयः सुरुचिसम्पन्नो जनः परिलक्ष्यते)

नमोवाकः (सस्नेहम्)

देवि ! बलाके ! अहमस्मि आदिभागग्रजो नमोवाकः । पञ्चविंशतेः समारभ्य द्वात्रिंशद्वर्षाणि यावत् त्वत्साहचर्यं निवत्स्यामि ।

बलाका (सासूयम्)

भोः किमिदम् ? न ज्ञानं न वाऽभिज्ञानम् । महाभाग्योऽसि जातः ? कोऽसि त्वम् ?

नमोवाकः बलाके ! किमादिभाजा नाख्यातम् ? दुर्धमुखोऽस्ति वराकः । भद्रे ! 'विश्वविद्यालयेऽध्यापनं कुर्वाणाया रमण्या भाग्यसूत्रधार-भूता वयं पञ्चपाण्डवोपमाः पञ्च भ्रातरः । धातुर्नियोगात् वयं सर्वे पर्यायेण सहचरीभूय नियुक्तेरारभ्य सेवानिवृत्तिं यावत् त्वया सह निवत्स्यामः । आवयोः साहचर्यं सप्तसंवत्सरमितं स्थास्यति । पञ्चविंशतेरनन्तरमहमागमिष्यामि । द्वात्रिंशत्तमं यावत्स्थास्यामि ।

बलाका श्रुतं श्रुतम् । किमर्थमागतं त्वयेति वाच्यम् । किं तवापि वर्तते किञ्चित् नामकरणरहस्यम् ?

नमोवाकः अथ किम् । देवि ! पञ्चविंशतिं समतिक्रामन्ती प्राध्यापिका स्वलोकप्रियतां किञ्चित्विजहाति। यतो हि तावता कालेन म्लायति सिन्दुवारकुसुममञ्जरीविभ्रमा कपोलच्छविः । विकीर्णमौक्तिकनिभा विरलायते धवलदशनपंक्तिः। शुक्तिगर्तायते नयनम् । शर्वरीकालुष्यं खण्डयन्ती उल्कापातलेखेव क्वचित् दृश्यते पलितकेशलेखा ।

बलाका भो दुर्मुख ! निरर्थकमिदं वर्णनम् । किमत्र चित्रम् ? कालः सर्वान् पचतीति ध्रुवम् । नश्वरे शरीरे तूत्तरोत्तरं विकृति-र्जायत एव ।

नमोवाक: देवि ! सत्यमुच्यते भवत्या । अस्मिन्नेव संकटे नमोवाकोऽहं सांयात्रिकीभूय प्राध्यापिकाया भग्नप्रायां जीवनतरणीं वारयामि । एषु सप्तवर्षेषु नमस्कारं प्रणतिं विनम्रतां प्रणामाञ्जलिं कृतकस्मितकं कदाचिदाकूणितं वल्गु कटाक्षं सन्दिग्धस्पर्शादिकञ्चैवावलम्ब्य वराकी प्राध्यापिका स्वलोकप्रियतां संरक्षितुं पारयति ।

बलाका महाशय नमोवाक ! उत्तरचरिते भविष्यति ते प्रयोग: । इदानीं सुखं गच्छ । पञ्चविंशतिवर्षदेशीया सती त्वत्साहाय्यं याचिष्ये ।

नमोवाक: देवि ! अकथितोऽपि यास्याम्येव । यतो हि मम भ्रातरौ परिपाकविपाकौ समभेवागच्छत: । भवतु, नमो भवत्यै ।

बलाका (चण्डध्वनिं दारुणपदगतिमाकर्णयन्ती सभयं सोद्वेगम्)

हे प्रभो ! किं भविष्यतीदानीम् ?

(कलहायमानौ परिपाकविपाकौ प्रविशत:)

परिपाक: प्रागहम् ।

विपाक: भो न त्वम् । प्रागहम् ।

परिपाक: चतुरक्षरं मम नाम । त्र्यक्षरं तावत्तव । अतएव प्रागहम् ।

विपाक: (तर्काभावे स्वपराजयं स्वीकुर्वन्)

भवतु । त्वमेव प्राक् । पश्चादहं वक्ष्यामि ।

परिपाक: भद्रे बलाके ! अहमस्मि परिपाकस्तव तृतीय: सहचर: । अष्टवर्षमितं ममायुष्यम् । द्वात्रिंशत: प्रारभ्य चत्वारिंशतमं यावत् त्वया सह निवत्स्यामि ।

विपाक: देवि ! विपाकोऽहमस्मि । दशवर्षमितं ममायुष्यम् । चत्वारिंशत्त: प्रारभ्य पञ्चाशत्तमं यावत् त्वत्सेवां करिष्ये ।

(बलाका स्तिमितनयनैस्तौ निभालयति)

परिपाक: देवि ! परिपाककाले सर्वेऽपि गुणा दोषायन्ते । केशकुन्तलभार: काशायते । दन्तपंक्तय मलिनायन्ते । पलितवलीपर्याकुलं भवति कपोलमण्डलम् । परिपाककाले प्राध्यापिका स्वासामर्थ्यं प्रत्यक्षमनुभवति । विक्षिप्ततां जनयति तस्या: कटाक्षविक्षेप: । मर्माणि भिनत्ति नर्मवचनम् । अमर्षमेवोत्पादयति कादाचित्कसंस्पर्श: ।

विपाक: ममापि च (इत्यर्धोक्ते)

परिपाकः भोः सहोदर ! सावशेषं मे वचः । कृपया धैर्यमवलम्ब्य मुहूर्तं तिष्ठतु भवान् ।

तद् देवि बलाके ! ईदृशे खलु कालविपर्यये समुपस्थितेऽहमेव ते सहायो भविता । परिपाकोऽहमस्मि । अतएव प्रीतिपरिपाकेन बुद्धिपरिपाकेन गुणपरिपाकेन वा दोषांस्तेऽपहरिष्यामि । पूर्वप्रणयिनस्ते विनष्टभोगाकांक्षाः साम्प्रतं निष्कामसख्यं विधास्यन्ति । यदज्ञानं यदध्यापनस्खलनम् आदिभाक्कालेऽक्षम्यमासीत् तदेव भविष्यति विभूषणमिदानीम् ।

विपाकः देवि ! यथा कर्मविपाकबन्धनवशीकृतः प्राणी जन्ममरणदुःखं सततं सहते तथैव उद्दामयौवनमपि विपाकेन दन्दह्यते । विपाके समागत एव अस्तंगतदन्ततारकं भविष्यति ते वदनगह्वराकाशम् । निर्जलपल्वलनिभे भविष्यतो नयने । निसर्गप्रणयिनोऽपि ते पृथक्स्थायिनो भविष्यन्ति । श्लथा भविष्यति दृष्टिः । विलम्बिबृहज्जरुथा द्रक्ष्यते स्थूलदेहवल्ली । तदाऽहम् (इत्यर्धोक्ते)

बलाका (भयविह्वला सती सनिर्भर्त्सनम्)

तदा त्वं मम पार्श्वे भविष्यसीत्येव तेऽभिप्रायः ? ममाकारणवैरिणः ! निभृतनिभृतं पलायध्वम् । अन्यथा दण्डप्रहारैः शिरांसि युष्माकं रञ्जयिष्यामि ।

(इति भैरवगत्योत्थाय दण्ड गृह्णाति । उभौ पलायेते)

आः दुर्दैव ! सत्यमेव भाविजीवने एतत्सर्वं भविष्यति ? इयमनंगलतिका तनुः पिशाची भविष्यति ? रूपसौन्दर्यं मे नक्ष्यति ? (इति पटाञ्चलेन मुखं पिधाय करुण रोदिति । अकस्मादेव कक्षान्धकारे कापि विकराला दानवाकृतिः साट्टहासं परिलक्ष्यते)

कुम्भीपाकः हः हः हः हः हः ऽऽऽऽ। अहमस्मि कुम्भीपाकः । भोः श्रुतं न वा ? कुम्भीपाकोऽहमस्मि । सेवानिवृत्तिकाले जर्जरे वार्धक्येऽहमेव ते सहचरो भविष्यामि । यदा सुहृद्विहीना पश्चात्तापैकशरणा मृतेव, मूर्च्छितेव विकलेव निखिलान् दिगन्तान् शून्यं मन्यमाना त्वं सर्वजनोपेक्षां सहिष्यसे तदाहं कुम्भीपाकस्तुभ्यं प्राणपाथेयं दास्यामि । हः हः हः हः ऽऽऽऽऽ।

(कुम्भीपाकवशंगमीताऽट्टहासातङ्किता च बलाकाऽकस्मात् चीत्कुर्वाणा प्रबोधमेति)

बलाका (सचीत्कारम्)

अम्ब ! वारय वारय ! नहि नहि, नाहं कुम्भीपाकं ग्रहीष्यामि ।

(इति प्रमत्तेव विलपति । तस्याः क्रन्दनं श्रुत्वा सर्वेऽपि कुटुम्बिनः द्रुतमायान्ति)

जननी वत्से बलाके ! किमभूत् ? दुःस्वप्नः कोऽपि दृष्टः किम् ? कोऽयं दैवहतकः कुम्भीपाकः ?

बलाका (स्वप्नं स्मरन्ती)

अम्ब ! दुःस्वप्न एवासीत् । इदानीमेकाकिनी न स्वप्स्यामि । अम्ब ! त्वदुत्संग एव स्वपिमि । श्रावय कामपि लोककथाम् । हन्त भोः ! स्वप्नाज्जागरणमेव वरम् ।

जननी भवतु । एहि, ममैव पार्श्वे स्वपिहि । श्वो मङ्गलवासरो ऽस्ति । अनिष्टनिवारणं ते कारयिष्यामि । नूनं कस्यापि दृष्टिस्त्वयि निक्षिप्ता । (उभौ शय्यामुपगच्छतः)

॥ जवनिकापातः ॥

पुनर्मेलनम्

(समुत्प्रेरकं शिशुजनैकाङ्कम्)

पात्रपरिचयः

भूपालः	(छात्रः कश्चिद् धनाढ्यपुत्रः)
शोभन :	(भूपालसहपाठी, निर्धनश्छात्रः)
मोहनः	(शोभनस्य मित्रम्)
दीनानाथ :	(अध्यापकः)
रामदीनः मेवालालः }	राजपुरुषौ रक्षिणौ
राजलक्ष्मीः	(कान्वेण्टविद्यालयस्य छात्रा काचित्)

कथासार

भूपाल और शोभन शहर के एक इण्टरकालेज में फाइनल के छात्र हैं। विश्वविद्यालय-अध्यापक डा० लोचन द्विवेदी की कन्या राजलक्ष्मी भी इण्टर फाइनल की छात्र है और पास के ही एक कान्वेण्ट में पढती है। भूपाल प्रतिदिन आवारा लड़कों के साथ राह आती लड़कियों को छेड़ता हैं।

घटनाक्रम के दिन वह अकेली आती राजलक्ष्मी को हेमामालिनी कह कर फब्तियाँ कसता है और उसे तंग करने पर आमादा होता है। शोभन इसका प्रतिरोध करता है। दोनो गुँथ जाते हैं। शरीर से हृष्ट-पुष्ट भूपाल शोभन को जमीन पर गिरा कर पीटने लगता है।

राजलक्ष्मी तमाशा देखते लड़कों को कोसती है। उसकी बातों से प्रभावित ग्यारहवीं कक्षा का एक छात्र मोहन, शोभन को भूपाल के चंगुल से बचाता है। इसी बीच गणित के अध्यापक दीनानाथ आ जाते हैं। मामला संगीन होते देख भूपाल भाग निकलता है। दीनानाथ शोभन को सान्त्वना देते हैं और राजलक्ष्मी को भी!

समय बीतता है। उस घटना के बाद ही शोभन तथा राजलक्ष्मी एक दूसरे के समीप आते हैं। अन्ततः दोनो विवाहसूत्र में भी बँध जाते हैं। शोभन की नियुक्ति थानाध्यक्ष के रूप में हो जाती है उसी क्षेत्र में जहाँ भूपा डाकू का आतंक है। सिपाहियों के बयानो से शोभन को ज्ञात हो जाता है कि भूपा डाकू कोई और नहीं, उसका बचपन का दोस्त भूपाल सिंह ही है।

मुखबिर से ज्ञात होता है कि शाम ६ बजे भूपाडाकू शेखपुर गाँव में डकैती डालने की योजना बना चुका है। उसका गुट कपूरपुर गाँव की बाग में इकट्ठा होगा। शोभन सारी बाग को घेर लेता है। उसके सिपाही बाजरे के खेतो में छिप जाते हैं। वह स्वयं भी सादी वेषभूषा में रास्ते पर खड़ा हो जाता है।

शोभन और भूपाल की भेंट होती है। भूपास के डाकू बनने की मर्मान्तिक कथा सुन शोभन रो देता है। वह भूपाल को आत्म-समर्पण के लिये तैयार कर लेता है और उसे उसकी 'हेमामालिनी' भाभी के पास ले जाता है गर्मागर्म चाय पिलाने के लिये। दोनो मित्रों का पुनर्मिलन आनन्द में बदल जाता है।

●

पुनर्मेलनम्

(समुत्प्रेरकं शिशुजनैकाङ्कम्)

महानगरस्य सुरुचिसम्पन्ने वसतिखण्डे कश्चिन्माध्यमिकविद्यालयः। सर्वतोऽपि जनसम्मर्दः परिलक्ष्यते। विद्यालयप्रवेशद्वारे छात्राणां विशालसमूहो राजते। केचन छात्रा यूथं निर्माय विद्यालयाभिमुखम् आगच्छन्तो दृश्यन्ते। पूर्वमेव समागताः केचन छात्रा मुद्गफलानि चर्वन्ति परस्परं सपरिहासं लपन्ति च।

काश्चन बालिका विद्यालयपरिधानं परिधाय विद्यालयसमक्षवर्तिराजमार्गेण पूर्वदिशमभिवर्तन्ते। अविदूर एव वर्तते कान्वेण्टपद्धत्या प्रवर्तमानः कश्चिद् बालिकाविद्यालयः। केचन दुर्वृत्ताछात्राः पथि गच्छन्तीनां छात्राणां वेशभूषां गतिमुद्रां वा सङ्केत्य ताः परिहसन्ति।

तन्वी सौन्दर्यवती च कापि शीलवती कन्या एकाकिन्येव गच्छन्ती दृश्यते। आभिजात्यं तद्भावभावाभ्यां साधु प्रकाशते। विद्यालयस्यैक उद्धतश्छात्रस्तां प्रतीक्षते विद्यालयद्वारसमुपेयुषीम्।

भूपालः आगच्छति बन्धवः आगच्छति। एषा हेमामालिनी आगच्छति। (कन्या दूरत एव शृणोति वाक्यं तथापि न वक्ति किञ्चित्) तदलं विलम्बेन। विद्यालयछात्राः कृपया पङ्क्तिबद्धाः 'सैल्यूटं' निवेदयितुं बद्धपरिकरा भवन्तु।

(केचन षण्डछात्रास्तद्वचसा प्रेरिताश्चङ्क्रमणं प्रस्तुवन्ति)

शोभनः (सवेगं पार्श्वमागत्य)

भूपाल! किमिदम्? बन्धो! कुटिलाचारस्यापि कश्चिदवसरो भवति। नेदमत्र युज्यते।

भूपालः मुसलमृगाङ्क! कुतस्त्वं मध्यमापतितोऽसि? अतोऽपि रम्यतरोऽवसरः कोऽ भवितुमर्हति?

शोभनः अभिजातकन्यामेकां मध्येमार्गमेवमाविलयितुं न लज्जसे ?

भूपालः (सोपहासम्)

भोः प्रोफेसर ! माऽधिकं टिप्टिपायस्व । नेयं कक्षाया मानीटरी । गच्छ, खट्वाकीट इव गृहकोणे कस्मिंश्चिन्निलीय ग्रन्थवाक्यानि रट । चर्व वा शब्दचणकानि ।

(स्वमित्रगणाभिमुखी भूय)

अलम्भोः । बन्धवः हेमामालिनी समक्षमेवागतप्राया परिलक्ष्यते । अद्य त्वस्याश्चन्दनायितं वदनं चञ्चलं नयनयुगलं साधु द्रष्टव्यमेव । सौभाग्यवशादेवाद्य हरिणी गच्छत्येकाकिनी ।

शोभनः (सप्रतिरोधम्)

भूपाल ! मयि वर्तमाने ईदृशं घृणित्तं व्यवहर्तुं न शक्नोषि त्वम् । कलङ्कयसि पुनरस्य विद्यालयस्य समुज्ज्वलां कीर्तिम् ।

भूपालः (सोल्लुण्ठम्)

भद्र शोभन ! दरिद्रसन्ततिरसि । चिन्तय तावद्रोटिकां द्विदलञ्च । नागरजनानामभिरुचिं त्वं नावगमिष्यसि । गच्छ, वत्स ! यथासुखं गच्छ ।

शोभनः साधु साधु ! सम्यगुच्यते त्वया । दरिद्रसन्ततिरेवास्मि । मद्रोटिकाद्विदलप्रबन्धस्तु निर्विघ्नं सम्पाद्यते । पश्यामि पुनस्तव धनकुबेरत्वमपि ! वर्धस्व ! अद्भुतं सद्व्यसनमधिगतं भूपालचरणेन ? परन्तु भद्र ! यामवमन्तुमिच्छसि सा खलु त्वज्जन्मदातारमपि क्रेतुं शक्नोति ।

भूपालः (सक्रोधम्)

अपेहि । निरर्गलं वुक्किष्यसि चेन्निखिलमपि शोभनत्वं ते पृथक्करिष्यामि । श्यालक ! हाईस्कूलकक्षायां प्रान्ते प्रथमस्थानं सम्प्राप्यैव गर्वितोऽसि ? अवनौ पदानि विषमीभवन्ति ? ब्राह्मणाधम ! पाटच्चर ! भिक्षुक ??

शोभनः भूपाल ! जिह्वां संयम्य वार्तां प्रवर्तय अन्यथा........।

भूपालः (किञ्चिदग्रेसरीभूय)

अन्यथा किं करिष्यसि ?

शोभनः तदेव करिष्यामि यन्नाभिरुचितं नाभिप्रेतन्ते ।

भूपालः तिष्ठ तावत् । निमेषद्वयानन्तरमेव पश्यामि ते पराक्रमम् ।

(कन्या विद्यालयद्वारमुपतिष्ठते । भूपालो लघुलोष्टमेकं हस्तेनोत्थाप्य छात्रां लक्ष्यीकरोति)

शोभनः (सझम्पं सबलात्कारं लोष्टमागृह्णन्)

प्राक् भणितं मया यन्मय्युपस्थिते न धाष्ट्यमाचरितुं शक्नोषि । परन्तु भूपाल ! समधिकतरं नीचोऽसि, निर्मर्यादोऽसि निर्लज्जोऽसि । यदीयमेव बाला तव भगिन्यभविष्यत् केनचिल्लम्पटेन लोष्टं प्रक्षिप्य दुर्व्यवहृता चाभविष्यत्तर्हि किमभविष्यत्त्वत्कृते ?

भूपालः (अपमानममर्षञ्चानुभवन्)

श्यालक ! खसूचिन् ! एष कथयामि स्वानुभूतिम् ।

(पादहस्तप्रहारैश्शोभनमाहन्तुं प्रवर्तते । शोभनोऽपि ससाहसं द्वन्द्वमभियुज्यते । द्वावपि परस्परं संघटयतः । बालिका साहसं प्रदर्शयन्ती तत्रैव स्थिता भवति)

राजलक्ष्मीः (पार्श्वस्थबालकान् सम्बोध्य)

अये ! यूयं सर्वे तिष्ठन्तश्चर्चरीं निभालयथ ? कथं न द्वावपि पृथक्कुरुथ ?

(बालकाः किंकर्तव्यविमूढास्तिष्ठन्ति)

साधु । अवगतम्मया । युष्माकं यूथपतिर्नासीरे युध्यति इतिकृत्वैव यूयं क्लीबाः जाताः ? किमयं षण्डश्छात्र आजीवनं युष्मान् चायविस्कुटादीनि भोजयिष्यति ? किमयं युष्मभ्यमाजीविकां वृत्तिं वा दास्यति ? युष्मद्बुभुक्षुभगिन्यै नग्नसोदराय चापि किञ्चिदशनजातं प्रदास्यति ? अयि भोः कथमेतावन्न चिन्त्यते युष्माभिर्यत् स्वकदाचारे लम्पटतायां वा सम्प्राप्तं युष्मत्साहाय्यमात्रं पुरस्कर्तुकामोऽयं श्रेष्ठिपुत्रः द्वित्राणि रुप्यकाणि युष्मत्कृते व्ययीकरोति !

(छागमेकमासाद्य)

भवतु नाम । त्वमेव ब्रूहि । किं शोभनेन कदापि तवापमानो विहितः ?

बालकः (सदैन्यम्)

न खलु ।असौ तु सर्वेषु अतितरां स्निह्यति ।

राजलक्ष्मीः यदि शोभनोऽपि धनाढ्योऽभविष्यत्तर्हि युष्मत्कृते किं सोऽपि व्ययं नाकरिष्यत् । किमसौ कृपणोऽस्ति ?

बालकः नहि नहि । निर्धनः सन्नपि शोभनो विशालहृदयोऽस्ति । छात्रवृत्तिसम्प्राप्त्यवसरे तेन समग्रसहपाठिभ्यः टॉफी विभक्तासीत् ।

राजलक्ष्मीः बन्धो ! एक एवापरः प्रश्नः क्रियते । निखिलेऽप्युत्तरप्रदेशराज्ये विद्यालयस्यास्य कीर्तिः शोभनमुखेन चकास्ति भूपालमुखेन वा ?

(बालकः प्रश्नस्य गूढाभिप्रायमविजानन्निव साश्चर्यं पश्यन् तिष्ठति)

पश्य भ्रातः ! अहमिव त्वमपि इण्टरकक्षाया उत्तरार्धे भविष्यसि प्रथमार्धे वा । सर्वथा त्वं मम सोदरोऽसि । अहमस्मि त्वद्भगिनीसदृशी । राजलक्ष्मीर्ममाभिधानम् । एतावन्मात्रमपि ममानुनयं किं नाङ्गीकरिष्यसि ? भ्रातः ! वारय शोभनम् !

बालकः (राजलक्ष्मीवचनेन प्रभावितस्सन् सलज्जम्)

भगिनि ! सत्यमेव महनीयकुलोत्पन्नास्ति भवती । परमभिजातास्ति भवती । मम चक्षुषी भवत्योन्मीलिते । भवतु, तिष्ठन्तु तावत् भवत्यः ।

(सम्भ्रमप्रसरीभूय भूपालं दृढमागृह्य विघटयितुं प्रयतते)

भूपालः मोहन ! मुञ्च माम् । श्यालकमद्यात्रलेहं विधास्ये । मान्यतरोऽयं (मानीटर) भवति कक्षायाः !

(सदीर्घनिःश्वासम्)

लुञ्चितोऽयमिव दशद्वादशमिता बालकास्तु मम गृहे कर्मकरा वर्तन्ते । अस्य पिताऽपि ममैव गृहे पूजापाठं कृत्वा दक्षिणां संहरति।

बालकः (सनिर्भर्त्सनम्)

भूपाल ! चैतन्यमेहि । यावत्कृतं त्वया तावदेव प्राज्यम् । यदि नामेदानीं किञ्चिदप्यधरोत्तरं प्रलपिष्यसि तर्हि ध्रुवमेव भग्नमुखीकरिष्यसे ?

भूपालः (साश्चर्यम्)

लालाटिक ! किमिदं ते जातम् ? कीदृशमिदं विसंवदसि ?

बालकः भो उक्तम्मया यत् किञ्चिदप्यधरोत्तरं प्रलपिष्यसि तर्हि........ ।

भूपालः तूष्णीं भज जारजातक ! यस्मिन्नेव पात्रे भोजनं । तस्मिन्नेव छेदनम् ?

बालकः (दंष्ट्रोपरि दुस्सहं मुष्टिप्रहारं कुर्वन्)

निभालय वत्सक ! पात्रच्छिद्रं पिदधाम्येषः । गच्छेदानीम् । कमपि दन्तचिकित्सकं याचस्व ।

(भूपालोऽसह्यदंष्ट्राघातवेदनां नाटयन् भूमावुपविशति)

भूपालः (उत्थाय)

भवतु वत्सक ! त्वामपि द्रक्ष्यामि । कन्यया कयाचिन्मनाङ्मन्त्रित एव द्रवीभूतोऽसि ?

बालकः सम्यगभिधेहि भूपाल ! अन्यथाऽपरामपि दंष्ट्रां विघटयिष्यामि । नेयं कन्या कापि । अद्यप्रभृति मम ज्येष्ठा भगिनी सञ्जाता ।

भूपालः याहि याहि । त्वादृशाः पञ्चाशल्लालाटिकाः प्राप्स्यन्ते । रक्ष स्वकीयां ज्येष्ठभगिनीम् । हुं विजयतामार्या विजयताञ्च सहोदरः !

बालकः बन्धवः ! श्रुतं युष्माभिः ? किं वक्कतीयं राजपुत्रः ? यूयं जानीथ यन्ममैव बलेन भूपालोऽयं प्रमाद्यतिस्म । अनेन कियन्त्येव निन्द्यकार्याणि मत्तः कारितानि ! तस्मिन् दिने नेत्रान्धयाचकस्य यष्टिकामाकुञ्च्य तं वराकं शातितवान् । ह्यश्च संस्कृताध्यापकस्य गुरुवर्यस्य कक्षां समुत्सारितवान् । तदापि मयाऽवबोधितम् । दृष्टं तावत् ? अद्यतनं वृत्तं तु प्रत्यक्षमेव वर्तते । बन्धवः आर्या राजलक्ष्मीः कियदृजुकाऽभि-

जात्यसम्पन्ना च वर्तते । तस्या मंत्रितानि तु युष्माभिरपि श्रुतान्येव ? सम्प्रत्ययं कथयति यत् युष्मादृशाः पञ्चाशन्मितास्तेनोपलप्स्यन्ते । ब्रूत भोः किमस्य लालाटिका यूयम् ?

एकः स्वरः लालाटिकोऽस्त्यस्य दुश्चरित्रस्तातः ।

द्वितीय. स्वरः निर्धनानां रुधिराणि शोषं शोषं येनाट्टालिकोत्थापिता ।

तृतीयः स्वरः लालाटिकवादिनं खञ्जीकरिष्यामो वयम् ।

चतुर्थः स्वरः म्रियतां म्रियतां भूपालः । विजयतां विजयतां शोभनः । विजयतां विजयतां मोहनः । विजयतां विजयतामार्या राजलक्ष्मीः ।

(नेपथ्ये जयजीवशब्दावृत्तिः श्रूयते । अकस्मादेव वणिताध्यापको दीनानाथ आगच्छन् संदृश्यते)

एकः स्वरः पलायध्वं पलायध्वम् । हिटलरगुरुः समागतः । गृहीते सति व्याधुन्वन् तुषीकरिष्यति ।

(सर्वे छात्रा भर्भरायमाणाः पलायन्ते । दीनानाथः प्रवेशद्वारमासाद्य तिष्ठति । शोभनस्य दुःस्थितिमाकलयन्)

दीनानाथः वत्स शोभन ! किन्तेऽभूत् ? इयं धूलिः कर्दमश्चायम् ? अये ? त्वद्वामजानुकृत्तिरपि निष्कुषिता ? किमेतत्सर्वम् ?

(शोभनस्तूष्णीं भजते)

मोहन ! त्वमेव ब्रूहि । किं केनापि मारितम् ?

मोहनः (निष्ठीवं निगिरन्)

गुरुवर्य । एवमेतत् । भूपालश्शोभनं भूमौ निपात्य ताडितवान् ।

(भूपालो घटनां प्रभवन्तीं दृष्ट्वैव द्रुतं पलायते)

दीनानाथः (साक्रोशं श्रावयन्)

तिष्ठ भूपाल ! तिष्ठ । तिष्ठान्यथा परावृत्ते सति सम्यक् प्राघुणोचितम् उपचारं करिष्ये ।

भूपालः (पलायमान एव)

गुरुदेव ! न गङ्गदत्तः पुनरेति कूपम् ।

दीनानाथः (शोभनस्य स्कन्धोपरि हस्तं विन्यस्य)

शोभन ! कथमयं दुर्वृत्तस्त्वयि परिलग्नः ? ब्रूहि तावत् ?

(शोभनो राजलक्ष्मीमाविलयितुं नेच्छति)

राजलक्ष्मीः गुरुवर्य ! एषाऽहं कथयामि । राजलक्ष्मीरहमस्मि डॉक्टरलोचनद्विवेदिनां तनुजा । कान्वेण्टविद्यालयेऽध्येमि इण्टरकक्षोत्तरार्धे । पलायितोऽयं दुष्टच्छात्रः प्रतिदिनं मां दृष्ट्वा दुर्वचनैस्समभाजयन्नासीत् । अद्य पुनः दौर्भाग्यवशादहमेकाकिन्यासम् । तस्माद्धाष्ट्र्यमस्य पराकाष्ठामुपगतम् ।

मोहनः गुरुदेव ! भ्रात्रा शोभनेन बहुशो निरुद्धो भूपालस्तथाप्यसौ आर्यां राजलक्ष्मीं खलीकर्तुं लोष्टाघातं कर्तुमियेष । इदमेवाभूत्संघर्षकारणम् ।

दीनानाथः (शोभनस्य शीर्षं सारयन्)

अलं सन्तप्य वत्सक ! शरीरसम्पत्त्या त्वं भूपालादून एवासीः । तथापि प्रशंसनीयं तवात्मबलम् । सत्कार्यनिमित्तं त्वया संघर्षः कृतः । विद्यालयस्य प्रतिष्ठा संरक्षिता । एहि, त्वां प्राचार्यसमीपमुपनयामि । वत्से राजलक्ष्मि ! डॉक्टरलोचनस्तु मम सहपाठी । भाग्यवशादसौ विश्वविद्यालयमलंकरोति विद्यालयं पुनरहम् । मम नमस्कारस्तस्मै निवेदनीयस्त्वया ।

राजलक्ष्मीः बाढम् । पितृव्यचरण ! गच्छाम्यहम् । शोभनं मोहनञ्च समानीय कदाचिद् गृहमागच्छन्तु भवन्तः ।

(ग्रीवाभंगाभिरामं शोभनं मुहुः पश्यन्ती प्रतिष्ठते । दीनानाथोऽपि सशोभनो विद्यालयं प्रविशति)

॥ जवनिकापातः ॥

●

।। द्वितीयं दृश्यम् ।।

राजमार्गसमीपस्थितमेकमारक्ष्यधिष्ठानम् । पार्श्ववर्तिमिष्टान्नविक्रेतॄणां गान्धिकानां श्रेष्ठिनाञ्च आपणाः सन्दृश्यन्ते । अविदूर एव सघनवसतिकः कश्चिद् ग्रामोऽपि परिलक्ष्यते ।

रक्ष्यधिष्ठाने रक्षिणः सावधानं पर्यटन्तो दृश्यन्ते । अधिष्ठानाधिकृत् कश्चित् पञ्चविंशतिवर्षदेशीयो नवयुवको वर्तते । स रक्षिद्वयेन सह वार्तामग्नो ऽस्ति । रक्षिणोरेको रामदीनोऽपरश्च मेवालालोऽस्ति । अधिष्ठानकृच्च शोभनशुक्लनामधेयः ।

रामदीनः श्रीमन् ! अमोघं वर्तते लक्ष्यं तस्य माणवकस्य । शब्दवेधिनीं गुलिकां सन्धत्ते ।

मेवालालः स्वामिन् ! नियमधर्मयोश्च महान् पालको वर्तते । दस्युवृत्त्याऽवश्यं जीवति परन्तु प्रमादवशादपि निर्धनान् न शातयति न वा वधूजनं दुहितरं वा कुदृष्ट्याऽवलोकते ।

शोभनः (साश्चर्यम्)

अहो चित्रमेतत् ! कर्म दस्यूनां चरित्रञ्च महात्मनाम् ? रामदीन ! कदाचिदभ्यर्णचरीभूय तं दृष्टवानसि ?

रामदीनः (सोत्साहम्)

बाढम् बाढम् ! भवत्पूर्ववर्ती अधिष्ठानाधिकृत् सक्सेनामहोदयोऽपि इमं दस्युदारकं दृढं मार्गयामास । एकदा तु मुखवीरात् स्थितिमस्य विज्ञाय सक्सेनामहोदयो भूपादस्युं दोनईघट्टं निकषा वने परितो रुणद्धिस्म । तस्मिन् दस्युग्रहाभियानेऽहमप्यासम् ।

शोभनः किं घटितं तदा ?

रामदीनः वृत्तमिदं स्वामिन् यत् भूपादस्युस्तेनैव मार्गेण स्यन्दिकां नदीमुत्तर्तुमागतवान् । परन्तु स चतुश्चतुर्मितानां पञ्च यूथानि विनिर्माय समागतः पञ्चमार्गैश्च घट्टाभिमुखमग्रेसरीबभूव ।

शोभनः हन्त भोः ! पटुत्वं त्वस्य सुल्तानाख्यं दस्युराजमनुहरति !

रामदीनः श्रीमद्भिरपि किमुच्यते ? क्व दस्युराजः सुल्तानः क्व चायं दुग्ध-

मुखो माणवकः? स्वामिन्! भूपादस्युस्त्वतीवसुन्दरो वर्तते। सर्वथा राजकुमारः प्रतीयते। न जाने कथं पदानि तस्य निषद्वरमग्नानि जातानि ?

मेवालालः (अग्रसरीभूय)

स्वामिन्! अहं निवेदयामि! भूपादस्युरयं सत्यमेव राजकुमारः। पिता चास्य बाबूसुकुमारसिंह आंग्लशासनकाले द्विचत्वारिंशन्मितानां ग्रामाणां भूमिपतिरासीत्। विमातुर्वैमात्रिकाणाञ्चात्याचारैः सम्पीडितोऽयमुत्पतिष्णुर्युवको दुर्वृत्तिमिमामुपगतः।

शोभनः (अकस्मादेव विद्यालयघटनां संस्मरन्)

मेवालाल! अपि नाम भूपा किञ्चित् शिक्षितोऽपि ?

मेवालालः स्वामिन्! दशमकक्षोत्तीर्णः खलु। इण्टरकक्षामुत्तीर्णो न वेति साधु न जाने। सक्सेनामहोदयोऽकथयत् यत् कस्मिंश्चित् कन्यकाप्रसंगे संघर्षं सन्धाय पलायितवान्। विद्यालयं पुनर्नंगतवान्।

(शोभनस्य नयनद्वयमश्रुक्लिन्नं परिलक्ष्यते। स करप्रोञ्छण्याऽश्रूणि प्रोञ्छति)

रामदीनः स्वामिन्! किमिदम्? किमिदमभूद्भवतः? किं भवान् भूपादस्युं जानाति ?

शोभनः एवमेतत् रामदीन! विद्यालये भूपालसिंहो ममैव सहाध्याय्यासीत्। यां छात्रां कदर्थयितुं मया सह तस्य संघर्षो जातः सैव तवार्यावधूः मद्भार्याऽस्ति।

रामदीनः स्वामिन्! किमुच्यते भवता? क्व भवादृशोऽधिष्ठानाधिकारी क्व चायं भूपादस्युः ?

शोभनः भवतु नाम। मित्राणि! एतावन्मात्रमवधेयं युष्माभिः।

रामदीनः
मेवालालः } आज्ञापयन्तु श्रीमन्तः।

शोभनः यदि नाम कदाचित् भूपाऽस्माकं कूटग्रहे निवद्धोऽपि स्यात्तर्हि गुलिकाप्रहारो न कार्यः । यावच्छक्यप्रयत्नैः स मदभिमुखं प्रेरणीयः ।

रामदीनः अवगतं स्वामिन्नवगतम् । यत् किञ्चिदपि स्यात् । परन्तु भूपा-दस्युर्भवत्सहपाठी वर्तते । कदाचित्तस्य जीवनं भवत्प्रयत्नैर्व्यव-स्थितं भवेत् !

शोभनः (एकतस्संकेतयन्)

सम्प्रति सन्नद्धा भवत । यानमागतम् । पूर्वनिश्चयानुसारं कार्यं साधनीयम् ।

(सर्वेऽपि रक्षिणः यानमारुह्य प्रतिष्ठन्ते । शोभनश्चालकसमीप-मुपविशति । कतिपयनिमेषानन्तरमेव द्रुतगत्या धावद्वाहनं निर्जन-क्षेत्रमासाद्य तिष्ठति)

शोभनः चालक ! यानमत्रैव स्थापय ।

(रामदीनं प्रति)

पश्य रामदीन! मुखवीरसंकेतितं कर्पूरपुरग्रामोद्यानमिदमेव वर्तते । श्रेष्ठिदुःखहरणनिर्मापितं कालीमन्दिरमपि वर्ततेऽत्रैव । किमुक्त-मासीत् गुप्तचरेण ?

रामदीनः सन्ध्याकाले षड्वादनेऽस्मिन्नेवोद्याने भूपादस्युः सहचरैस्सहैष्यति । अद्य रात्रौ सः शेखपुरग्रामे धनापहरणयोजनां चरितार्थयितु-मिच्छति ।

शोभनः साधु ! इदानीं पृथग्भूय सर्वेऽपि उद्यानमिमं परितः परिवारयन्तु । मक्षिकाभिनत्कारोऽपि मा भवेत् । क्षेत्रशस्येषु सर्वे निलीनाः स्युः । ममाकाशप्रहारध्वनिं विना प्रहरणं कथमपि न प्रारप्स्यते । (चालकंप्रति)

त्वमपि दूरं गच्छ । होरानन्तरमत्रैव पुनरागन्तव्यम् ।

(चालकः शनकैरपयाति)

भवतु। विश यू आल बेस्ट आफ लक! सर्वेभ्यः स्वस्ति कामये। अहमप्येतस्मिन्नेव वर्जरक्षेत्रे निलीये।

(सर्वे तथा कुर्वन्ति। शोभनः स्वराजकीयं परिधानमपनीय साधारणजनोचितं वस्त्रं धारयति। रिवाल्वरञ्च कटौ निबध्नाति। भद्रपुरुषीभूय स क्षेत्राद्बहिर्भूय मार्गे तिष्ठति। द्वौ दस्यू शस्त्रास्त्रसन्नद्धौ वाटिकाभिमुखमागच्छन्तौ दृश्येते)

शोभनः (सनिःश्वासम्)

हे प्रभो! अपि नाम द्वयोरेकतरो भूपालः स्यात्?

(दस्यू समीपमागच्छतः। शोभनं दृष्ट्वा तौ द्विचक्रिकातोऽवतरतः। शोभनोऽज्ञानं नाटयति)

शोभनः (प्रथमदृष्ट्यैव भूपालं सम्यगभिज्ञाय)

अये भूपाल! त्वमसि?

भूपालः (अंगप्रच्छदेन मुखाकृतिं गोपयन् सचण्डस्वरम्)

को भूपालः? कस्त्वमसि? कस्त्वां प्रेषितवान्?

शोभनः (सस्मितम्)

भ्रातः भूपाल! अये शोभनं न प्रत्यभिजानासि त्वम्? काण्वेन्टछात्राया राजलक्ष्म्याः प्रसंगे येन सह तव संघर्षो जातः? कियान् आहत आसम्। पश्य तावत्!

(पदलीनवस्त्रमपसार्य वामजानु दर्शयति)

भूपालः (सवेगमासाद्य प्रगाढमालिङ्ग्य)

भ्रातश्शोभन! क्षमस्व तावत्। मम वृत्तिरेवेदृशी यत् प्रत्येकं जनोऽस्मत्कृते रक्षिगुप्तचर एव प्रतीयते।

शोभनः कस्मात् पुनः? भूपाल! का ते वृत्तिः?

भूपालः शोभन! मम वेषभूषां निभाल्य किं त्वं मद्वृत्तिमवगन्तुं न क्षमसे?

शोभन: सत्यमेव दस्युः प्रतीयसे बन्धो! परन्तु सत्यं भण। कां वृत्तिं निर्वहसि ?

(भूपालोऽकस्मादेव हतप्रभो जायते)

भूपाल: चतुष्पञ्चवर्षानन्तरं प्राप्तोऽसि शोभन! आत्मविषये किञ्चिद् ब्रूहि ?

शोभन: भोः किमिदम् ? मत्प्रश्नो व्याधूतः। द्विदले कालिमा परिलक्ष्यते भूपाल ? बन्धो! शप्तोऽसि मैत्र्या। अवितथं भण। अनन्तरं भणिष्याम्यहमपि।

(भूपालोऽश्रूणि प्रमार्जयति)

भूपाल: भ्रातश्शोभन! तपस्विनीं राजलक्ष्मीं शातयित्वा दण्डमिदानीं भुनज्मि। विद्यालयं त्यक्त्वा निर्गृहघट्टोऽभूवम्। मम विमाता सम्पत्त्यधिकारे मां प्रत्यवायं मन्यमानाऽसकृत् प्राणान्मे समुच्छेत्तुमियेष। तातोऽपि मद्रक्षणेऽशक्तो जातः। विमातुर्वैमात्रिकयोर्मातुलानाञ्चान्यायं ध्वंसयितुमेवान्ततो लौहभुजगीमिमां धृतवानस्मि।

(द्विनालिकां दर्शयति)

पश्चाद्वर्तिवृत्तानि मा पृच्छ शोभन! गृहं द्वारं ग्रामः कुटुम्बो मित्राणि बन्धवो ज्ञातिजनाः सर्वेऽपि परकीया अजायन्त मत्कृते। इदानीं तु वृहदेव विजनं मम नैशवासस्थानं वर्तते।

शोभन: (स्कन्धोपरि हस्तं निधाय)

भूपाल! कथन्नापनीयत इयं जीवनचर्या ? अशिवोऽयं पन्थाः। मार्गोऽयं त्वां पतनोन्मुखं विधास्यति।

भूपाल: सहस्रधा त्यक्तुमिच्छामि शोभन! सहस्रधा !! परन्तु किं करवाणि ? रक्षाधिष्ठानं मिथ्याकलहेषु मां सन्निवेश्य जीवितमपि मे संशयापन्नं करोति। यावदेवोत्तर्तुं प्रयते तावदेव दृढं मग्नोऽस्मि।

शोभनः (सस्नेहम्)

किं त्वमात्मसमर्पणमिच्छसि ?

भूपालः न केवलमहम् । भ्रातः सर्वेऽप्यस्मत्सहचराः सभ्यजनजीवनचर्यां वाञ्छन्ति । दोषाः कृता अस्माभिः । परन्तु न कृता हत्या, न वा व्यभिचारः कृतो न वा कोऽपि निर्दोषजनः शातितः ।

(शोभनोऽश्रूणि प्रमार्जयति)

स्वापराधदण्डं प्रसन्नतया भोक्तुं सन्नद्धा वयम् । परन्तु रक्षिणोऽप्यार्जवमस्माकं साधु रक्षन्तु ।

(शोभनः कटिप्रदेशान्निष्काश्य सीटिकां वादयति । क्षेत्रनिलीना रक्षिणो द्राग् बहिरायान्ति भूपालं तत्सहयोगिनश्च शोभनसंकेतमवाप्य निबध्नन्ति)

भूपालः (किंकर्त्तव्यविमूढः सन्)

किमिदम् ? शोभन ! प्रवञ्चितोऽस्मि त्वया ? आरक्षिणां प्रमुखोऽसि त्वम् ?

शोभनः (सस्नेहम्)

बाढम् ! परन्तु विश्वसिहि मित्र ! एतत्सर्वं त्वद्धिताय करोमि । मयि जीवति त्वमन्यायं न द्रक्ष्यसि । भूपाल ! अन्तर्मनसेच्छाम्यहं यत्प्रसादनिर्भरं जीवनं जीव त्वमपि ।

(सस्मितम्)

अपरञ्च । सर्वप्रथमं त्वद्भ्रातृजायाहस्तनिर्मितं स्वादु चायपेयमुष्णमुष्णं त्वां पाययिष्यामि । द्रक्ष्यसि यद् भ्रातृजाया ते हेमामालिनी कियद्रुचिरं पेयं घटयति ।

भूपालः (स्मृतिं नाटयन् साश्चर्यम्)

किमुक्तं भवति ?

शोभनः (सहासम्)

युक्तस्ते वितर्कः। हेमामालिनी भवति राजलक्ष्मीः। भूपाल! न त्वया साऽपमानिता भवेन्न मया वारिता न च साऽस्मत्प्रणय-पयोनिधिमज्जिता स्यात्! सर्वमेवेदं नियतिप्रेरितं घटनाचक्रम्। आवयोरेकीकरणस्य श्रेयस्त्वामुपगच्छति भूपाल! आवयोः पुनर्मेलनस्यानन्दं राजलक्ष्मीरेवानुभविष्यति।

(द्वावपि निरर्गलं प्रहसतः)

॥ जवनिकापातः ॥

कन्थामाणिक्यम्

(समुत्प्रेरकं शिशुजनैकाङ्कम्)

पात्रपरिचयः

भवानीदत्तः	(नगरस्य प्रसिद्धोऽधिवक्ता)
सिन्धुः	(भवानीदत्तस्य तनुजः, छात्रः)
सोमधरः	(सिन्धोः सहपाठी)
रामदत्तः हरणः	भवानीदत्तस्य भृत्यौ
रत्ना	(भवानीदत्तस्य पत्नी)

कथासार

कन्थामाणिक्य का अर्थ है गुदड़ी का लाल। नगर के जाने-माने हाई-कोट के वकील भवानीदत्त को सामन्यतः चिढ़ है खटिकों की बस्ती से। वह नहीं चाहते कि उनका बच्चा सिन्धु गन्दी बस्ती की ओर जाय। परन्तु एक दिन हाईकोर्ट से लोटते समय वह अपने बच्चे को वहाँ देख लेते हैं। आते ही बच्चे की पेशी होती है।

सिन्धु बताता है कि खटिक बस्ती का एक लड़का सोमधर उसका प्रिय मित्र है। वह पढ़ने में भी तेज है। उसके पिता ट्राली पर सब्जी और फल बेचते हैं। मगर सोमू का स्वभाव अच्छा है। वह भी सिन्धु को चाहता है। दोनों मिलकर गणित के प्रश्न हल करते हैं।

बच्चे की दलीलें ऐडवोकेट के गले के नीचे नहीं उतरती। वह मन-ही मन निरुत्तर हैं। फिर भी बच्चे का कान उमेठ कर उसे आइन्दा उधर न जाने के लिए धमकाते हैं।

भवानीदत्त की पत्नी रत्ना बिफर जाती है पति के रूखे व्यवहार पर। वह बताती है कि गरीबी-अमीरी तो समाज की अपनी बनाई दुर्व्यवस्था है। ईश्वर ने हर व्यक्ति को समान रुचि से गढ़ा है। वह वकीलों के पेशे की निन्दा करती है।

एक दिन सिन्धु की गाड़ी का ऐक्सीडेन्ट हो जाता है। ट्रक के धक्के से गाड़ी उलट जाती है। सिन्धु बेहोश हो जाता है। पैदल स्कूल से लौटते सोमधर की दृष्टि अपने प्रिय मित्र सिन्धु पर पड़ती है। वह उसे रिक्शे पर बैठाकर घर लाता है। सिन्धु के घर सब चिन्तित हैं कि बच्चा अब तक घर क्यों नहीं लौटा ? फोन पर फोन होते हैं। भवानीदत्त पता लगाने जाना ही चाहते हैं कि रिक्शा घर के लान में आ जाता है।

सोमधर के सद्व्यहार से भवानीदत्त की आँखें खुल जाती हैं। वह उसे 'गुदड़ी का लाल' मान लेते हैं और उसकी शिक्षा का सारा भार अपने ऊपर ले लेते हैं। अब उन्हें गरीबों से बड़ी सहानुभूति हो जाती है।

कन्थामाणिक्यम्

(समुत्प्रेरकं शिशुजनैकाङ्क्षम्)

।। प्रथमं दृश्यम् ।।

नगरस्य सघनवसतौ प्रख्याताधिवक्तुर्भवानीदत्तस्य भवनम् । भवनान्तरे कलकलः श्रूयते ।

भवानीदत्तः रामदत्त ! अयि भो रामदत्त ऽ ऽ ऽ । हरण ! अयि भो हरणस्य दारक !

(रामदत्तहरणौ ससम्भ्रम धावन्तावागच्छतः)

हरणः (अंगप्रच्छदेन हस्तौ मार्जयन्)

अन्नदातः ! रसवत्यामासम् । किं कर्तुं युज्यते ? आज्ञापयन्तु तावत् ।

रामदत्तः (वचोभिः प्रसादयन्)

स्वामिन् ! शीतलमानयानि उष्णं वा ? आहोस्वित् पक्ववटिकादीनि खादितुमिच्छति भवान् ?

भवानीदत्तः (रोषोत्तप्तां मुखाकृतिं किञ्चिन्मसृणयन्)

भ्राष्ट्रे गच्छतु ते पक्ववटिका । सर्वेऽपि यूयं म्रियध्वे । आहूतोऽपि न बोल्लति कोऽपि । गृहमस्ति कस्यचिन् भद्रपुरुषस्य भग्नावशेषो वा प्रेतानाम् ?

रामदत्तः (सापराधमुद्रम्)

सुसुस्स्वामिन् ! कार्यव्यापृतैरस्माभिः कदाचिन्नाकर्ण्यते परिस्फुटम् । तत्क्षमन्तामन्नदातारः ।

भवानीदत्तः (सव्यङ्ग्यम्)

अन्नदातृदारक ! अलं नाटकेन । गच्छ सिन्धुमाह्वय तावत् । निषेधं नाटयेच्चेत् कर्णग्राहमानय ।

हरणः (भयभीतस्सन्)

स्वामिन् ! किं भर्तृदारकेण किञ्चिदपराद्धम् ? शिशवस्तु क्रीडां हेलां कुर्वन्त्येव । भवानिव अहमिव न तेऽधरोत्तरं विजानन्ति । स्वामिन् ! भर्तृदारकस्तु इदानीमेव क्रीडित्वा समागतः । वधूराज्ञ्याः पार्श्वे भविष्यति ।

भवानीदत्तः (कठोरस्वरेण)

हरण ! कियद्वारं निर्दिष्टोऽसि यत् प्रवचनं मा कुरु । यदुच्यते तदेव शृणु । किमवगतम् ?

हरणः (सनैराश्यम्)

युक्तमेतत् स्वामिन् । एतदनन्तरं तावन्मात्रमेव श्रोष्यामि । भृत्यस्तावद् भवामि स्वामिन् ! कथं खलु प्राज्यं श्रोतुं शक्नोमि ? एष गच्छामि । (हरणो गच्छति । रामदत्तोऽपि तमनुसरति)

(कतिपयनिमेषानन्तरमेव द्वावपि भृत्यौ भवानीदत्तस्य पुस्तकालयमुपगच्छतः । पश्चाच्चाधिवक्तुः पत्नी रत्ना वत्सेन सार्धमायाति)

रत्ना कि वृत्तम् ? अद्यागतप्राय एव वात्याचक्रमुत्थापयितुं प्रक्रमसे । कस्मिंश्चिद् व्यवहारे पराजितोऽसि किम् ?

भवानीदत्तः (नीलकञ्चुकमवतारयन्)

गृहेश्वरि ! इदानीं यावत् न्यायालयसत्रे भवानीदत्तः कमपि वादं व्यवहारं वा न भ्रंशितवान् । परन्तु भवत्या न्यायालये तु निरन्तरमेव खलीकृतोऽस्मि ।

(हरणरामदत्तौ मुखे करप्रोञ्छनीं विन्यस्याट्टहासं रोद्धुं प्रयतेते)

भवानीदत्तः (द्वावपि निभाल्य)

बण्डौ पाटच्चरौ ! युवां तत्र किमुपजपथः ? स्वामिनीविजय-महोत्सवं नाटयथः ? पलायेथां ततः ? (भृत्यौ सहासं गृहाभ्यन्तरं पलायेते)

रत्ना (सस्मितम्)

अवितथं भण । किं वृत्तम् ? मनःस्थितिः कथमद्य संस्खलति ?

भवानीदत्तः (प्रक्षालनद्रोण्यां मुख प्रक्षाल्य प्रच्छदेन च हस्तं मुखं मार्जयन्)
इदानीमेव कथयामि । मुहूर्तमात्रं तावत्
(सिन्धुर्जनन्यञ्चले दृढं सज्जते)
बाढम् । एष भणामि । मास्टर सिन्धो ! इतस्तावत् ।

सिन्धुः (कातरदृष्ट्या जनन्यभिमुखं पश्यन्)
अम्ब !

भवानीदत्तः (कठोरदृष्ट्या पश्यन्)
इतस्तावत् । तात आह्वयति नाम्बा । आगच्छ । हरी अप् !

रत्ना (दारकं लालयन्ती सविस्मयम्)
किं कृतवान् सिन्धुः ? समागच्छन्नेवाग्नि वर्षसि ? अहमपि तावदाकर्णयानि ।

भवानीदत्तः (सिन्धुमाकृष्य)
देवि ! तदेव बच्मि यत्तत्र सिन्धुना समाचरितम् । ब्रूहि मास्टर-सिन्धो ! नीचानां वसतौ किमर्थं गतवानसि ?

सिन्धुः (सभयम्)
तात ! मम सखा सोमू तत्र निवसति । तस्मात् स्वपुस्तकमानेतुं गतोऽस्मि ।

भवानीदत्तः किं करोति तस्य पिता ?

सिन्धुः तस्य पिता ट्राल्यां निधाय शाकान् फलानि च विक्रीणाति ।

भवानीदत्तः तव पिता च किं करोति ?

सिन्धुः स तु उच्चन्यायालये वाक्कीलोऽस्ति ।

भवानीदत्तः कीदृशं तव भवनम् ?

सिन्धुः अतिसुन्दरं मम भवनम् । स्वच्छं निर्मलं च वर्तते ।

भवानीदत्तः सोमधरस्य च कीदृशम् ?

सिन्धुः तस्य गृहं नातिदीर्घम् । अस्वच्छवीथिकायाञ्च स्थितम् । न मार्जितं न चाप्यलंकृतम् ।

भवानीदत्तः (सक्रोधम्)

मूढ ! तस्य गृहमपि मलीमसं वसतिरपि मलीमसी, तस्य पिताऽपि शाकफलविक्रेता ! एवम्भूतेऽपि किमर्थं तत्रागमस्त्वम् ?

सिन्धुः (सदैन्यम्)

तात ! सोमधरो मम सुहृदस्ति । ममाध्यापिका पाठयति यत् सुहृल्लालयितव्यः ।

भवानीदत्तः पृच्छाम्यहं मास्टरसिन्धो ! तेन सह त्वया सख्यमेव कस्मात् कृतम् ? तस्मै स्वपुस्तकं कस्माद् दत्तम् ? किमभिजातकुलोत्पन्नाश्छात्राः कक्षायां न सन्ति ?

सिन्धुः तात ! सोमू मय्यतितरां स्निह्यति । अध्ययनेऽप्यसौ तीक्ष्णो वर्तते । ममाध्यापिका तं मान्यतरं (मानीटरं) कृतवती ।

भवानीदत्तः (सोद्वेगम्)

त्वं पुनः कथन्न तीक्ष्णोऽसि ? फलविक्रेतुर्दारकः कथं त्वामतिशेते ?

सिन्धुः (प्रतिवचनासामर्थ्यं नाटयन्)

तात ! अहमपि तीक्ष्णोऽस्मि । अहं सोमू च द्वावपि तीक्ष्णौ । सप्तमकक्षायां प्रथमोऽहमासं सोमू च द्वितीयः । इदानीमष्टमकक्षायां षाड्मासिकपरीक्षणे सोमधरोऽग्रेसरो वर्तते । परन्तु तात ! वार्षिकपरीक्षणे पुनरप्यहं सोमधरमतिशयिष्ये ।

भवानीदत्तः (बालकस्य बुद्धिवैभवाद् वैलक्ष्यमनुभवन्)

एवमेतत् । इदानीमवगतम् । एतदर्थमेव भवान् खटिकानां वसतौ गतवानासीत् ? इदानीं सोमू एव भवन्तं पाठयिष्यति नाध्यापकः ?

सिन्धुः तात ! सोमधरोऽपि तावत् निजाभ्यासपञ्जिकां गणितस्य मह्यं ददाति । आवामेकीभूय प्रश्नान् समादध्वः ।

भवानीदत्तः (सिन्धोः कर्णं किञ्चित्कुब्जीकुर्वन्)

मास्टर सिन्धो ! अस्मात्परं शिक्षको भवन्तं गणितमध्यापयिष्यति । अवगतं न वा ? भवान् खटिकवसतौ न पदं करिष्यति । सोमधरेण साकं मैत्रीवर्धनस्य च काप्यपेक्षा ।

कदाचित्पुनरपि यदि तत्र द्रक्ष्यसे तदा दृढं ताडयिष्यामि । गच्छ, इतः प्रतिष्ठस्व ।

(सिन्धुरस्फुटं रुदन् गृहाभ्यन्तरं प्रविशति)

रत्ना (सरोषम्)

साधु साधु! विलक्षणं पितृहृदयमवाप्तम् ! शिशोः सद्भावैरात्मानं शिक्षयितुं कश्चिन्तयति ? आत्ममौढ्यमपलपितुं तस्य वराकस्य कर्णमेव भञ्जयितुं प्रवृत्तोऽसि ?

भवानीदत्तः यू शटऽप मैडम् ! खटिकवसतेः संस्कृतिं त्वं नावबुध्यसि । ज्ञातुमिच्छसि चेत्कस्मिंश्चिद्दिने पर्यटनं सम्पादय ।

रत्ना अलं मां शिक्षितेन ? मम मातृगेहेऽपि खटिका अन्यजातयश्च वर्तन्ते । स्वपितामहसदृशमेवाहं भूपालं पितामहपदेन समबोधयम् । भूपालस्य नप्त्री मम प्रेष्ठा सख्यासीत् ।

भवानीदत्तः (साट्टहासम्)

शोभनं शोभनम् ! इदानीमवगतम्मया मास्टरसिन्धोः खटिकानुरागरहस्यम् !

रत्ना अलमुपहासेन । त्वं वसतेर्मलिनतां पश्यसि, खटिकानां दैन्यं पश्यसि । परन्तु तेषां दरिद्राणां सद्भावनां हृदयनैर्मल्यं द्रष्टुं न शक्नोषि । वाक्कीलानां छलछद्मकपटाचारेभ्यो लक्षगुणाधिकं महीयते तेषां श्रमजीविनां जीवनम् ।

भवानीदत्तः मम जीवनं छलछद्मविकलमित्येव ते विवक्षा ? कथं न तर्हि पितरं कथितवती नाहं वाक्कीलं कमपि परिणेष्यामि ?

रत्ना अथ किम् ! उत्थानेऽवस्थाने स्वप्ने जागरणे गृहे मार्गे न्यायालये- सर्वत्रापि केवलमसत्यं प्रवञ्चनं षड्यंत्रो वा प्रभवति । वादविजय एव तीर्थाटनमिव । नैतत्सर्वं मह्यं रोचते । पित्रे निवेदनीयमासीदिति यदुक्तं तदपि न युक्तियुक्तम् । विवाहकाले भवान् बी० ए० परीक्षार्थी आसीत् । भविष्यकाले भवान् किं भविष्यतीति को ज्ञातुं शशाक ?

भवानीदत्तः (अपमानमनुभूय)

हन्तः भो ! ईदृशो ग्रन्थिस्तव मनसि ? अद्यैव साधु परिलक्षितम् ।

रत्ना सहजं मयोदितम् । अलमन्यथा प्रकल्प्य तत्सर्वम् । सर्वथा विशदा मे मनोवृत्तिः । परन्त्वहं मिथ्यावैभवविलासप्रदर्शने ऐश्वर्योत्सेके च न विश्वसिमि । ईश्वरः प्रत्येकं जनं स्वाभिरुच्या सर्जितवान् । दैन्यं धनाढ्यत्वञ्च समाजव्यवस्थयोत्पद्येते । दीनखटिकस्यापि दारकः सर्वविधाभावग्रस्तो गुणेन प्रतिभया च त्वत्पुत्रकमनुहरति कदाचिदतिशेते वा इत्येव मत्कथनस्य प्रमाणम् ।

भवानीदत्तः (सदीर्घनिःश्वासम्)

ओ माई गॉड ! अद्य पुनर्वादे पराजितोऽभूवम् ।

रत्नाः (सस्मितम्)

एहि तावत् । भोजनं निर्वर्तय ।

(गृहाभ्यन्तरे भृत्ययोरट्टहासः श्रूयते)

॥ जवनिकापातः ॥

●

॥ द्वितीयं दृश्यम् ॥

सन्ध्याकालस्य चतुर्वादनवेला । अधिवक्ता भवानीदत्तः स्वपुस्तकालये निषण्णो दूरभाषयन्त्रं बहुशः प्रवर्तयति । तद्भार्या रत्नाऽपि पार्श्वस्थमासन्दीमुपविश्य चिन्तां नाटयति ।

भवानीदत्तः हलो हल्लो ऽ ऽ ऽ भारद्वाजविद्यानिकेतनम् ? का नु खलु भवती ब्रवीति ? हलो, प्राचार्या ? बाढं बाढम् । अयमहं भवानीदत्तो ब्रवीमि । नमस्करोमि तावत् । पश्यन्तु तावत् । चतुर्वादनं जातम् । कतिपयनिमेषा समधिकमेव व्यतीताः । परन्तु मम दारक इदानीं यावद् गृहं नायातः । किं विद्यालयेऽद्य कश्चिन्महोत्सवो वर्तते ?

(श्रुतिमभिनीय)

किमुक्तं सपादत्रिवादन एवावकाशो जातः ? साधु साधु !!

रत्ना (ससम्भ्रमम्)

किमुक्तवती प्राचार्या ? त्रिवादनेऽवकाशो जातः ? अत एव चिन्तितास्मि । प्रतिदिनं सिन्धुः सार्धत्रिवादनं यावदागच्छति । गच्छतु भवान् । स्कूटरेण गच्छतु । पश्यतु तावन्मध्येमार्गं विद्यालयवाहनं क्व वर्तते ?

भवानीदत्तः गच्छामि गच्छामि। त्वं पुनः शिशुरिव धैर्यहीना जायसे । अमङ्गलं मनसि कस्माच्चिन्तयसि ?

रत्ना भवान्न जानाति राजपथवृत्तम् । मुमूर्षवो द्राग्यानचालका मदिराप्रभावैर्निहतचेतनास्सन्तश्चालयंति । कोऽपि म्रियेत वा जीवेद् वा ? तेषां हतकानां किं जायते ? एतत्सर्वं स्मारं स्मारं निमज्जति मम हृदयम् ।

भवानीदत्तः भवतु । शान्ता भव । त्वरितमागच्छामि ।

(इति प्रस्थातुमिच्छति । अकस्मादेव रक्षायानमेकं भवनप्राङ्गणं प्रविशति । कश्चिद् बालकः सिन्धुमङ्कपाल्यां निधाय रक्षायाने तिष्ठन्नास्ते)

भवानीदत्तः (सत्वरमुपसृत्य)

अये किमिदम् ?

(सिन्धुं प्रत्यभिज्ञाय)

किं वत्स ! सोमू तवैवाभिधानमस्ति ?

सोमधरः (सविनयम्)

पितृव्य ! अहमेवास्मि सोमधरः । सिन्धोर्विद्यालयवाहनमद्य केनचिद् द्राग्यानेन दृढमाहतम् । सर्वेऽपि बालकाः क्षतविक्षता जाताः । वाहनं हित्वा द्रगयानचालकः पलायितः ।

भवानीदत्तः त्वं पुनः कुत्रासीः ?

सोमधरः पितृव्य ! अहं पुनः प्रतिदिनमेव पदातिरागच्छामि । दुर्घटनामनु

दशनिमेषानन्तरमेवाहं तत्रासादितवान् । महान् जनसम्मर्दस्तत्रावलोकितः । पितृव्य ! ततः प्रभृत्येव सिन्धुर्मूर्च्छामुपगतो वर्तते ।

(वार्तालापं श्रुत्वा भृत्यौ रत्ना च बहिरायान्ति । रत्ना सिन्धुं निस्संज्ञमवलोक्य भृशं रोदिति)

भवानीवत्तः देवि ! किमिदमाचरसि ? न किञ्चिदत्याहितम् । इदानीमेवाहं भिषजमाह्वयामि । सिन्धुश्चैतन्यमेष्यति ।

रत्ना (विलपन्ती)

यदि नाम मद्दारकस्य किञ्चिदभूत् नाहं जीवितुं शक्ष्यामि ।

सोमधरः अम्ब ! अलं चेतनां खलीकृत्य । डॉक्टरधूलियामहोदयमानयामीदानीमेव । प्रतिवेश एव निवसत्यसौ ।

भवानीवत्तः वत्स सोमधर ! मा गाः कुत्रापि त्वम् । मातृसमीपमेव तिष्ठ । अहं दूरभाषयंत्रेणैव भिषजमाह्वयामि ।

(मध्य एव सिन्धुश्चेतनामनुभवति । सोऽम्बमाह्वयति)

सोमधरः (सहर्षम्)

पितृव्यचरण ! अलं भिषगाह्वानेन । सिन्धुश्चैतन्यमागतः ।

(भवानीवत्तः दारकसमीपं निवर्तते । रत्नानेत्रे आनन्दाश्रुपूरिते जायेते)

सिन्धुः (अम्बां तातं सोमधरञ्च दृष्ट्वा)

अम्ब ! कथमहं गृहमागतः ? मम वाहनन्तु द्राग्यानेन दृढमाहतमासीत् । वयं सर्वेऽपि तारस्वरेणाक्रोशाम । वाहनमस्माकं विपर्यस्तमासीत् ।

रत्ना (दारकं प्रचुम्बन्ती)

एवमेतत् वत्स ! विपर्यस्तं तव वाहनम् । सोमधरस्त्वामानीतवान् रक्षायानेन ।

सिन्धुः (सप्रणयम्)

सोमू ?

(अकस्मादेव पितरमुपस्थित दृष्ट्वा मिन्धः शिथिलीभवति । भवानीदत्तोऽग्रेसरीभूय सोमधरशीर्षे करतल सारयति । सिन्धुदृष्टिर्दीप्तिमुपगच्छति)

सोमधरः (सस्नेहम्)

सिन्धो ! अलं भयेन । सर्वथानाहतोऽसि प्रभुकृपया । श्व आवां पुनर्विद्यालयं गमिष्यावः । भवतु, पितृव्य ! गच्छामि इदानीम् । नमस्ते । अम्ब ! नमस्ते !!

भवानीदत्तः (समादिशन्निव)

वत्स सोमधर ! मित्रगृहान्नैवं गन्तव्यम् । तिष्ठ तावत् । वयं सर्वेऽपि सहैवाल्पाहारं निर्वर्तयिष्यामः । सपीत्यनन्तरं गच्छसि ।

सोमधरः पितृव्यचरण ! स्वपितुः ट्राल्याः सज्जा मयैव करणीया वर्तते । स मां प्रतीक्षमाणो भविष्यति ।

भवानीदत्तः (हतप्रभः सन्)

वत्स सोमधर ! सत्यमेवासि त्वं कन्थामाणिक्यम् । सिन्धुस्त्वामतितरां प्रशंसति । इतःप्रभृति तव शिक्षणव्यवस्थामहं सम्पादयिष्यामि ।

(भृत्यौ अल्पाहारमानयतः । सर्वेऽपि निषीदन्त्यशितुम्)

बाढम् । सोमधर ! श्व एवाहं युवयोः कृते द्विचक्रिके क्रेष्यामि । युवां द्वावपि सावधानं प्रवर्तयतम् । सहैव गच्छत सहैवागच्छतम् । तव शुल्कं तव तातो ददाति ?

सोमधरः न खलु । शुल्कस्तु मुक्तः । पुअरब्वॉय्जफण्डतः पञ्चविंशतिरुप्यकाण्यपि प्राप्यन्ते ।

भवानीदत्तः शोभनं पुत्रक ! तथापि यदि धनमपेक्ष्येत तर्हि मां भणिष्यसि ।

सोमधरः (चायपेयं परिसमाप्य समुत्तिष्ठन्)

पितृव्यचरण ! गच्छामि तावत् । नमस्ते । अम्ब ! प्रणमामि । सिन्धो ! श्वो मिलिष्यावः ।

भवानीदत्तः (रत्नां प्रति)

रत्ने ! सत्यमेव सिन्ध्वभिरुचिं प्रशंसामि । सोमू कन्थामाणिक्यमेव वर्तते । इदानीं न मे घृणा दरिद्रवसतिं प्रति । अद्यप्रभृत्यहं त्वन्नेत्राभ्यां संसारं द्रक्ष्यामि ।

॥ शनैर्जवनिका पतति ॥

कुटुम्बरक्षणम्

(ऐतिहासिकमेकाङ्कनाटकम्)

पात्रपरिचयः

रावहम्मीरसिंहः	(रणस्तम्भपुराधीशश्चाहमाननरेशः)
महिमाशाहः	(अलाउद्दीनसैनिकः कश्चिन्मुगलः हम्मीरशरणागतः)
मानबाई मदिरा	(हम्मीरसिंहराजमहिष्याश्चेट्यौ)
समुद्घोषकः	(सूत्रधारः)

कथासार :

चौहान सम्राट् पृथ्वीराज के पराभव के बाद उनके भाई हरिराज (हाडोराज–हाडा) के वंशज राजस्थान के दक्षिणाञ्चल में स्थापित हुये। ये स्वयं को हाडा क्षत्रिय कहते थे। १४वीं शती के उत्तरार्ध में इसी वंश के प्रख्यात हाड़ा नरेश राव हम्मीरसिंह बूँदी क्षेत्र के प्रशासक थे। रणथम्भौर उनकी राजधानी थी।

उन दिनों अलाउद्दीन दिल्ली की गद्दी पर था। उसकी आँखों में रण-थम्भौर काँटे की तरह गड़ता था। परन्तु राव हम्मीर की अजेय रणशक्ति के भय से वह मन मारे बैठा था।

तभी एक घटना घटी। दक्षिण-विजय में मिले लूट के माल के बंटवारे को लेकर महिमाशाह आदि पांच मुगल सैनिकों का सुल्तान के भाई उलूग खाँ से झगड़ा हो गया। महिमा भाग कर राव हम्मीर की शरण में आया।

युद्ध करने का अच्छा वहाना पाकर अलाउद्दीन छलपूर्वक रणथम्भौर में घुस आया। उन दिनों राव हम्मीर राजधानी से कई मील दूर एक तीर्थ में थे। रणथम्भौर किले की घेरेबन्दी कई महीने तक चली। राव के सेना-पति रणमल्ल और कोठारी जाहड़ सुल्तान से मिल गये। दुर्गवासी प्रजा में हड़कम्प मच गया। षड्यन्त्रकारी तरह-तरह का दुष्प्रचार करने लगे। लाचार होकर राव हम्मीर ने रानियों को जौहर करने की आज्ञा दे दी। उन्होंने प्राणान्तक युद्ध करने का निश्चय किया।

शरणागत महिमाशाह ने स्वयं अपने हाथों अपने परिवार का वध कर डाला और वह भी केसरिया वाना पहनकर राव हम्मीर के साथ युद्धभूमि में चल पड़ा। प्रस्तुत एकांकी महिमाशाह के उसी महान् चरित्र पर आधारित है। एकांकी के कुछ पात्र कविकल्पित हैं।

●

कुटुम्बरक्षणम्

(ऐतिहासिकमेकाङ्कनाट्यम्)

(नेपथ्येऽनुश्रूयते)

व्योमस्कन्धावलग्ना विगतनृपकथोत्थानविध्वंसदूताः
प्रासादा भूरिशृङ्गाः कृमिरवमुखरा वृत्तमञ्चन्ति येषाम् ।
सम्राजस्तेऽपि यस्य भ्रुकुटिपुटबलैर्नामशेषत्वमीयुः
कालं कल्पान्तभालं महितहरितनुं नौमि पूर्णस्वतन्त्रम् ॥१

अपि च,

यदट्टहासोद्धतवायुवेगात् तृणीकृता भूभृदमेयशक्तिः ।
अनन्ततारापथकोणलीना पुराणगाथात्वमिता जयेत्सः ॥२

भो भोः सहृदयाः ! पश्यन्तु तावत् सृष्टिनटीनर्तनसाक्षिभूतस्य महाकालस्य लीलाविलासम् । नामशेषतामुपगतेषु रामकृष्णयुधिष्ठिरप्रभृतिषु मृत्युतल्पमङ्गीकृतवत्सु चाशोकविक्रमपुष्यमित्रपुलुमाविसमुद्रगुप्तहर्षपुलकेशिराजेन्द्रकुलशेखरभोजपृथ्वीराजादिषु भूपालरत्नेषु तुरुष्कशासनं प्रभवतितरां हिन्दुदेशे भारताभिधाने ।

उपरता गुलामवंशीयाः शासकाः । इदानीं सुल्तानपदभाक् अलाउद्दीनो देहल्यां कल्पितराजधानीकः प्रतपति ज्येष्ठमासमार्तण्ड इव । प्रकृत्यैव दुर्मर्षणः पैगम्बरमात्मानं मन्यमानः स्वपितृव्यहन्ता अनयदुराचारकपटहिंसापटुरसौ निखिलमपि भारतं तुरुष्कीकर्तुमुद्यतो वर्तते ।

देवगिरिनरपतिं रामचन्द्रदेवं प्रसह्य खलीकृत्य तद्राजमहिषीमनिन्द्यसुन्दरीं कमलादेवीञ्च स्वोपभोग्यां विधाय स इदानीं पृथ्वीराजवंशशिखावलं क्षत्रियोत्तमरत्नभूतं मरुधराधीशं महाराजं श्रीहम्मीरदेवं मार्गकण्टकं मन्यमानस्तं जेतुं रणस्तम्भपुरीं तद्राजधानीं सर्वतोऽवरुध्य तिष्ठति ।

(नेपथ्ये महान् कलकलध्वनिश्चीत्कारमिश्रितश्चाव्यक्तशब्दसंघातोऽनुश्रूयेते । प्रशान्ते च कलकले पुनः प्रास्ताविकवाचिकं स्फारीभवति)

श्रुतं भवद्भिः ? अयं करुणचीत्कारः, अयं विद्रवपलायनध्वनिः, अयं सम्भ्रमोत्थघर्घरपुरस्सरो रवः, इमे च म्लिष्टास्पष्टशब्दाः ? हन्त भोः सर्वमेतत् प्रमाणीकरोति रणस्तम्भपुरविपत्तिं करालाम् ।

अये ! किमिदं नाम ? ऐते राजकुलचेट्यौ मानबाईमदिराभिधाने द्रुतपदैर्धावन्त्यौ इत एवागच्छतः । मन्येऽनयोर्वार्तालापेन तात्कालिकं वृत्तं राजकुलस्य ज्ञातुं शक्यते । तदहमपि दर्शकाणामुपकाराय दूरीभवामि (इत्यपक्रामति)

(ततः प्रविशतो वार्तालापपरायणे चेट्यौ)

मानबाई मदिरे ! किमिदानीं भविष्यति ? महतीयमनर्थपरम्पराऽस्माकं राजकुलं समुन्मूलयितुं प्रवृत्ता ।

मदिरा सखि ! अस्तङ्गताऽवयोर्भाग्यतारा । विनष्टे खलु राजकुले सर्वमेव विनष्टं प्रतिभाति ।

मानबाई (कोलाहलमाकर्ण्य वेपमाना)

मदिरे ! संकटापन्नाः प्राणाः । कोऽयं कोलाहलः ? दुर्गवासिनः पलायमाना इव दृश्यन्ते ?

मदिरा सुष्ठु त्वया तर्कितम् ! त्वमपि विलम्बं मा कार्षीः । यावकरंजितचरणा नववधूरिव चलसि । कथं न खलु क्षिप्रपदैर्मामनुगच्छसि ?

मानबाई (भयमनुभूय)

कथमेवं भणसि मदिरे ? सत्यं कथं नोद्घाटयसि ?

मदिरा अयि मूढे ! सत्यमेव दुर्गवासिनः स्वधनधान्यं परित्यज्य पलायन्ते । आवयोरपि पलायनमेव श्रेयस्करं प्रतिभाति ।

मानबाई अस्मत्स्वामिनी, राजदारिका देवलदेवी, स्वामी हिन्दुजातिप्रतिष्ठापनापटिष्ठः अन्ये च राजकुलसदस्याः क्व वर्तन्ते ?

मदिरा (सरोषम्)

व्यर्थमेव त्वं पितृभ्यां मानबाईति संज्ञिता । असाम्प्रतकारिणि ! सत्यमेव त्वम् अज्ञानबाईति भवितुमर्हसि । प्राणरक्षणमिदानीं सर्वप्रथमं चिन्त्यम् । त्वं पुनः प्रश्नोपरि प्रश्नं पृच्छसि ?

मानबाई (अश्रुक्लिन्नमुखी)

भवतु, न खलु प्रक्ष्यामि इदानीम् ।

मदिरा (मानबाईं करुणया निभाल्य प्रह्वीभूय)

सखि ! सर्वेऽपि राजसेवका भर्तृविनाशे बद्धपरिकरा वर्तन्ते । सेनापतिः रणमल्लो विजयानन्तरं त्वमेव रणस्तम्भपुरदुर्गनायको मया स्थापयिष्यस इत्युपच्छन्दितस्तेन धूर्ततुरुष्कसुरत्राणेन अलाउद्दीनेन स्वामिनं प्रवञ्च्य तत्साहाय्ये प्रवृत्तः ।

मानबाई (कातरीभूय)

अहो बत कल्पतरुं व्याधूय एरण्डं सेवतेऽसावधमः ? सर्वथा धिक् तमसमञ्जसकारिणं स्वामिद्रोहिणम् ।

मदिरा जाहडोऽपि कोष्ठागारिको दुर्गस्य प्रवञ्चको जातः । यद्यपि दुर्गस्य कोष्ठागारे बहुवर्षभोज्यम् अन्नादिभक्ष्यपदार्थजातं वर्तते । तथाप्यलाउद्दीनमंत्रणावशात् दुर्गेऽन्नाभावं मुधाऽघोषयत् स पापः । एतच्छ्रुत्वैव प्रजाः मृत्युभयादुद्विग्नाः सञ्जाता यथार्थमज्ञात्वैव समुपद्रुताः ।

मानबाई (सव्यथं साश्चर्यम्)

हा हन्त ! जम्बुका अपि वनराजपराभवे प्रसह्य क्षमन्ते ? विजयतामयं कालविपर्ययः !

मदिरा (सविषादम्) सखि ! एतत्सर्वं निभाल्य धर्मपरायणोऽस्मत्स्वामी हम्मीरसिंहदेवः कालगतिं निपुणं निरीक्ष्य, ईश्वरेच्छाञ्च बलीयसीं मत्वा जाहडप्रचारमुपेक्ष्य स्वयमेव प्रजाजनं दुर्गान्निर्गन्तुमादिशतिस्म । समुद्घाटितानि तेन दुर्गद्वाराणि !

मानबाई ज्ञातम् । इदानीं स्वामी किं कर्तुं व्यवसितः ?

मदिरा (विलपन्ती सदयम्)

यत्करोति स्वामी तद् दर्शयितुमेव त्वां तत्र नयामि । मया सह अन्तःपुरमासाद्य स्वयमेव पश्यसि ।

मानबाई (वेपमाना)

सखि ! स्पष्टं भण । किं वक्तुमिच्छसि ?

मदिरा किं भणामि मूढे ? प्रजाजनं दुर्गान्निर्गन्तुमादिश्य धैर्यतुहिनाचलो हम्मीरसिंहदेवः स्वयमन्तःपुरं प्रविश्य राजमहिषीं सान्त्वयन् प्रत्यभाषत-देवि ! सर्वमपि प्रत्यक्षन्ते ! अहमिदानीं स्वपूर्वपुरुषाणां चाहमानवंशभास्कराणां पृथ्वीराजचरणानां कीर्तिपताकामक्षतां विधातुं समराङ्गणे क्षिपाम्यात्मानम् । त्वमपि क्षत्रियललनाशीलसमुदाचारानुरूपं स्वकुलव्रतं जौहरं (जतुगृहम्) पालय ।

(करुणं परिदेवमाना)

मानबाइ ! स्वामिन्यपि पतिचरणधूलिं सीमन्ते निधाय तथेति प्रतिज्ञाय तत्क्षणमेव राजमन्दिरं प्रविष्टा ।

मानबाई (सचीत्कारं धावन्ती)

मदिरे ! तत्किं स्वामिनी जौंहरभूमौ समुपस्थिता ? कथं न त्वयैतत् प्रागेव स्पष्टीकृतम् ? हा दुर्दैव ! इदानीं जीविताऽपि किं करिष्ये ? स्वामिन्या सहैव वैश्वानरकुक्षौ प्रक्षिप्यात्मानं तदग्नपुष्टं शरीरं भस्मसात्करिष्यामि । हा स्वामिनि ! हा राजदारिके ! हा महाराज हम्मीरदेव ! अद्य अनाथा रोदिति मरुधरेयम् !

मदिरा (धावन्ती) सखि ! तिष्ठ तावत् । इयमहमपि आगच्छामि । मां विहाय मा गच्छ । सहैवाग्निशरणं गच्छावः । तिष्ठ तावत् ।

(उभे किञ्चदन्तरेण धावन्त्यौ राजमन्दिराभिमुखं गच्छतः)

॥ जवनिकापातः ॥

●

मात्मसुखाकांक्षिणम् ! भवतु सुहृद्धर्मपालनविघ्नकरं कुटुम्बं स्वखड्गेनैव नामशेषं करिष्यामि ।

(प्रकाशम्)

स्वामिन् ! यदि भवान् मां समराङ्गणं नेतुं न वाञ्छति तर्हि भवन्निदेशानुसारं स्वकुटुम्बेन सार्धं क्वचिदन्यत्र गमिष्यामि । परन्तु एकवारं तावत् स्वचरणरजोभिरस्मद्दारकान् स्वानुजवधूभूतां मदीयां पत्नीञ्च पुनातु भवान् । भवद्दर्शनं कृत्वैव वयं रणस्तम्भपुरान्निर्गन्तुमिच्छामः ।

हम्मीरसिंहः (द्रवीभूय महिमाशाहं निर्भरमालिङ्ग्य)

महिमाशाह ! मत्सहोदर !! स्वीक्रियते मयाऽयं प्रस्तावः । परन्त्वस्मिन् विपत्तिकाले निर्भूषणोऽकिञ्चनश्च जातोऽस्मि । खड्गमात्रसहायोऽस्मि सम्प्रति । स्वानुजभार्यायै वालकेभ्यो वाऽयं भूपालभिक्षुकः किमुपायनं दास्यतीति चिन्ता मां बाधते ।

महिमाशाहः नाथ ! भवद्दर्शनमेव महार्घतमम् उपायनम् ।

हम्मीरसिंहः भवतु ! अलं विलम्बेन । तुरुष्कसैन्यं दुर्गस्य सिंहद्वारं भञ्जयितुं प्रयतते । स्वयं द्वारं प्रोद्घाट्य मरणान्तकं युद्धं करिष्यामो वयम् ! गच्छाग्रतः । अहमप्यनुपदमागत एव ।

महिमाशाहः एतु एतु स्वामी ।

(इति निभृतनिभृतं दुर्गोद्यानवृक्षवीथीमतिक्रम्य चौरमार्गपुरस्सरन्तौ राजप्रासादमेकमुपगच्छतः । हम्मीरसहचराश्चापि सर्वे तत्र शनैरायान्ति)

महिमाशाहः (गृहान्तरं प्रविशन् तारस्वरेण)

स्वामिन् ! प्रतिपालयतु भवान् क्षणमेकम् । गृहिणीं वालकांश्चात्रैवानयामि !

हम्मीरसिंहः अलं त्वरया । गच्छ । वयमत्र स्थिताः प्रतिपालयिष्यामः ।

(महिमाशाहोऽभ्यन्तरं प्रविशति । गृहाङ्गणे पुञ्जीभूतं निखिलमपि कुटुम्बं स्वनग्नखड्गेन वधिक इव द्राक् घातयति । नेपथ्ये दारकाणां चीत्कारध्वनिः श्रूयते । महिमाशाहो रक्तरञ्जितं खड्गं

दक्षिणहस्ते निधाय सकम्पं बहिरायाति । सर्वे साश्चर्यं ससम्भ्रमं तं पश्यन्ति)

महिमाशाहः विजयतां विजयतां शरणागतवत्सलो रणस्तम्भपुराधीश्वरः । स्वामिन् ! समाहितानुरागा भवतामनुजवधूः दुर्ललिता भ्रात्रीयाश्च भवन्तं सन्द्रष्टुमुत्कण्ठिता गृहाङ्गण एव प्रतीक्षन्ते । तत्रैव भवन्तं नयनपाथेयीकर्तुमिच्छन्ति ते ।

हम्मीरसिंहः (रक्तरञ्जितं खड्गं निवर्ण्य सत्यमनुभूय सनिर्वेदम्) महिमाशाह ! किमिदमनुष्ठितं त्वया ? मूढ ! कुटुम्बसदस्यास्त्वया मन्निमित्तं घातिताः ? हा दैव ! हा भगवन् एकलिङ्ग !! तुरुष्कवंशजातोऽप्ययं हृदयसहचरो मे क्षत्रियपरम्परामतिक्रान्तः ?
(सचीत्कारं महिमाशाहं निर्दयमाश्लेष्य विलपन् गृहाङ्गणं प्रविशति । तत्र रक्तरंजितान् निष्प्राणान् स्त्रीपुत्रान् विलोक्य मस्तकं कराभ्यां ताडयन् भूमावुपविश्य विलपति)

महिमाशाहः (अविचलधैर्यमभिनयन्)
स्वामिन् ! साम्प्रतं स्वानुजमिमं युद्धार्थमनुमन्यतां भवान् । भवदनुसरणान्तरायीभूतः कुटुम्बो मया भगवद्गृहे साधु संरक्षितः । सर्वथा भवानिवैकाकी वीतचिन्तोऽस्म्यहमपि । इदानीं स्वशरीरस्य एकैकेनापि रक्तकणेन भवदृणं निर्यातयितुं समीहे ।

हम्मीरसिंहः (समुत्थाय सधैर्यम् खड्गरुधिरेण महिमाशाहललाटे तिलकितं विधाय)
महिमाशाह ! त्वन्तु रणाङ्गणे स्वप्राणान् विसर्ज्यात्मानमनृणं विधास्यसि । परन्तु वीर ! मन्मैत्रीरक्षणार्थं यत्साहसं त्वयाऽनुष्ठितं जन्मान्तरशतैरपि हम्मीरोऽयं तन्निर्यातयितुं न शक्ष्यति ।
(स्वोत्तरीयं प्रयच्छन्)
गृहाणेदं काषायवस्त्रम् । इदानीं परमार्थतः क्षत्रियोऽसि संवृत्तः ।
(महान्तं कलकलध्वनिमाकर्ण्य)
मन्ये दुर्गद्वारं भग्नप्रायम् । वयं सर्वेऽपि कृतान्तीभूय योत्स्यामः । तत्साम्प्रतं प्रस्थातव्यम् । हर हर महादेव ऽ ऽ ऽ ऽ ।
(सर्वेऽपि चण्डस्वरेण हम्मीरनादमनुवदन्तः प्रतिष्ठन्ते)

॥ जवनिकापातः ॥

❁

।। द्वितीयं दृश्यम् ।।

महाराजो हम्मीरसिंहदेवः कषायवस्त्राणि परिधाय शस्त्रास्त्रसज्जितैः पञ्चशौर्वीरैः सह रणार्थं प्रतिष्ठमानो दृश्यते । तच्छरणागतो मुगलवीरो महिमाशाहस्तत्पथमवरुध्य तिष्ठति । राजमन्दिरप्राङ्गणे जौहराग्निधूमबिम्बः परिलक्ष्यते ।

हम्मीरसिंहः वीर महिमाशाह ! किमेवं कातरीभवसि ? अलं निर्बन्धेन । मन्मन्त्रणामङ्गीकृत्य इतोऽपि दूरं किमपि सुरक्षितस्थानं गच्छ । स्वकुटुम्बरक्षां चिन्तय । यदि नाम समरभूमौ प्राणान्न त्यक्ष्यामस्तर्हि पुनर्मेलनं भविष्यत्येव ।

महिमाशाहः (करुणं विलपन् हम्मीरचरणयोर्निपत्य)

महाराज ! क्षत्रियकुलभूषण ! शरणागतवत्सल !! ममैव दुर्भाग्यशीलस्य कारणादियं विपत्तिः रणस्तम्भपुरवैभवं विनाशयितुं प्रवृत्ता । भवान् पुनः । (इत्यर्धोक्ते)

हम्मीरसिंहः मा मैवम् । महिमाशाह! शरणागतरक्षणन्तु कुलव्रतं क्षत्रियाणाम् । भारतीयानां कृते नात्र किञ्चिद्वैलक्षण्यम् ! महाराजः शिविः कपोतप्राणरक्षार्थं स्वशरीरमांसमपि निकृत्य प्राददात् ! दशरथनन्दनो रामो रावणं निहत्य शरणागतं तदनुजं विभीषणं लङ्कापतिं विदधे । सुग्रीवं शरणागतं स सर्वथा निरातङ्कं चकार ।

महिमाशाहः (गद्गदीभूय) महाराज·······!

हम्मीरसिंहः बन्धो ! मयाऽपि अलाउद्दीनभयविह्वलाय भवते शरणं प्रददता स्वजातिकुलव्रतमेवानुष्ठितम् । नात्र किमपि शोचनीयम् । भवन्तमसुरक्षितं मुञ्चामीति अहमेवास्मि शोचनीयः संवृत्तः ।

महिमाशाहः (सानुनयम्)

स्वामिन् ! वर्षत्रयं मया मत्सहचरैश्च भवत्सान्निध्ये व्यतीतम् । भवदन्नपुष्टान्यस्माकं शरीराणि । दृष्टमस्माभिः क्षत्रियाणां पौरुषराजनयज्ञानं मानवोचितं प्रेम च । इदानीं तु मनसा भावनया कामनया च वयं सर्वे हिन्दुत्वमापन्नाः । सर्वथाऽनुजकल्पोऽस्मि ।

तदग्रजेन सार्धं समराङ्गणविक्रमं प्रदर्शयितुं कथमनुजोऽयं निषेध्यते ? वयमपि भवन्तमनुगमिष्यामो रणभूमावित्यस्माकं दृढो निश्चयः ।

(इति रोदिति पटाञ्चलेन मुखमावृत्य)

हम्मीरसिंहः (महिमाशाहं बाहुभ्यां निर्भरं निपीड्य)

महिमाशाह ! अवैमि ते हृदयपरिवर्तनम् । अहमिव त्वमपि मानवधर्मपक्षधरोऽसि जातः । ममेव तवापि कृते न कोऽपि हिन्दुर्नवा तुरुष्कः । सर्वेऽपि एकस्यैव जगन्नियन्तुः कलाकृतयः । अतएव भूमिविजयकामनया स्वधर्मस्थापनकामनया वा निरीहाणां भटानां विनाशो न युज्यते कर्तुम् । किन्तु रक्तपिपासुरलाउद्दीनो नैतद्रहस्यं विजानाति ।

महिमाशाहः महाराज ! समराङ्गणे एतद्रहस्यमहं तं दुरभिमानिनं सम्यगवगमयिष्यामि । कृपया मिथः प्रस्थाने मामपि अनुमन्यताम् ।

हम्मीरसिंहः (सोपलालनम्)

सुहृद्वर्य ! कुटुम्बरक्षणं तव प्रथमं कर्तव्यम् । पश्य, इदानीमहमेकाकी । राजमहिषी मे जौहरज्वालायां भस्मीभूता । प्राणाधिका मे दुर्ललिता दुहिता देवलदेवी जनन्या सममेव विनष्टा । निखिलमप्यन्तःपुरमकारणमेव समाप्तम् । कुमारोऽवशिष्टः कुत्रापि संरक्ष्यते राजभक्तैर्मत्सेवकैः । इदानीं तु पञ्चषा येऽपि वीरा मत्सार्धं वर्तन्ते ते सर्वेऽपि मृत्युमुखे प्रविष्टाः ।

तर्हि निरर्थकं प्रतिभाति मे त्वत्साहसम् । गच्छ, स्वभार्यां दारकांश्च कुत्रापि सुरक्षितस्थानं नय । मय्युपरते राजकुमाररक्षणं कुरु । अयमेव ममादेशः ।

(उष्णं निःश्वस्य नयनाश्रूणि च पटाञ्चलेन प्रमृज्य)

शिव ! शिव !

महिमाशाहः (निरुत्तरीभूय आत्मगतम्)

कुटुम्बरक्षणार्थमेव रावहम्मीरो मां युद्धार्थं नानुमन्यते । अहो ! ममाधमस्य कृत एवायं नरशार्दूलस्तेन तुरुष्कापसदेन पापिनाऽलाउद्दीनेन छलप्रवञ्चनाधर्मपूर्वकं समुच्छिद्यते ! सर्वथा धिङ्मा-

राजराजौदार्यम्

सर्वस्वं हरताऽपि गाढरुदितं दृष्ट्वा रतेरार्जवात्
प्रद्युम्नार्थितवल्लभो मनसिजस्तस्यै पुनश्चार्पितः।
दाक्षिण्ये विधुशीतलो व्यतिकरे वैरायितेऽग्निर्ज्वलद्
चञ्चच्चोलनृपालपूजितपदो गंगाधरः पातु वः ॥१॥

अपिच

व्याधुन्वत्प्रतिपक्षिपाण्ड्यविभवं कर्णत्प्रकर्णं रणे
बाङ्गीमप्यवनीं जयन्तमनिशं पाथोधिपोतव्रजैः।
प्रज्ञाधर्मनयैश्च दक्षिणभुवं सन्धारयन्तं मुदा
पातु श्रीबृहदीश्वरोऽयमनिशं तं राजराजं नृपम् ॥२॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः। पुष्पाञ्जलिं विकीर्य सप्रणामम्)

परमाराध्यश्रीबृहदीश्वरदेवालयस्य कुम्भाभिषेकपर्वणि समायातां पण्डितपरिषदं प्रजाजनसमज्याञ्च युगपत् प्रणमामि। अयि भो मदुराश्रीरंग-त्रिशिरःपुरीकाञ्चीचिदम्बरादिचोलावनीवास्तव्याः सहृदयाः भवताम्मनो-विनोदाय तञ्जापुरस्थरंगवेलानाम्नी राजराजेश्वरसंरक्षितेयं नाट्यपरिषद् प्रस्तौति लघुरूपकं राजराजौदार्यं नाम। कथावृत्तमस्य लघुरूपकस्य किञ्चित् कालपूर्वमेव बृहदीश्वरमन्दिरनिर्माणसन्दर्भे घटितमिति निश्चप्रचं संवर्ध-यिष्यति भवतामुत्कण्ठाप्ररोहकन्दलनम्।

तद्यावत् गृहाभ्यन्तरीभूय नाट्यप्रयोगविघ्नेश्वरीं स्वसहचरीं पश्यामि कस्माच्चिरयतीति। तावत्सङ्गीतकेन कर्णशष्कुलीं पावयन्तु भवन्तः।

(इति गृहाभ्यन्तरं प्रविशति। नेपथ्ये संगीतलहरी श्रूयते)

प्रणमामि तं बृहदीश्वरम्!
तञ्जापुरीश्वरमीश्वरं चोलाधिपेश्वरमीश्वरम्!!
काञ्चीपुरे पृथ्वीमयं श्रीरङ्गतीर्थे जलमयम्।
अरुणाचले च मरुन्मयं खमयं नमामि चिदम्बरम्!!
ज्योतिर्मयं किल कालहस्तिनि पञ्चतत्त्वसमन्वितम्
गिरिजाधवं वृतमाधवं प्रणमामि तं जगदीश्वरम् ॥३

(संगीतलहरी क्रमेण । क्षीणायते विवदमानौ नटीसूत्रधारौ प्रविशतः)

सूत्र० देवि ! त्वमधरोत्तरं न विजानासि ! पलमात्रे गृहं भस्मसाद् भवति, त्वं पुनः सार्धद्विघटिकां यावत् भद्राभरणीं कथयसि ! संमुखीने सति पण्डितप्रकाण्डसमाजे कोऽश्नाति व्यञ्जनं पिवति वा पानकम् ?

नटी० (वैलक्ष्यमनुभवन्ती)

भवतु नाम ! अहमेव भवदनामयचिन्तयेदानीमुपसाहपात्रता-मागताऽस्मि । हन्तभोः

नटेन्द्रगृहणीभूता दूये नित्यं विपन्मयी ।
पट्टराज्ञीव कामाक्षी राजराजेश्वरप्रिया ।।४

(इति प्रस्तावना)

(ततः प्रविशति यथोक्तव्यापारा पट्टराज्ञी कामाक्षी सखीभ्या-मनुगता)

रुचिरा (अनुनयन्ती)

देवि ! विजहि कोपम् । वृहदीश्वरेऽर्पितसर्वस्वोऽस्मन्महाराजो नः स्मरतीदानीं पौर्वापर्यम् ।

मदिरा युक्तमाह रुचिरा देवि ! न युक्तमनागसि कान्तेऽदाक्षिण्यमनु-भवितुम् ।

कामाक्षी सखि ! एतदेव शल्यीभूतम्मे यद् राजराजस्य बहुषु करणीयेषु मम गणनापि नास्ति ? तद् वृथैव लालयति मामेकान्ते इति ज्ञातम्मया व्यलीकाचरणं तस्य ।

रुचिरा मामैवं सखि ! एकान्ते यस्तवाननेन्दुसिन्धुस्स एव सर्वजनसमक्षं चोलवंशभास्करो दक्षिणावनीराजराजेश्वरः ।

मदिरा प्रकाशमपि तावद्राजमहिषीं निजोत्सङ्गमधिरोप्य लालयतु चोलनरेन्द्र इति वाञ्छत्यस्मत् प्रियसखी ।

(इत्युभे सख्यौ साभिनयमुपहसतः)

कामाक्षी (सस्मितम्)

अय्यनियंत्रितवदने ! बहु प्रमाद्यसि । किमेतावती मूढाऽस्मि जाता ?

राजराजौदार्यम्

(ऐतिहासिकम् एकाङ्किरूपकम्)

पात्रपरिचयः

सूत्रधारः	(कथाप्रयोजकः)
राजराजः	(चोलभूपतिः)
किञ्जल्कः	(वृद्धकञ्चुकी)
बन्धुरः	(राजपुरुषः)
सेनापतिः	(राजराजस्य)
महामात्यः	(राजराजस्य)
पुरोहितः	(पणार्गलग्रामस्य)
कामाक्षी	(राजराजमहिषी)
रुचिरा मदिरा	सख्यौ
आलकी	(पणार्गलग्रामस्य काचिद् वृद्धा)

कथासार

साहित्य अकादमी (नई दिल्ली) की एक परियोजना के अन्तर्गत मैं २५ दिसम्बर ८५ से १८ जनवरी ८६ तक तमिलनाडु की यात्रा पर रहा। मेरा प्रमुख कार्य था इस प्रान्त के प्राख्यात नगरों या केन्द्रों में संस्कृत की वर्तमान स्थिति को देखना तथा अपनी रचना-प्रक्रिया से वहाँ के विद्वज्जनों को अवगत कराना। इस क्रम में मैंने मद्रास, पाण्डिचेरी, मदुरै, त्रिचुरापल्ली श्रीरंगम, तञ्जावुर, चिदम्बरम तथा काञ्ची आदि की यात्रा की।

९ जनवरी ८६ को मैं चोलवंश की कीर्तिस्थली तञ्जापुरी (तञ्जौर) पहुँचा। होटल में शरण लेने के बाद ही मै विश्वप्रसिद्ध बृहदीश्वर मन्दिर देखने गया। दूसरे दिन पुनः गया, तीन-चार घंटे वहाँ रहा और सूक्ष्म दृष्टि से मन्दिर का स्थापत्य देखता रहा।

बृहदीश्वर मन्दिर चोलवंश के प्रतापी सम्राट् राजराजने सन् १००३ ई० में बनवाना प्रारम्भ किया जब वह ३५ वर्ष का था। १००९ ई० में यह पूर्ण हुआ। इस देवालय की ऊँचाई २०० फीट है। इसका प्राकार ८०० फिट लम्बा तथा ४०० फिट चौड़ा है। ग्रेनाइट पत्थरों से निर्मित, यह अद्भुत मन्दिर सम्भवतः भारत की प्राचीनतम कलाकृति है।

विमान-मण्डप के ऊपर स्थापित स्तूपाकार पत्थर ८० टन का है। यह अकेला एक पत्थर सम्राट को अलगी नाम की एक वृद्धा ने दिया था जिसके बदले राजराज ने उसे एक सरोवर तथा बाग दिये थे।

यही ऐतिहासिक तथ्य इस एकाङ्की का मूल-स्रोत है। पनगल गांव की बुढ़िया अलगी ही इस एकांकी में पणार्गल ग्राम की आलकी है। आलकी एवं राजराज के अतिरिक्त शेष समस्त पात्र कल्पित हैं। राजराज इतना विनम्र एवं उदार था कि वह शिलाखण्ड माँगने के लिए स्वयं आलकी के पास गया। उसने बल-प्रयोग नहीं किया। इस घटना से राजराजेश्वर की उदारता एवं सदाशयता का बोध होता है।

देवनिदेशात् बृहदीश्वरमन्दिरशिखरोपस्थापनयोग्यं सुविशालमखण्डितमजीर्णमनाविद्धमशवलं मसृणमसृणं परुषपरुषं शिलाखण्डं मार्गयद्भ्यामावाभ्यां चोलसाम्राज्यस्य बहूनि जनपदानि निपुणं दृग्गोचरीकृतानि ।

राजराजः (सानुशंसम्)

एवम् ? ततस्ततः ?

बन्धुरः महाराज ! ततो नु विविधगिरिशिखरेष्वपि अनुपलब्धं तादृशं शिलाखण्डमनायासमेव एकस्मिन् ग्रामटिकोद्यानपरिसरस्थे शिखरिणि सन्दृष्टमावाभ्याम् ।

राजराजः (सहर्षम्)

साधु साधु ! क्व वर्तते तत् शिलाखण्डम् ?

बन्धुरः देव ! तञ्जापुराभ्यर्णचरे पणार्गलग्राम एव कस्याश्चित् आलकीनाम्न्या वृद्धाया अधिकारे तिष्ठति ।
(इति नताननो मौनमवलम्बते)

राजराजः बन्धुर ! एतत् सर्वमभिप्रेतं सम्पाद्यापि किमिति मौनमवलम्बसे ? कथं नानीतं तच्छिलाखण्डम् ?

बन्धुरः देव ! कथयितुं बिभेमि ! सा वृद्धा कथमपि शिलाखण्डं दातुं नोत्सहते ।

राजराजः (साश्चर्यम्)

दातुं नोत्सहते? किमिदं वक्षि? देवकार्येऽपि विरुध्यति चोलदेशप्रजेति विस्मितोऽस्मि ! जरती किं ब्रूते ? किम् (इत्यर्धोक्ते)

सेनापतिः (सादरं समुपसृत्य)

देव ! चोलेश्वर ! अनुजानातु मां तत्र गमनाय ! इदानीमेव बलादानयामि शिलाशकलम् ।

राजराजः (सस्नेहम्)

भद्र सेनापते ! अलं त्वरया । सावशेषम्मे वचः । बन्धुर ! जरती किं ब्रूते ? किमाकाङ्क्षयते तया ।

बन्धुरः स्वामिन् ! आवाभ्यां बहूपच्छन्दिता सा । तथापि निर्बन्धपरुषा सा कथयति यत् (इत्यर्धमुक्त्वा शिथिलीभवति)

राजराजः अलं भयेन संकोचेन वा । सर्वथाऽविशङ्कं वक्तव्यम् । सा कथयति यत् ?

बन्धुरः यत् स्वयमेव यदि चोलेश्वरोऽस्मत्कुटीरमेत्य शिलाखण्डं याचते तदैव दास्यामि । अन्यथा मां हत्वैव नेतुं शक्यते ! श्रुत्वा देवः प्रमाणम् !

सेनापतिः (सरोषम्)

इदानीं किमाज्ञापयति स्वामी ?

महामात्यः अहो ! प्रागल्भ्यं वृद्धायाः । कथमेवं जल्पते ?

राजराजः (विचार्य सस्मितम्)

भद्र सेनापते ! वृद्धाऽसौ मत्कृते जननीसभा । मन्ये वात्सल्यमूलोऽयं तस्या निर्बन्धः । अतएव मातुस्समीपे पुत्रस्यैव गमनं युक्तं प्रतिभाति । अतएव इदानीमेवास्मद्यात्राप्रबन्धं सम्पादय ।

सेनापतिः (प्रह्वीभूय साश्चर्यम्)

विजयतां राजराजेश्वरः । देव ! सर्वथाभिनवमनुष्ठीयतेऽत्रभवता । अहो ! सामान्यवृद्धां प्रत्यपि एतादृशी श्रद्धा ?

महामात्यः राजराजेश्वर ! अद्भुतमेव संवृत्तम् । युक्तरूपमिदं चोलमहीपतीनाम् ।

(राजसभायां सर्वत्र जयजयध्वनिरुत्तिष्ठति । गवाक्षमार्गेभ्योऽन्तःपुरिकाः पुष्पवर्षं कुर्वन्ति)

॥ जवनिकापातः ॥

(ततः प्रविशति लेखहस्तो वृद्धकञ्चुकी)

कञ्चुकी जयतु जयतु राजमहिषी । देवि ! महनीयराजकार्यव्यापृतः स्वामी मध्याह्ने राजमन्दिरमागन्तुमशक्यो लेखमिमं भवत्यै विसृजति । तदनुगृह्णातु स्वामिनीमं सेवकं लेखादानेन ।

(इति लेखमर्पयति सप्रणामं गच्छति च)

सख्यौ किं लिखितं चोलेश्वरेण ? दर्शय सखि ! किं लिखितम् ?

कामाक्षी (सस्नेहम्)

अलमहमहमिकया ! रुचिरे गृहाण । त्वमेव पठ । शृणोमि तावत् चोलनाथस्य सव्याजव्याहरणम् ।

(रुचिरा सकौतुकं साभिनयञ्च वाचयति)

स्वस्ति ! राजराजो विज्ञापयति देवीम् । मध्याह्नेऽद्य शिवगंगोद्यानविहारार्थं दत्तवागपि न शक्नोम्यागन्तुम् । मन्ये दूयते भवती । प्रिये ! अलमन्यथा संभाव्य ! त्वन्मुखाम्बुजरोदरभूतस्य राजराजस्य क्वान्यत्र चित्तविश्रान्तिः ?

बृहदीश्वरमन्दिरस्य विमानोष्णीषभूता पाषाणशिलैका कस्याश्चिद् वृद्धाया अधिकारे तिष्ठतीति सूचितं रक्षिभिः । सा पुनस्तां शिलामस्मद्याचनमन्तरा कथमपि दातुं नोत्सहते । तदेव वृत्तं सविस्तरं परिज्ञातुं सभाभवनमिदानीं गच्छामि । न चेदन्यकार्यातिपातस्तर्हि त्वमपि गवाक्षमागत्य तद्वृत्तं प्रत्यक्षमाकर्णय ।

रुचिरा श्रुतं दृष्टं व्यलीककोपवे ! सत्यसन्धं राजराजेश्वरं वृथैव शंकाभिराविलयसि ?

कामाक्षी रुचिरे ! किं करोमि ? शङ्काकातरैव स्त्रीजातिः । तत्रापि पुनः सपत्नीर्ष्याकलुषितचित्तवृत्तीनां राजमहिषीणां का कथा ?

मदिरा देवि ! मध्याह्नवेलाऽतिक्रामति । मन्ये धर्मासनमधितिष्ठति राजराजेश्वरः । तद्गवाक्षमुपेत्य पत्रलिखितं संविधानकं द्रष्टव्यम् ।

कामाक्षी युक्तं भणसि । ममाप्यस्ति कौतूहलम् ।

(इति सर्वाः प्रतिष्ठन्ते)

॥ इति विष्कम्भकः ॥

(ततः प्रविशति धर्मासनस्थश्चोलेश्वरो राजराजः)

वैतालिकः (राजराजस्य दक्षिणभागे तिष्ठन्)

सामुद्री लोलवेला कलयति नितरां यद्यशःसामगानं
कावेरी पूततोया विशदयति गुणान्न्यायधर्मार्जिताद्यान् ।
सन्धत्ते नारिकेलीवनरमणपटुः कीर्तिगन्धं समीरो
वीरोऽसौ राजराजो भवतु भुवि नवो देवराजोऽतिराजः ॥५

अपिच,

क्वेदानीं शौर्यगाथा श्रयति भुवमिमां हन्त ! गुप्तेश्वराणां
क्वाशोकी धर्मगाथा क्वच विनयकथा वैक्रमार्की चकास्ति ।
हार्षी वा दानशंसा गुणकनकगिरौ चोलपे राजमाने
क्वेदानीं सर्वपादाः शमितरिपुकथे हस्तिपादे निमग्नाः ॥६

(राजसभायां परितः साधुसाधुध्वनिः प्रभवति । राजराजेश्वरो रत्नमालां कण्ठान्निस्सार्य वैतालिकाय प्रयच्छति)

कञ्चुकी (समुपसृत्य सादरम्)

जयतु जयतु चोलेश्वरः । देव ! एतौ राजरक्षिणौ स्वामिनियोगमनुपाल्य किञ्चिन्निवेदयितुकामौ प्रतीहारभूमिमुपस्थितौ । श्रुत्वा देवः प्रमाणम् ।

राजराजः किञ्जल्क ! गच्छ सत्वरम् । आत्मनैव सार्धं प्रवेशय तौ ।

कञ्चुकी यथाज्ञापयति राजराजेश्वरः ।

(इति निष्क्रम्य रक्षिभ्यां सह पुनः प्रविश्य)

भद्रौ ! एष सावधानमनाश्चोलेश्वरो युवां प्रतीक्षते । उपसर्पतं तावत् ।

(इति शनकैरपक्रामति)

राजराजः अस्ति कश्चिद् विशेषः ? बन्धुर ! त्वमेव तावद्भण ।

बन्धुरः (सादरम्)

आलकी न केवलमेतद् । महाराज ! मन्निर्बन्धं श्रुत्वा चोलेश्वरो बलप्रयोगं करिष्यति बुद्धिप्रयोगं वेत्यपि परीक्षणीयमासीत् । परन्तु ममाभिप्रायमनुभवता यदनुष्ठितं त्वया तन् सर्वथा चोलान्वयानुरूपमेव ! राजन् ! सर्वथा चिरञ्जीव !

राजराजः मातः ! इदानीं परीक्षोत्तीर्णोऽस्मि त्वद्वात्सल्यप्रभावतः । ब्रूहि किमाकांक्ष्यते त्वया शिलार्थम् ?

आलकी राजराजेश्वर ! पुत्रीभवन्नपि जनन्यै शिलामूल्यं दातुमिच्छसि ?

राजराजः अम्ब ! पुत्रः सन्नपि चोलप्रजापतिरस्मि । राजागमनं निरर्थकं न भविष्यति !

आलकी आयुष्मन् ! यथाभिरुचितं सम्पादय । शिवार्चनं विहाय न मे काप्याकांक्षा ।

राजराजः मातः ! पणार्गलग्रामे त्वन्नाम्नैव ख्यातं सरोवरमेकमुद्यानमेकञ्च निर्मापयिष्यामि ।

(ग्रामीणा जयध्वनिमुच्चारयन्ति)

राजराजः मातः ! न केवलमेतदेव । यथा मत्कृते बृहदीश्वरदेवस्थानमिदं राजते तथैव त्वत्कृतेऽपि इरावतीश्वरदेवस्थानं विधास्ये । येन मज्जननीभूता त्वं तुल्यवैभवा भूयाः ।

(महामात्यं प्रति)

महामात्य ! मन्निदेशान् यथाशीघ्रमनुवर्तयतु भवान् ।

(आलकीं प्रति)

मातः ! इदानीमनुजानीहि मां तञ्जापुरगमनाय । बृहदीश्वरमन्दिरस्य कुम्भाभिषेकपर्वणि मत्प्रेषितं रथमारुह्य अवश्यमेवागच्छतु भवती ।

(इति चरणद्वयं स्पृशति)

आलकी (स्वपटाञ्चलं राजराजोपरि विन्यस्य)

अद्य त्वयापुनः पुत्रवती सञ्जातास्मि । नेदानीं निदाघपुष्करिणी । न मे शोषः संभाव्यते सम्प्रति ! महाराज ! पुत्रक ! त्वयाऽकाल-जलदेन पुनः वात्सल्याम्बुभरितास्मि ! गच्छ शिवास्ते पंथानस्सन्तु ।

(राजराजो रथारोहणं नाटयति । जयध्वनिः प्रसरति)

॥ जवनिकापातः ॥

॥ द्वितीयं दृश्यम् ॥

तञ्जापुरसमीपस्थे पणार्गलारख्यग्रामे दृश्यते महानुत्सवः। राजधान्यभिमुखे मार्गे रसालपल्लवालङ्कृतं विशालतोरणम्। तोरणमभितः नारिकेलकुशाक्षतमण्डितौ कलशौ स्थापितौ। तोरणसमीपमेव वृद्धाया आलक्याः पर्णकुटीरं दृश्यते। सर्वेऽपि ग्रामीणा राजराजेश्वरराजराजागमनं प्रतीक्षमाणास्त्वरया गतागतं विदधति। श्वेतवस्त्रा वृद्धालकी कुटीरद्वारसमीपं ग्रामनारीभिस्सार्धं तिष्ठति।

(नेपथ्ये संगीतध्वनिः)

जयति जयति खलु चोलधरित्री !
योगक्षेममयी मधुवाता मधुसलिला मधुफलजनयित्री!!
चरणचारणो जलधिरगाधो वसुधेयं रत्नप्रसवित्री !
नारिकेलतरुविजयपताका कदलीवनयौवना सवित्री ॥६

(अकस्मादेव जनसम्मर्दे कोलाहलध्वनिः स्फारीभवति। चोलनरेन्द्रस्य जैत्ररथः शनैः शनैः समीपमागच्छन् दृश्यते। सर्वत्राऽपि जयजयध्वनिः। ग्रामनार्यः कलशदीपानुत्थाप्य स्वागतार्थं सन्नद्धा भवन्ति। ग्रामपुरोहितास्तारस्वरेण वेदमंत्रानुच्चारयन्ति। क्वचिद्वाद्यं, क्वचिन्नर्तनं क्वचिद् गीतञ्चापि श्रूयते

चोलनरेन्द्रस्य रथस्तिष्ठति। महाराजस्सेवकमालम्ब्य रथादवतरति। महामात्यसेनापतिसामन्तादयस्सर्वेऽप्यवतरन्ति।

स्वागतविधानं क्रमेण समाप्तिमेति। विजयतां राजराजेश्वरश्चोलराज इति चण्डध्वनिः श्रूयते परितः।)

राजराजः (निपुणं निरीक्षमाणः)

अयिभोः क्व वर्ततेऽस्मज्जननी वृद्धालकी ?

पुरोहितः (सादरं प्रह्वीभूय)

विजयतां प्रजानाथः ! राजन् ! सेयमस्मद्भाग्यसूर्योदयविधात्री ग्रामदेवी आलकी भवन्तं प्रतीक्षमाणा तिष्ठति । इत इतो देवः ।

(इति आलकीपर्णकुटीरसरणिं निर्दिशति)

राजराजः (सत्वरमालकीसमीपमुपसर्प्य सचरणस्पर्शम्)

मातः पूज्यचरणे ! अयं ते पुत्रश्चोलराजस्सादरं प्रणमति ।

आलकी (अश्रूणि विमोचयन्ती, स्नेहेन गाढीभूय)

चिरञ्जीवतु मे पुत्रकः । शतञ्जीवतु मे पुत्रकः । हन्तभोः किम्पुण्यमनुष्ठितम्मया पूर्वजन्मनि येन चोलराजो मां दीनहीनां दुर्भाग्योपहतां वृद्धां जननीं ब्रूते ! हे जगदीश्वर ! अक्षय्या भवेन्मम पुत्रकस्य कीर्तिश्रीः !

राजराजः मातः ! अलं दैन्येन । इतःप्रभृति त्वं मम जनन्येवासि जाता । इदानीं त्वत्पुत्राधिकारेणैव बृहदीश्वरविमानोचितं शिलाखण्डं त्वदीयं याचे !

आलकी (सस्मितम्)

महाराज ! राज्ञ एव सम्पत्तिं प्रजा भुनक्ति । निखिलाऽपि चोलावनी भवदधिकारे तिष्ठति । का कथाऽस्य शिलाखण्डस्य !

राजराजः मातस्तत्कथं रक्षिणो निवारितो त्वया ?

आलकी (सवात्सल्यम्)

पुत्रक ! केवलं त्वद्दर्शनार्थम् । मम एकल एव पुत्रश्चोलसैन्ये स्थापितः युद्धभूमौ वीरगतिमवाप । ततःप्रभृति पुत्रविरहे निदाघपुष्करिणीव शनकैः शुष्यामि । कः मां प्रवेशयेद्राजधान्याम् ? शिलाखण्डमहिम्नैव सौवर्णोऽयमवसरः सम्प्राप्तो मया ।

राजराजः (सहासम्)

मातः ! इदानीं ज्ञातं सर्वम् । सर्वथा वीरप्रसविनी वात्सल्यमयी वन्द्यचरणाऽसि मत्कृते ।

को विजयते नैव ज्ञातम् !

(ऐतिहासिकम् एकाङ्किरूपकम्)

पात्रपरिचयः

सूत्रधारः	(कथाप्रयोजकः)
मारिषः	(सूत्रधारसहचरः)
नटः	(,, ,,)
चोलः	(तञ्जोरनिवासी कश्चित्)
मालवः	(धारानिवासी कश्चित्)
भोजराजः	(धाराधिपतिः)
प्रतीहारी	(भोजराजस्य)
राजपुरुषः	(भोजराजस्य)
कुविन्दः	(धारानिवासी कश्चित्)
राजराजः	(तञ्जापुराधिपतिः)
धर्माधिकारी	(राजराजस्य)
राजपुरुषः	(राजराजस्य)
स्थपतिः	(बृहदीश्वरमन्दिरस्थपतिः)
डॉ० चण्डिकाप्रसादशुक्लः	(निर्णायकसमितिप्रवरः)

कथासार

प्रयाग संगीत-समिति में आयोजित 'लघुनाटक प्रतियोगिता के समारोह में संस्कृत-एकाङ्की को विजयते नैव ज्ञातम् का मञ्चन हो रहा है ! नान्दीश्लोक में वाराणसी की तुलना में प्रयाग की श्रेष्ठता उद्घोषित की जाती है। सूत्रधार नाटक की भूमिका बांध ही रहा है कि उसे नेपथ्य से नट और मारिष के झगड़ने का स्वर सुनाई पड़ता है। मल्ल का अभिनय करने के लिये दोनों अपनी योग्यता स्थापित करने में लगे हैं। सूत्रधार उन्हें डाँटता है और इसी सन्दर्भ में वह चोल-मालव विवाद को संकेतित करता है।

चोल तथा मालव क्रमशः तञ्जोर तथा धार के निवासी है। दोनों अपने-अपने प्रदेश की श्रेष्ठता सिद्ध करना चाहते हैं ! मालव कहता है मेरे देश में तो कभी एक सामान्य जुलाहा भी उत्कृष्ट संस्कृत कवि हुआ करता था। चोल इसका उत्तर देते हुए कहता है कि मेरे प्रदेश में तो एक मामूली स्थपति (राजगीर) भी त्रिकालदर्शी ज्योतिर्विद होता था !

दोनों अपनी-अपनी स्थापना को रंगमंच पर क्रमशः अभिनय के माध्यम से प्रस्तुत करते हैं। सर्वप्रथम राजा भोज के दरबार में कुविन्द प्रस्तुत होता है और बताता है कि वह निरक्षर तथा मूर्ख नहीं है। वह अपने कवित्व को प्रत्यक्ष सिद्ध करता है।

दूसरा दृश्य है राजराज चोल की सभा का जिसमें एक स्थपति अपराधी के रूप में लाया जाता है। उसने वृहदीश्वर मन्दिर की उत्तरी दीवाल में एक टोपधारी अभारतीय व्यक्ति को उत्कीर्ण कर दिया था जो विधर्मी प्रतीत होता था। पूछे जाने पर वह बताता है कि सुदूर भविष्य को अपनी ज्योतिर्विद्या से देख कर ही उसने इस व्यक्ति को निर्मित किया है। वह बताता है कि अबसे प्रायः एक सहस्र वर्ष बाद इसी वेष-भूषा के लोग (अंग्रेज) यहाँ शासन करेंगे।

दोनों दृश्यों की प्रस्तुति के बाद निर्णायक-समिति के अध्यक्ष डॉ० चण्डिकाप्रसाद शुक्ल जी दर्शकों को निर्णय सुनाते हैं। यह निर्णय विचित्र किन्तु रोचक है। वह निर्णय है—कौन, जीता ज्ञात नहीं !

को विजयते नैव ज्ञातम् !

वेष्टन्ते नीरधारास्तरणितनुभवं यत्र देवापगाया-
स्तप्तं सृष्टिप्रपञ्चात्प्रथमतरमपि ब्रह्मणायत्र शक्त्यै ।
ब्रह्माण्डे तोयमग्ने श्रयति वटदलं यत्र डिम्भो मुकुन्दः
वैकुण्ठोऽकुण्ठपुण्यो भरतभुविजयेत्तीर्थराजप्रयागः ॥१

अपिच

दत्ते मुक्तिं मृतेभ्यस्त्रिपुरहरपुरी चेदव्यलीकाभिमानः
नो पश्यामोऽत्र चित्रं प्रभवति हि यतश्शम्भुशूलाधिरुढा ।
धन्यं मन्ये प्रयागं कलुषमलहरी निर्झरी निर्जराणां
भक्तैस्सन्दृष्टमात्रा हरिपुरवसतिं यत्र हारीकरोति ॥२

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्र० (पुष्पाञ्जलिं विकीर्य)

(समक्षम्) नमो रंगस्थलदैवतेभ्यः (उत्तरस्यां दिशि) नमश्शिवकोटितीर्थाय (पूर्वस्यां दिशि) नमस्त्रिपथगायै (दक्षिणस्यां दिशि) नमः कलिन्दनन्दिन्यै यमुनायै (पश्चिमायां दिशि) नमस्त्वाञ्जनेयाय महावीराय ।

प्रयागस्थ संगीतसमितिसंरक्षणे समायोजिते लघुनाटकप्रतिस्पर्धामहोत्सवे समायातान् विविधजनपदवास्तव्यान् सहृदयसामाजिकान् भवतः साभ्यर्थनमभिनन्दामि ।

अद्यास्मिन् समारोहे प्रस्तूयते मयाऽभिराजराजेन्द्रविरचितं वृन्दारकगवीलघुप्रेक्षणकं को विजयते नैव ज्ञातमितिनामधेयम् ।
(नेपथ्ये विवादध्वनिः श्रूयते)

अये ! किमिदमकाण्डताण्डवं नाम ? मादृशे संरक्षके सत्यपि विवादोऽयं प्रभवति ? श्रृणोमि तावत्तिरस्करिणीमवलम्ब्य ।

(ततः प्रविशतो विवदमानौ नटमारिषौ)

नटः अहं त्वत्तोऽधिकं शोभनमभिनेष्यामि ।

मारिषः कथं भोः ? तव शरीरसम्पत्तिर्मल्लाभिनययोग्या न वर्तते ।

नटः शरीरसम्पत्या किम् ? तव कण्ठे मल्लयोग्यश्चण्डध्वनिर्नास्ति ।

मारिषः पादेन खञ्जस्त्वम् । सर्वदैव विदूषकीभवसि । अद्य मल्लायसे ?

नटः (सरोषम्)

शरीरदोषमुपक्षिपसि ? त्वमपि दृष्ट्याऽऽकेकरोऽसि । हास्यप्रसंगे वर्षवराभिनयं करोषि । अद्य मल्लायसे ?

मारिषः (सव्यङ्ग्यम्)

नमोऽस्तु खञ्जमल्लाय ।

नटः (साभिनयम्)

नमोऽस्तु काणमल्लाय !

मारिषः भोः प्रथममाकेकरं कथयित्वेदानीं काणं वदसि ?

नटः (सनृत्यम्)

वक्ष्यामि, वक्ष्यामि । किमपकर्तुं प्रभवसि ?

(अपटीक्षेपेण प्रविश्य)

सूत्रधारः अये हतकौ ! राज्ञा न किञ्चिन् ज्ञातं भिल्लैः पुनर्निखिलं वनं विभक्तम् ? मयि विद्यमाने परस्परं विवदेथे ? अभ्यन्तरं गच्छतम् ।

(उभौ पलायेते)

सूत्रधारः (सनिःश्वासम्)

भोः पारिषदाः ! स्वकुटुम्बकलहं दृष्ट्वा चिन्तितोऽस्मि । किं भविष्यति मम नाट्यपरिषदः ?

विस्मयं मे गता बुद्धिर्दृष्ट्वा स्वजनविग्रहम् ।
विवदेते यथेमौ तौ चोलमालववासिनौ ॥२

(इत्यपक्रामति । इति प्रस्तावना)

(ततः प्रविशतः कलहायमानौ चोलमालववासिनौ)

चोल: किं लगुडेनाकाशं पातयसि ? कथमतिशेते चोलदेशम्मालवदेशः ?

मालव: अयि भोः आकाशष्ठीवनम् आत्मशीर्षोपर्येव पतति । मन्ये मालवदेशस्य ऐतिह्यमेव न विजानासि ।

चोल: जानामि जानामि । तवैव मालवदेशे मुञ्जराजो राज्यलोभात् स्वभ्रात्रीयं भोजराजं घातयितुमुपचक्रमे । धिगीदृशं राज्यलोभम् ।

मालव: परेषां तु सर्षपमात्रमपि दोषं पश्यसि नात्मनो बिल्ववृहदाकारम् ? अये तवापि मालवदेशे मदुरान्तकचोलः स्वभ्रातरं चोलदेशाधीश्वरं करिकालोपाह्वमादित्यं षड्यंत्रेण घातितवान् । राजराजचोलस्तु पितृव्यराज्यलिप्सां दृष्ट्वैव सिंहासनं तस्मै प्रायच्छत् ।

चोल: (आत्मगतम्)

अये सूक्ष्मवृत्तमपि चोलदेशस्यायं सुष्ठु जानाति । भवतु एवमेनं वक्ष्यामि ।

(प्रकाशम्)

भो : केयं वाचोयुक्तिः ? राजतंत्रे तु एतत्सर्वं भवत्येव ।

मालव: श्रीमन् ! धाराधीशस्य भोजराजस्य पाण्डित्यं भवता श्रुतं न वा ? नवभूमिकं तस्य ग्रन्थागारभवनमिदानीमपि भग्नप्रायं द्रष्टुं शक्यते । स्वयमेव तेन शृङ्गारप्रकाशसरस्वतीकण्ठाभरण-समराङ्गणसूत्रधारभोजवृत्यादीनि सारस्वतरत्नानि प्रकटितानि ।

चोल: (सोपहासम्)

श्रुतं श्रुतम् । भोजराजस्य ग्रन्थागारन्तु भग्नप्रायम् । अस्मच्चोलदेशे तु सरस्वतीमहलग्रन्थागारमिदानीमपि राराज्यतेतराम् । कृपयाऽगत्य सकृन्निभालयन्तु भवन्तः ।

मालव: (सोद्वेगम्)

भोजराज्ये तु कुविन्दोऽपि कविकर्मणि कुशल आसीत् ।

चोल: (सोत्साहम्)

राजराजेश्वरस्य साम्राज्ये तु स्थपतिरपि महान् ज्योतिर्विद् आसीत् ।

मालवः किं प्रमाणम् ?

चोलः तव किं प्रमाणम् ?

मालवः बगेश्वरो वल्लालसेनो भोजप्रबन्धे लिखति ।

चोलः ममापि प्रमाणं वृहदीश्वरमन्दिरभित्तावुत्कीर्णं वर्तते ।

मालवः नाहं मन्ये ! कथनमात्रेण किं भवति ?

चोलः अहमपि न मन्ये । भोजप्रवन्धस्तु कल्पनाश्रितः ।

मालवः भवतु । मत्कथनस्य पुष्टिं निर्णायकपरिषदेव करिष्यति ।

चोलः ममापि कथनस्य ।

उभौ तर्हि तत्रैव गन्तव्यम् ।

।। जवनिकापातः ।।

।। द्वितीयं दृश्यम् ।।

सूत्रधारः (मञ्चमुपसृत्य)

भो भोः सहृदयसामाजिकाः ! दृष्टं श्रुतञ्च भवद्भिश्चोलमालवयोर्वाग्युद्धम् । उभावेव स्वदेशस्य श्रेष्ठतां स्थापयितुं विविधा युक्तीः पुरस्कुर्वाणौ निर्णयार्थं पण्डितपरिषच्छरणमुपागतौ ।

मान्याः! सर्वप्रथमं मालवदेशीयः स्वविजयनिमित्तभूतं कुविन्दकवित्ववृत्तमभिनेष्यति । तदनन्तरं चोलदेशीयः स्वश्रैष्ठ्यहेतुभूतं स्थपतिदैवज्ञत्वकथानकं प्रस्तोष्यति ।

उभयमेव लघु अन्तर्नाटकं दृष्ट्वा निर्णायकसमितिश्चोलमालवयोरन्यतरस्य श्रेष्ठतामुद्घोषयिष्यति ।

तदिदानीमक्षिलक्ष्यीकुर्वन्तु भवन्तोऽन्तर्नाटकं कुविन्दकवित्वाभिधानम्

(इति सप्रणामं सविलासमपक्रामति)

(ततः प्रविशन्ति सिंहासनस्थो धाराधीश्वरो भोजराजः सभासदश्च)

प्रतीहारी जयतु जयतु वाणीवल्लभो धाराधीशः! देव! एष राजपुरुषः कञ्चित् कुविन्दं पाशैराबध्य देवपादमूलमानयति। तत् श्रुत्वा देवः प्रमाणम्।

भोजराजः (साश्चर्यम्)

अये! पाशैराबध्य समानयति? कोऽपराधस्तेन समाचरितः? तूर्णं प्रवेशयैनम्।

प्रतीहारी (सप्रणामम्)

यथाज्ञापयति स्वामी।

(इति निष्क्रम्य पुनः राजपुरुषेण सार्धं प्रविश्य)

देव! सोऽयं राजपुरुषो भवत्समक्षं तिष्ठति।

(इत्यपक्रामति)

राजपुरुषः विजयतां वाणीवल्लभो धाराधीशः! देव! कृतापराधोऽयं कुविन्दो मया भवत्सविधिमानीतः।

भोजराजः (सनिःश्वासम्)

भोः प्रथमं तावत् पाशं शिथिलय। कुविन्दं स्वतन्त्रं कुरु।

राजपुरुषः यथाज्ञापयति देवः।

(इति यथोक्तं करोति)

भोजराजः भद्र! किमपराद्धमनेन कुविन्देन?

राजपुरुषः महाराज! अयमेवंकलो धारानगर्यां निरक्षरः कवित्वहीनश्च तिष्ठति। धारापतेरादेशं श्रुत्वाऽपि साहित्यं नाधीतवानयम्।

भोजराजः (कुविन्दं प्रति)

भोः कुविन्द! किमयं सत्यं भणति? किं नाकर्णितस्त्वया मदादेशो यत्

अशिक्षिता दुराचाराः काव्यसंस्कारवर्जिताः।
राजधान्यां न तिष्ठन्ति धारापुर्यामपण्डिताः ॥४

कुविन्दः (सादरं सविनयम्)

जयतु जयतु वाणीवल्लभः! स्वामिन्! सर्वं श्रुतम्मयाऽवगतञ्च। राजधान्यां स्थातुं न मेऽपात्रता। किन्तु.... (इति शिथिलीभवति)

भोजराजः ब्रूहि ब्रूहि। किन्तु किम्?

कुविन्दः महाराज! यदायं राजपुरुषोऽस्मत्साक्षरत्वं ज्ञातुं मां बाधितवान् प्रश्नैः तदाहं वस्त्रवयनकर्मणि नितान्तमेव निमज्जितचित्तवृत्तिरासम्। साऽऽसीत् मय योगावस्था स्वामिन्! यतो हि योगः कर्मसु कौशलम्!

भोजराजः (सविस्मयं स्वगतम्)

अये! कुविन्दोऽयमसाधारणपण्डितः प्रतिभाति। सर्वथाऽसमञ्जसमाचरितमनेन मूढरक्षिणा।

(प्रकाशम्)

साधु कुविन्द! साधु। अनवसरं रक्षिणा बाधितोऽसि!

कुविन्दः स्वामिन्! रक्षिनिर्बन्धात्सञ्जातरोषेणैव मयोक्तम् भो निरक्षरोऽस्मि, मूर्खोऽस्मि इति।

भोजराजः युज्यते। आस्तां तावत् एतत् सर्वम्। पटनिर्माणातिरिक्तं किं करोषि?

कुविन्दः देव! काव्यं करोमि।

भोजराजः शोभनं शोभनम्। पुरस्करणीयोऽसि।

कुविन्दः (सविनयम्)

देव! नहि चारुतरं करोमि।

भोजराजः कुविन्द! नायं दोषः। संस्कारमूलं हि कवित्वम्। सतताभ्यासे कृते एव चारुत्वमायाति कविकर्मणि। उत्तरोत्तरं तत्र यत्नः कार्यः।

कुविन्दः (सोत्साहम्)

स्वामिन् ! यत्नात्करोमि यदि, चारुतरं करोमि !

भोजराजः सर्वथाऽभिनन्दनीयोऽसि । त्वादृशा एव धारापुर्यां स्थातुमर्हन्ति ।

कुविन्दः भूपालमौलिमणिरञ्जितपादपीठ हे साहसाङ्क ! कवयामि ।

भोजराजः (सहर्षं स्वनामाङ्कितमुद्रिकां प्रयच्छन्)

व्यलीकनिरक्षर ! पदगुम्फप्रवीणोऽसि । पण्डितसभासदस्यं त्वां करोमि । अत्रैव मत्पार्श्वे तिष्ठ ।

कुविन्दः (सादरं राजानुग्रहं स्वीकुर्वन्)

स्वामिन् ! वयामि । वस्त्रनिर्माणकलायां पारंगतोऽस्मि । सभायान्तु बहवः पण्डितास्सन्ति । परन्तु मां विना धारानगर्यां वस्त्रव्यापारो विनाशमेष्यति ।

भोजराजः (विचिन्त्य) सुष्ठूच्यते त्वया । भवतु, गच्छेदानीम् । परन्तु काले काले द्रष्टव्या वयम् ।

कुविन्दः (साभ्यर्थनम्)

यामि देव ! भवदाज्ञावशंवदोऽस्मि ।

(इति शनकैर्गच्छति । जवनिका पतति । वाद्यध्वनिश्च प्रसरति)।

सूत्रधारः (सत्वरं प्रविश्य)

अयिभो रंगमण्डपास्तारस्सहृदयाः ? दृग्गोचरीकृतं भवद्भिः कुविन्दकवित्वाभिधम् अन्तर्नाटकम् । इदानीं प्रस्तूयते स्थपतिदैवज्ञत्वाभिधमपरमन्तर्नाटकम् । तत्सज्जीभवन्तुभवन्तः ।

(इत्यपक्रामति)

(ततः प्रविशन्ति सिंहासनस्थश्चोलेश्वरो राजराजः सभासदश्च)

धर्माधिकारी विजयतां विजयतां चोलावनीन्द्रो राजराजः। महाराज ! धर्मविरुद्धमाचरन्नयं बृहदीश्वरमन्दिरस्थपतिः पाशैर्बद्ध्वा राजपुरुषेणानीतः। श्रुत्वा देवः प्रमाणम्।

राजराजः आश्चर्यम्। अब्रह्मण्यम्। होमं कुर्वाणस्यापि हस्तो ज्वलति ? तूर्णं प्रवेशयैनम्।

(निष्क्रम्य, प्रविश्योभाभ्यां सह)

धर्माधिकारी देव ! एतौ तौ स्थपतिराजपुरुषौ देवादेशं प्रतीक्षेते।

राजराजः (राजपुरुषं प्रति)

भद्र ! ऋजुकोऽयं प्रतिभाति स्थपतिः। किमपराद्धमनेन ?

राजपुरुषः जयतु जयतु स्वामी। स्वामिन् ! अनेन स्थपतिना प्रभोर्वैदिकधर्मानुप्राणकत्वं सुष्ठु विजानताऽपि धर्मविरुद्धमाचरितम्।

राजराजः (सोत्कण्ठम्)

ब्रूहि, किं कृतमनेन ?

राजपुरुषः देव ! बृहदीश्वरमन्दिरस्य उत्तरस्यां भित्तौ तृतीयभूमिकायां अनेन अनार्यधर्मावलम्बिनः कस्यचित् स्तूपोष्णीषधारिणो विग्रहं निर्माय स्थापितवान्।

राजराजः (सगाम्भीर्यम्)

भवतु। प्रक्ष्याम्येनम्। मुञ्च तावत् पाशम्।

रापुरुषः यथाज्ञापयति देवः।

(इति पाशं शिथिलयति)

राजराजः भोः स्थपते ! कुतस्समागतोऽसि ?

स्थपतिः विजयतां देवः। महाराज ! काञ्चीपुराधीश्वरपादमूलात्समागतोऽस्मि।

राजराजः (सादरम्)

एवम् ? भगवन्तम् एकाम्रेश्वरं सेवमानोऽसि ?

स्थपतिः अथ किं महाराज !

राजराजः यदयं राजपुरुषो भणति तत्किं सत्यम् ?

स्थपतिः महाराज ! सत्यं भणति भद्रपुरुषोऽयम् ।

राजराजः जानासि यद् बृहदीश्वरसमुपासका वयम् । मन्दिरभित्तावपि पुराणगाथाश्रिता एव मूर्तीः विन्यस्येयुरिति ममादेशः । तत्कथं त्वया विरुद्धमाचरितम् ?

स्थपतिः महाराज ! भविष्यत्कालानुरोधवशात् सा मूर्तिर्मया निर्मिता ।

राजराजः (सविस्मयम्)

स्थपते ! रहस्यगर्भन्ते वचनं प्रतिभाति । स्फुटं भण ।

स्थपतिः चोलावनीन्द्र ! भवान् वर्तमानं चिन्तयति पश्यति च । अहं पुनः दैवज्ञदृष्ट्याऽऽगमिष्यन्तीं सहस्राब्दीं पश्यामि । राजन् ! भवदनन्तरं त्रयोऽन्येऽपि राजवंशाश्चोलवसुन्धरां प्रशासिष्यन्ति । तेषां त्रयाणामन्यतमो राजवंशस्तु वैदेशिको भविष्यति । तेषां शासकानामियमेव वेषभूषा भविष्यति ।

राजराजः (साश्चर्यम्)

महानयं विस्मयः । स्थपते ! क्व पुनर्ज्योतिषमधीतम् ?

स्थपतिः राजराजेश्वर ! सर्वमेकाम्रेश्वरकृपयाऽधीतम् । पशुपतिसेवया किं न सिद्ध्यति ?

राजराजः (सादरम्)

सर्वथाऽभिनन्द्योऽसि । हन्तभोः स्थापत्यव्यापृतस्याऽपि ईदृशी ते

दैवज्ञता ? मन्दिरनिर्माणानन्तरं त्वं मत्सविधिमेष्यसि। राजदैवज्ञपदं ते दास्यामि।

स्थपतिः कृतार्थोऽस्मि राजानुग्रहेण। परन्तु मूर्तिनिर्माणन्तु मदीयं पैत्रिकं कर्म। तत् कथमपि विहातुं नेच्छामि। कुलदेवता रोषमेष्यन्ति।

राजराजः प्रातरेव त्वन्निर्मितवैदेशिकभटविग्रहं द्रक्ष्यामि।

स्थपतिः स्वामिन्! पश्यन्तु भवन्तः। अयं विग्रहस्तु विगतेषु सहस्रमितेषु वर्षेषु सर्वान् दर्शकान् विस्मापयिष्यति भवदीयां कीर्तिञ्चाक्षुण्णां विधास्यति।

राजराजः (सोत्कण्ठम्)

स्थपते! अथ कियत्कालानन्तरमिमे वैदेशिका भारतभुवमागमिष्यन्ति ?

स्थपतिः (अक्षिणी निमील्य पुनरुन्मील्य च)

देव! ते तु समागतप्राया वर्तन्ते। परन्तु राज्याधिकारन्तु इतः प्रभृति अष्टशतवर्षानन्तरमेव प्राप्स्यन्ति।

राजराजः अथ बृहदीश्वरमन्दिरस्यायतिः कीदृशी भविष्यति ?

स्थपतिः (सध्यानम्)

चोलेश्वर! बृहदीश्वरदेवालयस्तु अनन्तकालं यावत् भारतभुवमलंकरिष्यति।

राजराजः (सहर्षं कण्ठहारं प्रयच्छन्)

सर्वथा परितुष्टोऽस्मि त्वद्विद्यया। भवादृशैर्दिव्यदृष्टिसम्पन्नैः दैवज्ञैः कृतार्थेयं चोलावनी! गच्छ स्वनियोगमशून्यं कुरु!

स्थपतिः (सादरं कण्ठहारमादाय)

यथाज्ञापयति चोलवसुवेन्द्रः !

(इत्यपक्रामति)

सूत्रधार : (प्रविश्य)

भोः सहृदयाः ! इदानीमवसितम् अन्तर्नाटकम् । निर्णायकपरिषत्सदस्या डॉक्टरचण्डिकाप्रसादशुक्ल:डाक्टररेवाप्रसादद्विवेदिडॉक्टरकमलेशदत्तत्रिपाठिडाक्टरभास्कराचार्यत्रिपाठिनश्च यावत्सम्मन्त्र्य स्वनिर्णयं प्रस्तुवन्ति तावत् गीतिमेकां शृण्वन्तु भवन्तः ।

(सवाद्यं गीतं प्रारभते)

मदयति नहि कं सुमधुर रचना ?
क्वचिदमरधुनीव धुनोति कलिम्
बिलसति रमणीव करोति रतिम्
क्वचिदुन्मादयति विशदमदना
मदयति नहि कं सुमधुररचना !!

(शनैः गीतध्वनिर्मन्दायते)

सूत्रधार: (पुनः प्रविश्य)

मान्याः सहृदयाः ! इदानीं निर्णायकसम्मितिप्रवराः प्रयागविश्वविद्यालयीयसंस्कृतविभागस्य पूर्वाध्यक्षवर्या नाट्यप्रयोगमर्मज्ञा डॉक्टरश्रीचण्डिकाप्रसादशुक्लमहाभागा निर्णयं श्रावयिष्यन्ति । तत् मध्येशालं निषण्णाः चोलमालवदेशीया भ्रातरो भगिन्यश्च सज्जितश्रवणेन्द्रिया भवन्तु ।

(इति मञ्चपार्श्वमुपतिष्ठति)

डॉ० चण्डिकाप्रसादशुक्लः (सस्मितम्)

मान्याः सहृदयाः ! दृष्टं भवद्भिरन्तर्नाटकद्वयम् । एकतस्तु तन्तुवायः सन्नपि साधारणो जनः कवित्ववैशारदीं प्रकटयति । अन्य-

तस्तु टङ्किकाघातध्वनिवधिरितकर्णोऽपि स्थपतिस्त्रैकालिकं वृत्तं हस्तामलकमिव दरीदृश्यतेतराम् ।

उभयोर्मध्ये कः परः कोऽवरश्चेति सरलतया निर्णेतुं न शक्यते । वस्तुतः आकाश्मीरान् कन्याकुमारीं यावत् भारतराष्ट्रमविच्छिन्नं वर्तते । अस्य पवित्रदेशस्य प्रत्यङ्गं पवित्रं, श्रेष्ठं, विस्मयावहञ्च । सर्वेऽपि भारतीया एकस्यैव विशालप्राङ्गणस्य शिशुभूता वर्तन्ते । अतएव सूक्ष्मविमर्शानन्तरमियं निर्णायकसमितिः स्वरुचिकरं निर्णयं प्रस्तौति, स चास्ति (तारस्वरेण)

को विजयते नैव ज्ञातम् इति !!

(सहृदयेषु महान् अट्टहासः करतलध्वनिश्च)

।। जवनिकापातः ।।

रक्ताभिषेकम्

(खालिस्तानसमस्याश्रितं नव्यमेकाङ्कम्)

पात्रपरिचयः

गुरुः गोविन्दसिंहः	(सिक्खानां दशमो गुरुः)
बन्दा वैरागी	(गोविन्दसिंह-शिष्यः)
मलखानसिंहः	(गोविन्दसिंह-सेवकः)
गुरुः रामदासः	(सिक्खानां चतुर्थो गुरुः)
गुरुः अर्जुनः	(सिक्खानां पञ्चमो गुरुः)
गुरुः तेगबहादुरः	(गोविन्दसिंहस्य पिता)
ऊधमसिंहः भगतसिंहः	(उत्सृष्टप्राणौ राष्ट्रभक्तौ)
कृपालसिंहः	(अमृतसरनगरस्य कश्चिद्व्यवसायी)
हेमेन्द्रसिंहः	(कृपालसिंहस्य तनुजः छात्रः)
अमृताकौर	(कृपालसिंहस्य पत्नी)
इन्दिरा गान्धी	(भारतस्य प्रधानमंत्री)

कथासार

अमृतसर नगर के दशमेश इण्टर कालेज के वार्षिकोत्सव के अवसर पर 'पुष्पाहुति' नामक नाटक का मञ्चन हो रहा है जिसे देखने के लिए कालेज का छात्र हेमेन्द्र अपने पिता कृपाल सिंह तथा माँ अमृता कौर के साथ जाता है।

नाटक में सिख-सम्प्रदाय के दसवें गुरु गोविन्द सिंह का आत्मोत्सर्ग प्रस्तुत किया जाता है। आनन्दपुर साहिब के पैत्रिक निवास में बैठे गुरु-गोविन्द सिंह को मलखानसिंह से ज्ञात होता है कि क्रूर औरंगजेब ने उनके दोनों पुत्रों—फतेहसिंह तथा जोरावर सिंह को कत्ल करा दिया है। इस असह्य सन्ताप के कारण गुरुदेव की पूज्य जननी ने भी विषपान कर प्राण दे दिये हैं।

गुरु गोविन्द सिंह का वत्सल हृदय रो पड़ता है। परन्तु दूसरे ही क्षण उनके नेत्रों से चिनगारियाँ फूट पड़ती हैं और वह शस्त्र-सज्जित हो कर बन्दा वैरागी के साथ निकल पड़ते है आलमगीर से प्राणान्तक युद्ध करने के लिए। गुरु के प्राणोत्सर्ग की शेष घटला उद्घोषक के वक्तव्य से ज्ञात होती है।

नाट्य-शाला से निकलने के बाद हेमेन्द्र सखों के अतीत गौरव की प्रशंसा करते हुए उनकी खालिस्तान-याचना पर प्रश्नचिन्ह लगाता है। उसका पिता कृपाल सिंह उसे डाटता है परन्तु माँ समर्थन करती है और स्वार्थान्ध सिक्खों के अराष्ट्रीय आन्दोलन को बुरा-भला कहती है।

घर आकर हेमेन्द्र सोता है। गहरी नींद में वह एक विचित्र स्वप्न देखता है। स्वप्न में उसे क्रमशः गुरु रामदास; गुरु अर्जुनदेव, गुरु तेगबहादुर तथा गुरु गोविन्द सिंह के दर्शन होते हैं। वे सब हेमेन्द्र को सिक्खों के शौर्य, पराक्रम तथा सद्गुणों का परिचय देते हैं। इसी बीच शहीद ऊधम सिंह तथा भगत सिंह भी आते हैं। वे बताते हैं कि भारत राष्ट्र अखण्ड है। इसमें खालिस्तान की माँग करना खुला राष्ट्रद्रोह है। जरनैलसिंह का मार्ग राष्ट्रभक्ति का मार्ग नही है। बच्चा स्वप्न देख ही रहा है कि माँ आतीं है कमरे में और हेमेन्द्र को जगाकर बताती है कि भारत की प्रधानमन्त्री इन्दिरागान्धी राष्ट्र की बलिवेदी पर भेंट हो चुकी है।

●

रक्ताभिषेकम्

(खालिस्तानसमस्याश्रितं नव्यमेकाङ्कम्)

अमृतसरनगरस्य दशमेशइण्टरकालेज इत्याख्यः कश्चिद् विद्यालयः। विद्यालयवार्षिकोत्सवे समायोजितं किमपि नाट्यम् । दर्शकाणामग्रिमपङ्क्तौ कृपालसिंहः स्वपत्न्याऽमृतया पुत्रेण हेमेन्द्रेण च सार्धं समासीनो वर्तते । नेपथ्ये संगीतस्य मन्दस्वरलहरी तरंगायते ।

कृपालसिंहः वत्स हेमेन्द्र ! किन्नु खलु नाटकमद्य प्रस्तोष्यते ?

हेमेन्द्रः तात ! नाटकस्य शीर्षकोऽस्ति पुष्पाहुतिरिति ।

कृपालसिंहः पुष्पाहुतिः ! वत्स ! अनेन किमुक्तं भवति ?

हेमेन्द्रः (सोद्वेगम्)

तात ! भवांस्तावत् अनवगतप्राय एव ! पुष्पाणामाहुतिरिति पुष्पाहुतिशब्दस्याभिप्रायः । गुरोर्गोविन्दसिंहस्य द्वावपि दारकौ जोरावरसिंहफतेहसिंहौ पुष्पकोमलौ धर्मरक्षार्थं मृत्युवेदिकामारूढौ । अद्यतने नाट्यमञ्चने एतावन्मात्रं प्रदर्शयिष्यते ।

(अकस्मादेव क्षीयते संगीतलहरी । शान्तिः प्रभवत्यधिमञ्चम्)

हेमेन्द्रः तात ! अलमिदानीं पृच्छया । पश्यन्तु भवान् । जवनिकोद्घाटितप्रायेव संलक्ष्यते । यत्सत्यं नाटकं सम्प्रति प्रारभते ।

(जवनिकोद्घाट्यते । गोविन्दसिंह आनन्दपुरस्थे स्वपैत्रिकावासे बहिरलिन्दे चिन्तामग्नस्तिष्ठति । तत्काष्ठवेदिकासमीपमेव प्रियशिष्यो बन्दाबहादुरस्तिष्ठति विनम्रमुद्रः । आगमनध्वनिःश्रूयते)

गोविन्दसिंहः वत्स बन्दक ! निभालय तावत् क आगच्छति ? अपि नाम मलखानो भवेत् ।

बन्दाबहादुरः सत् श्री अकाल ! महाराज ! इदानीमेव पश्यामि ।

(गत्वा मलखानेन सार्धं पुनः प्रविश्य)

महाराज ! साधीयान् खलु भवत्तर्कः । मलखान एव प्रत्यागतः ।

(मलखानो भृशं विलपन् गोविन्दचरणेषु निपतति)

गोविन्दसिंहः उत्तिष्ठोत्तिष्ठ मलखान ! रोदिषि कथम् ? बर्बरमृगराजोऽसि चञ्चत्सटाभारः । सिक्खा (शिष्या) भिधानेन सार्धं सिंहशब्दो मया योजितस्तत्किं परिदेवनार्थम् ? अये ! केसरिण इव वैरिणां मांस-खण्डानि प्रसह्य स्वायत्तीकर्तुमेव ते सिंहीकृता मया ।

मलखानः (आननमुत्थाप्य सास्फुटरोदनम्)

महाराज ! बर्बरसिंहोऽपि सन्नहं मन्दभाग्यो जम्बुको जातः । किञ्चिदपि कर्तुं न शशाक । कालिमोपेतं मन्मुखम् ।

गोविन्दसिंहः (सातङ्कम्)

तत्किं परिभुग्नौ मे दारकावालमगीरस्य धर्मान्धत्वदावाग्नौ ? मलखान ! तत्किं मन्नेत्रज्योतिर्भूतो जोरावरसिंहो निर्वाणमुपगतः ? किम्मे दुर्ललितदारकः फतेहसिंहो नामशेषो जातः ?

मलखानः (तारस्वरेण विलपन्)

महाराज ! कथं स्फुटीक्रियेत ? अनेन हतकवक्त्रेण कथं वर्ण्येत ? हन्तभोः ! एतन्निवेदनात्प्रागेव मया कथं न मृत्युर्वृतः ?

गोविन्दसिंहः (अश्रूणि प्रमार्ज्य सधैर्यम्)

अथ किं वृत्तं वन्द्यचरणाया मातुः ? कुत्रास्ति सा ?

मलखानः (सोरस्ताडं परिदेवमानः)

हन्त स्वामिन् ! सा तपस्विन्यपि स्ववंशदीपौ निर्वापितौ दृष्ट्वा देवी मीराबाईव कालकूटं निपीतवती ।

गोविन्दसिंहः (स्तम्भितकण्ठः साश्रुमुखः काष्ठफलकादवतीर्य पूजागृहं गत्वा)

पूज्य पितृचरण ! मम दीक्षागुरो ! किमेतज्जातम् ? परमेश्वर ! इस्लामधर्ममनङ्गीकुर्वन्नेव भवान् आलमगीरस्य क्रौर्यवैश्वानरे सन्दग्धः ! अद्य पुनस्ते पौत्रौ हव्यतामुपगतौ ? शक्तिम्मे देहि

वा।हेगुरो ! पन्थानं मे निर्दिश मत्स्वामिन् ! न खलु खालसासम्प्रदायगुरुरूपेण अपितु भग्नहृदयो निराश्रयः पितेव गोविन्दसिंहोऽद्य भवन्तं भिक्षां याचते ।

(इति सचीत्कारं बहुशो विलपति)

बन्दाबहादुरः (पार्श्वमुपेत्य सश्रद्धं सान्त्वयन्)

सत् श्री अकाल ! महाराज ! आत्मानमवतु भवान् । भवन्तं परिदेवमानं पश्यन् विध्वंसते तुहिनाचलः । सागरे वात्याचक्रं संलक्ष्यते । गगनमण्डले ग्रहतारकाः स्खलन्ति । दिवसो निशायते स्वामिन् ! उत्तिष्ठतु गुरुवर्यः । इदानीमपि जीवतितरां बन्दाबहादुरः ! प्राणोत्सर्गमूल्यमेतत् बन्दाबहादुर आलमगीरकुलात् निश्चप्रचमाग्रहीष्यति ।

(इति गोविन्दचरणयोः प्रणमति)

गोविन्दसिंहः बन्दक ! मम पुत्रक ! त्वमेव ममात्मासि । अस्मदनन्तरं न कोऽपि सिक्खसम्प्रदायस्य गुरुतामेष्यति । ननु पञ्चप्रिया यत्रापि समाहिता भविष्यन्ति तत्रैव गुरोरात्मा प्रभविष्यति । वत्स बन्दक ! मम पुत्रयो रुधिरमाह्वयति मामिदानीम् । एष गच्छाम्यहम् । सिक्खसम्प्रदाययोगक्षेमौ तव हस्तयोरर्पितौ मया !

(इति वीरवेशं नाटयति)

बन्दाबहादुरः (गोविन्दसिंहस्य पादौ गृह्णन्)

महाराज ! अलमस्मान् अनाथीकृत्य ! शरीरं भवान् । बन्दा पुनश्छाया भवच्छरीरस्य । रुधिरस्यान्तिमं बिन्दुं यावद् भवदैश्वर्यं मलिनायमानं न द्रक्ष्यति भवच्चरणसेवकोऽयम् । परन्तु स्वामिन् ! बन्दकमेकाकिनमपहाय न गच्छतु भवान् !

गोविन्दसिंहः (बन्दकमङ्कपाल्यामागृह्य)

उत्तिष्ठ वत्स ! शरीरमात्मानं च प्रत्यभिजानीहि । शरीरेण सह शरीरस्य सम्बन्धो भवति । आत्मा पुनर्मुक्त एव । न तदुपरि किमपि बन्धनम् । जीवनस्यान्तिमं युद्धं चरितार्थयितुं गच्छाम्यहम् । यदि नाभिरोचेत तर्हि त्वमपि मामनुसर ।

(बन्दाबहादुरं समेत्य गुरुगोविन्दसिंहः प्रतिष्ठते)

उद्घोषक : निर्गतो गोविन्दसिंहो वन्दकद्वितीयः
धर्मयुद्धं संविधातुं
विशालं तावदेव
नामशेषतां यातः
दिल्ल्यां क्रूर औरंगजेबः
सिंहासनमधिकर्तुं बद्धपरिकरास्तस्य
निर्वीयपुत्रका युद्धरताः समभूवन्
बन्धुरेव पपौ हन्त रुधिरं सहोदरस्य
सुतो मुअज्जमनामा
शरणमागतस्तावत्
गुरुश्रीगोविन्दस्य !
पन्थाः समजायत निष्कण्टकः
सिंहासनमधिरुरोह दिल्ल्यां शाहंशाहः
प्राख्यातोऽभूद् बहादुरशाहनाम्नाऽसौ !
(कारुण्यसूचकः संगीतध्वनिः श्रूयते)
निभृतनिभृतं हन्त ! मृत्युः
गुरुसमीपमुपागतः ।
दाक्षिणात्ये भारते नान्देणनामनि स्थानके
सान्ध्यकाले वन्दनं सम्पाद्य यावत्
गुरुवरो ह्यासीच्छयान-
स्तावदेव विषाक्तचित्तः
कोऽपि सिक्खारिः पठानः
प्राहरद् गोविन्ददेवं हन्त ! दुस्सहखड्गघातै-
स्तत्क्षणं स महामनाः पञ्चत्वमेतः ।
तदनु वैरागी स वन्दा
पूज्यगुरुनिधनार्दितः सन्
भैरवे समरे महाकालत्वमेतः
एकमेकं पथभ्रष्टं संजघान स मार्गयित्वा
क्रूरहृदयं हिन्दुधर्मविनाशहेतुम् !
सम्प्रकाश्य च भूमिलोकं
बहादुरशाहस्य कोपाग्नौ विदग्धः सोऽपि वीरः ।

अद्य नो गोविन्ददेवः
न वा वीरवरस्स वन्दा
चारुचरितं तयोर्हन्त यशोऽभ्युपेतं
निखिलपञ्चनदप्रदेशं
मोदयत्यामोदयति च !!

(जवनिका पतति। नाटकमवसितं भवति। समग्रोऽपि सम्मर्दो नाट्यशालातो बहिर्निष्क्रामति)

हेमेन्द्रः तात ! कीदृशमासीन्नाटकमिदम् ?

कृपालसिंहः विजयतां विजयतां वाहेगुरुः। खालसासम्प्रदायं दीपितवानसौ। तस्य वचनानि निशम्य तु ममापि रोषः प्रतिबुद्धः।

हेमेन्द्रः तात ! गुरुदेवः कदापि धर्मद्वेषं न कृतवान्। हिन्दवो बलपूर्वकं तुरुष्कीक्रियन्तामिति औरंगजेबस्य दुर्नीतिरेव तस्मै नारोचत।

कृपालसिंहः सम्यग् वदसि वत्स ! इदमेवासीत् कारणम् आलमगीरगोविन्द-देवयोर्वैमनस्यस्य। अन्यथा तु स्वजनकस्तेगबहादुर इव गोविन्द-देवोऽपि मुगलसैनिकरूपेण कियन्त्येव युद्धानि कृतवान्।

हेमेन्द्रः तात ! गोविन्ददेवः कदापि बन्धुभ्यो न द्रुह्यतिस्म। स कदापि भारतराष्ट्रं न खण्डितवान्। परन्तु पश्यन्तु तावदिदानीम्। तस्यैव अनुयायिनो मुष्टिमिताः सिक्खाः किं कर्तुं व्यवसिताः ?

कृपालसिंहः (सनिर्भर्त्सनम्)

किमिदमधरोत्तरमसम्बद्धञ्च भाषितुमुपक्रमसे ?

अमृता अलं बालकं निर्भर्त्स्य। प्रश्नस्तस्य कथं न साधु समाधीयते ?

कृपालसिंहः यत् तथ्यं न जानाति नावगच्छति किमर्थं तत् पृच्छति ?

अमृता अहन्तु जानाम्यवगच्छामि ! भवतु, अहमेव तावदिदं पृच्छामि।

कृपालसिंहः अकालिनां सिक्खानां जातिवैशिष्ट्यमपक्षीयते। तेषां स्वाभिमानो जातिगौरवं च नश्यतः। अतएव पृथक्प्रत्यभिज्ञानसंरक्षणार्थं

खालिस्तानमपेक्ष्यते तैः। तेषामान्दोलनं समुचितम्।

अमृता साधु साधु ! अद्भुतं समौचित्यं निरूपितम् ? किं सिक्खा हिन्दवो न वर्तन्ते ? किमेकस्यैव कुटुम्बस्य द्वौ बालकौ सिक्खहिन्दू न वर्तेते ? किं सिक्खानां खालिस्ताननिर्माणेच्छा राष्ट्रद्रोहमात्रं न पुष्णाति ?

कृपालसिंहः (सोद्वेगम्)

मार्गे कथं विवदसि ? गृहमासाद्य वार्तां करिष्यावः।

हेमेन्द्र : तात ! यद्येवमेव प्रत्येकराज्यं स्वस्मै पृथग् राष्ट्रं याचेत तर्हि किं भविष्यति भारतराष्ट्रस्य ?

कृपालसिंहः (सक्रोधम्)

भ्राष्ट्रे यातु तव..........।

अमृता कथम्भोः मुखदरीमाविलयसि ? खालिस्तानयाचकान् देशद्रोहिणः कथं न भ्राष्ट्रे निक्षिपसि ! तव पत्नीत्वं निर्वहन्त्यपि साम्प्रतमहं लज्‍जामनुभवामि।

॥ जवनिकापातः ॥

॥ द्वितीयं दृश्यम् ॥

अमृतसरनगरस्यैकस्मिन् क्षेत्रे कृपालसिंहस्य भवनम्। शर्वर्याश्चतुर्थांदनवेला। निद्रामग्नो दारकः कृपालसिंहस्य हेमेन्द्रनामाऽकस्मादेव स्वप्ने प्रसारिणं विलक्षणं प्रकाशपुञ्जमवलोकते। अनन्तरमेव माध्वीकमधुरया वाण्या च्छन्दांसि कानिचित् प्रकटयन्ति।

स जयेद् भूतलस्रष्टाऽलक्ष्यश्चैको निरञ्जनः।
सुखमूलं स एवैको दुःखितं सर्वभूतलम् ॥१

मृषा जातिर्मृषा पंक्तिर्योगभोगादिकं मृषा।
भक्तिमान् लभते देवं नानको वक्ति सत्तमम ॥२

गुर्हि नानको जातो ननकानाख्यनीवृति ।
अन्वेषणैर्हरिः प्राप्यः सिक्खधर्म इतीरितम् ।।३

आद्यो हि नानको देवो द्वितीयश्चाङ्गदो गुरुः ।
तृतीयोऽमरदासश्च सिक्खमार्गप्रवर्तकः ।।४

(अकस्मादेव प्रकाशपुञ्जे कापि भव्याकृतिः साधुवेशधारिणी प्रकटयति)

हेमेन्द्र : महाराज ! प्रणमामि । कोऽस्ति भवान् ?

रामदास : वत्स ! सिक्खसम्प्रदायस्य चतुर्थो गुरुः रामदासोऽस्मि । गुरुनानकस्य मानवधर्मो मया भारतराष्ट्रस्य कोणे-कोणे प्रसारितः । आगरानगरं यावन्मदीया कीर्तिर्गता । शहंशाहोऽकबरोऽपि मां प्रतिष्ठापितवान् । सिक्खसम्प्रदायस्य विस्तारार्थं पञ्चशतबीघामितभूमिं स मह्यं प्रादात् । तस्यामेव भूमौ मयाऽमृतसरोवरं हरिमन्दिरञ्च निर्मापिते ।

(मध्य एवापरोऽपि भव्यपुरुषः प्रकटीभवति)

हेमेन्द्र : (सादरम्)

सत् श्री अकाल ! महाराज ! भवान् पुनः कोऽस्ति ?

अर्जुन : वत्स हेमेन्द्र ! अर्जुनोऽस्म्यहं पञ्चमो गुरुः । गुरुनानकस्य अन्येषाञ्च हिन्दुतुरुष्कसाधकानां कवीनां भक्तानां वाक्यानि संहृत्य मया सिक्खानाम् आदिग्रन्थो लिखितः । यस्मै गुरुग्रन्थसाहिबाय हरिमन्दिरे प्रतिदिनं प्रणतिमर्पयसि स मयैव लिखितः ।

मुगलगृहयुद्धे राजदारकस्य खुशरोः पक्षग्रहणात् शहंशाहो जहांगीरो लक्षद्वयमितेन रुप्यकराशिना दण्डितवान् । अर्थदण्डञ्चानिष्पादयन्तं मां घातितवान् । मया योगबलेन स्वप्राणाः समुत्सृष्टाः ।

(पुनरपि काव्यस्वरः प्रस्फुटति)

अर्जुनस्य सुतः षष्ठो हरिगोविन्दको गुरुः ।
सप्तमो हरिरायश्च किशनोऽप्यष्टमो मतः ।।५

नवमः खालसारत्नं गुरुस्तेगबहादुरः।
धर्ममानवताहेतोः विससर्ज स्वजीवनम् ॥६

द्यां संस्पृशति यत्कीर्तिः कुन्दकर्पूरपाण्डुरा।
धर्मरक्षार्थमेवासौ प्राणानपि ददे मुदा ॥७

(गुरुस्तेगबहादुर : समक्षमायाति)

हेमेन्द्र : महाराज ! भवानेव गुरुस्तेगबहादुरः ? कश्मीरस्थहिन्दूनां सबलात्कारं तुरुष्कीकरणं भवतैव खलीकृतम् ? गुरुदेव ! अनेनैवापराधेन आलमगीरो भवन्तमिस्लामधर्ममनङ्गीकुर्वाणं नृशंसतया घातितवान् ?

तेगबहादुरः साधु वत्स हेमेन्द्र ! तेगबहादुर एवास्मि। परन्तु एतावति लघुवयसि कथं नु ज्ञातमेतत्सर्वं त्वया ?

हेमेन्द्र : (सहर्षम्)

महाराज ! मज्जननी सर्वमेतत् मह्यमाख्यातवती। सत् श्रीअकाल।

(क्षणेनैव तेगबहादुरस्याकृतौ गुरुगोविन्दसिंहस्य मुखच्छविः संलक्ष्यते)

अहो आश्चर्यम् ! चित्रमेतत्। देव ! सिक्खानां दशमो गुरुर्गोविन्दसिंहो भवान् ? चित्रपरिचयाद् भवन्तं प्रत्यभिजानामि। महाराज ! सत् श्रीअकाल। जय माता दी !!

गोविन्दसिंहः (सवात्सल्यम्)

वत्स ! जय माता दी ! चिरञ्जीव ! वर्धस्व !!

हेमेन्द्र : (सहर्षम्)

भगवन्। ह्य एवाधिमञ्चं प्रस्तुते नाटके भवज्जीवनवृत्तं दृष्टवानस्मि। सत्यमेव भवान् परो देवः। परन्तु पितरं पृष्टं मदीयं प्रश्नं भवानेव तावत् समादधातु। प्रश्नं जानाति भवान् !

गोविन्दसिंहः वत्स हेमेन्द्र ! धर्मान्धस्यालमगीरस्यात्याचारेभ्यो हिन्दुत्वं मानवताञ्च संरक्षितुं मया स्वशिष्याः (सिक्खा) सैनिकीकृताः ! एकैकस्मात् हिन्दुगृहात् एकैकस्या हिन्दुजनन्या सोऽहं धर्मरक्षणार्थम् एकमेकं पुत्रं याचितवान्। अनेक प्रकारेण मया धर्मो रक्षितः।

वत्स हेमेन्द्र ! प्रत्येकसिक्खो मूलतो हिन्दुरस्ति। यथा भूषणं वस्तुतः सुवर्णमेव तथैव सिक्खोऽपि हिन्दुरेव। पश्य तावत्

श्रीरामे पुरुषोत्तमे विलसति प्रीतिर्मदीयाऽनघा
श्रीकृष्णे रमते नटीव धिषणा लीलामनोरञ्जिनी।
साक्षादेव शिवोऽहमस्मि परया शक्त्या लसद्विग्रहः
अन्यत्किं कथयामि सिंहनिलया दुर्गा परा देवता ॥८

वत्स हेमेन्द्र ! एतद्रहस्यमविजानन् सिक्खोऽद्यतनः स्वमूलमेव छिनत्ति।

हेमेन्द्रः महाराज ! तत्किं खालिस्तानयाचना न युक्तियुक्ता ?

(अकस्मादेव आंग्लवेषधरौ युवकौ प्रविशतः)

ऊधमसिंहः / भगतसिंहः } सर्वथाऽयुक्तियुक्तेयं याचना। राष्ट्रद्रोहोऽयम्। अस्य पापस्य फलं समग्रेणापि पञ्चनदराज्येन भोक्तव्यं भविष्यति।

हेमेन्द्रः (सप्रणामम्)

भवांस्तावद्राष्ट्रभक्तो भक्तसिंहः ? पितुश्शयनकक्षे भवच्चित्रं दृष्टम्मया। परन्तु कोऽयं द्वितीयो भवत्सविधौ ?

भगतसिंहः जलियाँवालोद्यानगुलिकाकाण्डस्य मुख्याभियुक्तं जनरलडायरं लन्दननगरस्य कस्याञ्चित् सभायां यो गुलिकासारवर्षाभिश्छिन्नभिन्नाङ्गं चकार तं राष्ट्ररत्नमूधमसिंहं न जानासि ?

ऊधमसिंहः वत्स हेमेन्द्र ! इदानीं प्रत्यभिज्ञातोऽस्मि न वा ?

हेमेन्द्रः बाढम्। ज्ञातम्। सत् श्री अकाल। भवन्तः सर्वे यस्य राष्ट्रस्य एकतायै स्वतंत्रतायै च प्राणाहुतिं दत्तवन्तस्तस्मिन्नेव राष्ट्रे सम्प्रति पृथक् खालिस्तानं याच्यते। पश्यन्तु तावत्

आस्थाय प्रहरीव रक्षणपरो योऽभूत्सदा संकटे
सर्वस्वं व्यपहाय कीर्तिमतुलां भेजे सुरक्षाग्रणीः।
यो बाह्याक्रमणेषु सेतुरथवा नाल्पं शशाकानिशं
सोऽयं पञ्चनदप्रदेशविभवः सम्पद्यते दुर्दशाम् ॥ ९

शतमिताः सहस्रमिता वा निर्दोषा हता हन्यन्ते च इदानीमपि न शाम्यत्यग्निः। स्वर्णमन्दिरं धर्मद्रोहिभिः पापगृहीकृतम्। कथं न भवन्त एषां दुर्बुद्धिं परिवर्तयन्ति ? पञ्चनदराज्यमिदानीं निखिलभारतराष्ट्रस्य शीर्षवेदनामूलं जातम्। भवन्तः स्वजन्मभूमिं कथं नाततायिभ्यो विमोचयन्ति ?

भगतसिंहः वत्स हेमेन्द्र ! त्वत्सदृशे निष्ठावर्ति सिक्खे सति वाहेगुरोरुष्णीषो न समुच्छलिष्यति । पश्य,

कतिपयक्षणं यावदुद्याने वर्तेत इयं वात्या
न चिरं स्थास्यति सा
पुनरपि कुलायो भविष्यति पुनरपि गास्यन्ति विहगाः
अद्य भूरियं पञ्चनदानां
अधिकारे तिष्ठति जरनैलसिंहस्य
परमिमां मोचयितुं नूनं
वयं स्व एव स्वयमागमिष्यामः ॥

अमृता (अपटीक्षेपेण प्रविश्य ससम्भ्रमम्)
उत्तिष्ठ उत्तिष्ठ वत्स हेमेन्द्र ! अनर्थः सञ्जातः । निखिलमपि राष्ट्रं विपन्नं जातम् ॥ सुरक्षासैनिकाभ्यां बेअन्तसतवन्ताभ्यां प्रधानमंत्री श्रीमतीन्दिरागान्धी निहता ।

हेमेन्द्रः (प्रबुध्य सचीत्कारम्)
न खलु, न खलु । मातः किमिदं भणसि ? इदानीमेव स्वप्नेऽहं गुरुवर्यं रामदासमर्जुनं तेगबहादुरं गोविन्दसिंहञ्चापश्यम् । अम्ब ! मया श्रेष्ठराष्ट्रभक्तस्य भगतसिंहस्य ऊधमसिंहस्य च सान्त्वना श्रुता । न ते पञ्चनदप्रान्तं कलङ्कित द्रक्ष्यन्ति ।

अमृता (दारकं प्रबोधयन्ती)
वत्स हेमेन्द्र ! स्वप्न आसीदसौ । सत्यमिदं पुनः । निखिलोऽपि संसारः संस्तम्भितोऽनया घटनया । सिक्खजातिः स्वप्रतिष्ठां विलोपितवती । एहि तावत् । रेडियोसमाचारं शृणुवः ?

हेमेन्द्रः (सवेदनं मातृसमीपमासाद्य)
अम्ब ! मम सदयाम्ब ! एकामपि ममेच्छां पूरयिष्यसि ?

अमृता (सस्नेहं सास्रम्)
वत्स ! किं वक्तुमिच्छसि ? कथय तावत् ।

हेमेन्द्रः यथा त्वं ममाम्बा तथैवेन्दिरागान्ध्यपि । तद् दिवङ्गतां जननीं सन्द्रष्टुं मां दिल्लीं गमयिष्यसि ? या स्वरुधिरत्रातैरस्य देशस्य मृत्तिकामभिषिक्तवती तस्या अभिषेकं निजाश्रुभिः सम्पादयितु-मिच्छामि ।

अमृता (साश्रुनयनम्)
मम दारक ! अवश्यं याहि । तव पिता कामं नेच्छेत् । परन्त्वहं त्वां प्रेपितुं समीहे । गच्छ, रक्ताभिषेकवतीं जननीं पश्य ।
(रेडियोयन्त्रं प्रवर्तयति । इन्दिराया वाणी श्रूयते)
'मुझे चिन्ता नहीं कि मैं जीवित रहूँ या न रहूँ । जब मेरी जान जायेगी तो मेरे खून का एक-एक कतरा भारत को जीवित रखेगा और मजबूती देगा ।'

●

काश्यपाभिशापम्

(प्रकरणवक्रताश्रितम् एकाङ्किरूपकम्)

पात्रपरिचयः

सूत्रधारः	(कथायोजकः)
काश्यपः	(महर्षिः कश्चित्)
नारदः	(आश्रमवटुः)
गौतमी	(तापसवृद्धा)

कथासार

आचार्य कुन्तक की प्रकरण-वक्रता का निदर्शनभूत यह एकाङ्की महाकवि कालिदास-प्रणीत अभिज्ञानशाकुन्तल नाटक का एक साहित्यिक विवर्त प्रस्तुत करता है। इसका सारांश यह है कि महाराज दुष्यन्त को महर्षि दुर्वासा ने स्मृतिभ्रष्ट होने का शाप नहीं दिया, बल्कि यह अपराध स्वयं महर्षि काश्यप (कण्व) से अनजाने में हो गया।

कुलपति काश्यप तीर्थयात्रा से लौटते हैं तो उनके अभिनन्दन में एक समारोह आश्रम में आयोजित होता है। आश्रम के बटु-गण गुरुदेव की अनुशंसा में गीत प्रस्तुत करते हैं। महर्षि कण्व बच्चों की श्रद्धा से अभिभूत हो उठते हैं और उन्हें आशीः प्रदान करते हैं।

इसी बीच आश्रम का चिर-परिचित मातृहीन मृगपोतक दीर्घापाङ्ग आ जाता है। मृगछौना लम्बी अवधि के बाद कुलपति को पाकर ढेर सारा प्यार जताता है। महर्षि कण्व गौतमी के साथ बात करते अतीत की स्मृतियों में डूब जाते हैं। वह स्मरण करते हैं कि कैसे शेर की दहाड़ सुनकर आश्रम की मृगी प्राण लेकर भागी थी और गड्ढे में गिरकर मर गई थी दीर्घापाङ्ग को जन्म देकर! शकुन्तला ने मृगछौने का नामकरण किया था और पुत्री के अनुरोधवश ही महर्षि ने उस मृगछौने के अक्षत बने रहने का वचन दिया था। इस सोच-विचार के बीच ही मृगछौना महर्षि को छोड़कर अभयारण्य में भाग जाता है।

इस घटना के कुछ ही देर बाद सारा आश्रम क्रन्दन और कुहराम से भर जाता है। महर्षि काश्यप को नेपथ्य से ज्ञात होता है कि किसी अहेरी ने दीर्घापाङ्ग को तीखे वाण से वींध दिया है। वस्तुतः यह अपराध हस्तिनापुरनरेश दुष्यन्त से हो गया अनजाने में। महर्षि यह सुनते ही क्रोधान्ध हो उठते हैं और अहेरी को साधारण वहेलिया मान कर प्रमत्त हो जाने का शाप दे देते हैं।

परन्तु जब गौतमी महर्षि को वस्तुस्थिति से अवगत कराती है तो उनका हृदय सन्ताप से भर जाता है क्योंकि उन्होंने अपने ही जामाता को अभिशप्त बना दिया था।

काश्यपाभिशापम्

(प्रकरणवक्रताश्रितमेकाङ्किरूपकम्)

॥ प्रथमं दृश्यम् ॥

करामबुजविराजितां कलितकच्छपीमञ्जसा
श्रुतिस्वरविमूर्च्छनामहितमञ्जुनादान्विताम् ।
निरन्तरमखेदितां सपदि वादयन्ती मुदे
भवेदिह सचेतसां द्रुहिणसुन्दरी भारती ॥१

(नान्द्यन्ते ततः प्रविशति सूत्रधारः । पुष्पाञ्जलिं विकीर्य)

भो भोः सहृदयाः भवदिच्छानुरूपमद्य मया प्रस्तूयते प्रकरण-वक्रताश्रितं लघुरूपकं काश्यपाभिशापं नाम । कल्पयिता त्वस्य रूपकस्याभिराजराजेन्द्रः प्रयागविश्वविद्यालयीयसंस्कृतविभागे प्रवाचकपदमधिरूढो यमधिकृत्य सामोदमुल्लिखति कविशेखरमणि-स्त्रिपाठी भास्कराचार्यः ।

दिव्या वाणी वलितमधुरा स्वर्धुनी भूतलेऽस्मिन्
हिन्दीभाषा नवलकलया पावनी भानुकन्या ।
अन्तर्नीरं प्रवहति च या रागरम्या कविश्रीः
उत्सङ्गे ताः सुखयति समं तीर्थराजोऽभिराजः ॥

(श्रुतिमभिनीय)

अये वंशीमुरजझल्लरीपुरस्सरं संगीतकं यथा नेपथ्ये समारब्धं तेन रूपकारम्भोत्साहः सम्यक् सूच्यते ।

(सहृदयाभिमुखीभूय)

भो सहृदयास्तीर्थयात्राप्रतिनिवृत्तानां कुलपतीनां महर्षिकाश्यपाना-मभिनन्दनसमारोहसम्भारोऽयं प्रत्यक्षमानीयते भवताम् । तदहमप्य-नन्तरकरणीयाय नेपथ्यगृहमुपसरामि ।

(इति प्रस्तावना)

(ततः प्रविशति वटुगणपरिवारितः कुलपतिः काश्यपो मृगाजिनस्थः)

गौतमी अयि भो आश्रमवासिनः तीर्थयात्रोपावृत्तो भगवान् काश्यपोऽस्माकं समेषां धन्यतया पुनरलंकरोति पुण्यस्थलीमिमाम् । तदिदानीं नारदप्रभृतिभिर्वटुभिर्मुक्तच्छन्दसा गीतिकैका तत्सभाजनार्थं प्रस्तूयते !

(गीतिका प्रस्तूयते)

गच्छ सखे ! पुनरागमनाय !!
गच्छति सलिलं स्वयमपि गगनं
वर्षति पुनरिह भुवनसुखाय !!

प्रतिसन्ध्यं विनिमज्जति सविता
म्लायति सरसि सरोरुहवनिता
उदयति किन्तु स एव विभाते
पुनरपि कमलवनाभ्युदयाय !!

अहनि मृगाङ्कोऽपि सहति तापम्
नो नन्दयति दृशामभिलाषम्
किन्तु रजन्यां हिमकरनिकरैः
स्फुरति नभसि कैरवकलनाय !!

संहृतकरपदनखमुखवचना
भवति न मनुजो विलिखितरचना
गुणगरिमैव विरचयति कायं
प्रभवति येन चिरं रणनाय !!२

(नारदो गीतिकान्ते मालतीपुष्पग्रथितां मालां काश्यपकण्ठे विन्यस्यति साष्टाङ्गं प्रणामञ्च निवेदयति ! सर्वेऽपि वैखानसास्तमनुकुर्वन्ति)

काश्यप : (साह्लादम्) स्वस्ति । वत्सकाः स्वस्ति युष्मभ्यम् । परं प्रीतोऽस्मि युष्मद्गीतिभावनया । मंदभावेऽपि गौतम्या तपोवनमिदं साधु संरक्षितमित्यवलोक्य मोमुद्यते मच्चेतः ।

गौतमी (सप्रणामम्)

भगवन् ! सर्वमेवेदं भवत्तपोगौरवम् । यतो हि,

माल्यसंग्रथिते पुष्पे देवपादान्वितेऽपि वा ।
सौरभं पुष्कलं तस्य गन्धयत्येव भूतलम् ॥३

(ततः प्रविशति मृगपोतको दीर्घापाङ्गः)

काश्यपः (दृष्ट्वा सहर्षम्)

अये दीर्घापाङ्ग ! एहि एहि वत्स ! त्वदभावेऽतिदुःखं सोढं मया । चिराय दृष्टोऽसि ।

(इति कुशग्रासैरुपच्छन्दयति । दीर्घापाङ्गः काश्यपसमीपमागत्य बहुशः प्रणयं प्रकटयति)

काश्यपः गौतमि ! स्मरसि खल्वस्य जननव्यतिकरम् ?

गौतमी भगवन् ! साधु स्मरामि । अहं पुनः सान्ध्यसवनार्थं पुरोडाशं पचन्ती पर्णकुटीर एवासं तावदेवाश्रमवटूनां कलकलोऽश्रूयत ।

काश्यपः गौतमि ! सिंहनादं श्रुत्वाऽस्य जननी जलं पिवन्ती यावदेव सझम्पमुत्प्लुत्य धावितुमुपक्रमतेस्म तावदेव गर्भभारमन्थरा वराकी साऽवटे स्खलद्गतिस्तत्रैव न्यपतत् । मयि पश्यत्येव पोतकमिमं प्रसूय सा प्राणपीडामसहमाना पञ्चत्वं गता ।

गौतमी भगवन् ! उटजाद्वहिरागम्य दृष्टम्मया यदयं हतभाग्यो मृगपोतको भवदुत्सङ्गमलङ्करोति ।

काश्यपः (दीर्घापाङ्गं प्रचुम्ब्य लालयश्च)

गौतमि ! कियतोत्साहेन शकुन्तलाऽस्य नामकरणं कृतवती ? सर्वेऽपि आश्रममृगास्तस्मिन् दिने मृदुर्दूर्वाङ्कुरैर्यथारुचि परितोषिता आसन् ! स्मरसि न वा ?

गौतमी भगवन् ! सर्वं हस्तामलकमिव पुन पश्यामि ।

नारद : गुरुवर्य ! यस्मिन् दिने यूथविभ्रष्टो दीर्घापाङ्गः केनचित् व्याघ्रशावकेन भक्षयितुमाकृष्यमाणस्सन् दैववशात्तत्रोपस्थितैरस्मा-

भिर्वारित आसीत् अहमेवैनं क्रोडे समुत्थाप्य भवत्सकाश-मानीतवान् ।

गौतमी भगवन् ! वराकी शकुन्तला तु स्वकृतकतनयस्य दीर्घापाङ्गस्य वृत्तमाकर्ण्यएव मूर्च्छामुपगताऽऽसीत् ।

काश्यपः (क्रोधमभिनीय)

गौतमि ! जितक्रोधस्यापि मे मनस्तस्मिन् क्षणे ज्वलदनलपरी-तमिव सञ्जातम् । प्रवुद्धायां शकुन्तलायां मया स्वतपोबलेन नियमोऽयं कृतो यद्दीर्घापाङ्गस्य दर्शनमात्रेणैव हिंस्रजीवानां प्रकृतिर्विपर्ययमेष्यतीति ।

नारदः (सनृत्यम्)

एतत् श्रुत्वैव भगिनी शकुन्तला नृत्यन्ती कूर्दन्ती महान्तं प्रमोद-मुपगतासीत् । साऽस्मभ्यं सयत्नरक्षितं पिण्डखर्जूरं तदा भोजितवती ।

गौतमी (सस्मितम्)

भगवन् ! नारदस्तु पिण्डखर्जूरस्मरणेनैव सर्वं स्मरति !

(सर्वे हसन्ति)

नारद ! निवेदय तावत् दीर्घापाङ्गस्य दिनचर्याम् ?

नारदः भगवन् ! यदस्माभिः प्रत्यक्षमवलोकितं तदुच्यते । अयं पुनः

आदत्ते प्रातराशं हरिततृणमयं खड्गवृन्दैः परीतः
कूर्दत्युच्चैः प्रधावी निहतगजघटैः सिंहशावैश्च सार्धम् ।
कण्डूतिं शृङ्गकाग्रैर्विदधपि चिरं रोचते सिन्धुरेभ्यः
कस्मात्किं किं कदा वा कलयति रुचिरं को नु वेत्तुं समर्थः??४

(सर्वेऽपि हसन्ति)

काश्यपः पश्य गौतमि ! पुनरप्ययं विहर्तुकामो दृश्यते । न मम हस्ता-ग्पाशेऽवस्थातुमिच्छति ।

(समुपलाल्य विमुञ्चति)

गच्छ, यथेच्छं विहर तपोवने। गौतमि! शकुन्तला पुनर्न दृश्यते? क्व वर्तते सा?

गौतमी भगवन्! मन्ये सखीभ्यां सह चरणोपरागसुलभं लाक्षारसमन्वेष्टुं क्वचिदरण्ये गता। इदानीं विश्राम्यतु भवान्। अहं तामादाय तूर्णमागच्छामि।

॥ जवनिकापातः ॥

॥ द्वितीयं दृश्यम् ॥

(मालिनीतटवर्तिनि स्वाश्रमे महर्षिकाश्यपः प्रातर्यज्ञं सम्पाद्य भगवतेऽहस्कराय जलाञ्जलिं प्रददद् दृश्यते)

काश्यपः (समंत्रोच्चारणम्)

ॐ नमो भगवते सहस्रमरीचिमालिने! ॐ नमोऽज्ञाननिद्रान्तकाय सूर्याय! ॐ नमोऽहस्कराय!!

चञ्चन्मरीचिनिचयैर्जगतां विधुन्वन्
निद्रावशीकृतहृषीकचयानुरोधम्।
इन्दिन्दिरावृतकुवेलवनाभिनन्दी
बालार्क आदिशतु मे नवसुप्रभातम् ॥५

(नेपथ्ये चीत्कृतयश्श्रूयन्ते)

अब्रह्मण्यं भो अब्रह्मण्यम्!

काश्यपः (विस्मयमभिनीय)

अये किन्नु स्यात्! प्रशान्ततपोवनेऽब्रह्मण्यं नाम किम्?

(नेपथ्ये पुनश्श्रूयते)

अब्रह्मण्यं भो अब्रह्मण्यम्! हा दैव!!

लीलापाङ्गैर्विधुन्वन् युवतिदृगमलावेक्षणानि प्रवेगै-
र्यातो बालप्रमीत्वं विदधदिह सुखं सूकधाटूक्तिसारैः।
लीलाभूमिः कलानां हरिणकुलमणिः पूज्यकण्वाक्षिदृष्टिः
दीर्घापाङ्गो हतोऽयं कुलगुरुतनुजाकायजीवातुभूतः ॥६

(नेपथ्यध्वनिश्रवणसमकालमेव जलपात्रं काश्यपहस्तात्पतति)

काश्यपः (साश्रुरुदन्)

हा दैव ! किमिदं श्रूयते ? दीर्घापाङ्गो व्यापादित इति कथं विश्वसनीयम् ? नैतत् सम्भवति । मयि जीवति दीर्घापाङ्गो न हन्तुं शक्यते ।

नारदः (अपटीक्षेपेण ससहचरः प्रविश्य)

भगवन् भगवन् ! अनर्थः संवृत्तः । दीर्घापाङ्गो मृतः (इत्यर्धोक्ते)

काश्यपः (क्रोधोद्धुरस्सन् वामहस्ते जलमादाय)

हुँः येन दुर्मतिनाऽततायिनाऽभयारण्येऽस्मिन् प्रविश्य तपोवन-प्राणभूतो मृगशावको निहतस्तस्मै शापोऽयम्मे प्रभवतु । अयमहं काश्यपः स्वतपश्शक्त्या वच्मि,

क्षणमपि न वशी स्यात्तस्य बुद्धिः प्ररूढा
नयविनयविहीनोऽसौ प्रमत्तोऽस्तु तूर्णम् ।
न खलु भवतु लोके तस्य कीर्तिप्रशंसा
भवतु भुवनभर्त्ता क्ष्माधिपो लुब्धको वा ।।७

नारदः (ससम्भ्रमम्)

भगवन् ! न कोऽपि लुब्धक आसीदसौ । स तु हस्तिापुरनरेशो दुष्यन्त आसीत् ।

(ससम्भ्रमं प्रविशति गौतमी शृणोति च वार्तालापम्)

काश्यपः (सदैन्यम्)

धिङ् मामसाम्प्रतकारिणम् । त्वरया विवेको मेऽपहृतः । तस्मै सत्यसन्धाय प्रजाहितचिन्तकाय धर्मप्रवणाय राज्ञे शापं प्रदत्ता मयाऽत्मन एव हानिर्विहिता । वत्स नारद ! कथन्न प्रागेव व्याहृतम् ?

नारदः भगवन् ! मद्वचनेऽर्धोक्त एव दीर्घापाङ्गवियोगमसहमानैरत्रभवद्भिः शापः प्रदत्तः । मन्दभाग्योऽहं पश्यन्नास्म् ।

गौतमी (सदैन्यम्)

भगवन् ! पूर्वमेव ज्ञातम्मया यद् दीर्घापाङ्गनिधनं श्रुत्वैव भवान्

दुर्धर्षकोपानलं प्रकटीकरिष्यति । तस्मादेवाहं धावन्तो भवत्सकाशमुपगच्छामि । परन्तु किमिदानीं भविष्यति ?

काश्यपः: वत्स नारद ! आश्रमनियमविज्ञोऽपि नृपतिः कथमेतदकार्यं कृतवान् ?

नारदः: (सोत्साहम्)

शृण्वन्तु भवन्तः । दूरजंगलात् विभ्रष्टसमागतः कश्चित् दुष्टसिंहशावक आश्रममृगपोतकान् अवसरमवाप्य पीडयतीत्यस्मन्मुखादाकर्ण्य महाराजो दुष्यन्तस्तं दण्डयितुं प्रतिज्ञातवान् ।

काश्यपः: ततस्ततः ?

नारदः: ततस्त्वद्यैव प्रभाते केनचित् आश्रमवटुना तपोवनाभ्यर्णचारी स सिंहशावको महाराजाय निवेदितः । श्रुत्वैव तत्स्थानमुपेत्य सिंहपोतकमकुतोभयं स्वैरमटन्तं दृष्ट्वा लक्ष्यीकृत्य तं यावदेव प्रत्यञ्चातः कठोरशरं मुमोच तावदेव न जाने कुतो वायुवेगात् समुत्प्लुत्य दीर्घापाङ्गो मध्येमार्गमापतितः । ततस्तु,

प्रफुल्लवल्लीव तुषारदग्धा
विरूढसस्येव मृगाङ्कलुप्ता ।
शराभिघातप्रविकीर्णमांसा
मृगच्छविस्सापि बभूव नष्टा !!८

काश्यपः: (स्तम्भितकण्ठः)

हा मृगपोतक ! तादृशस्य लवलीलतासुकुमारस्य ते मसृणकायस्य एवमभूत् करुणोऽन्तः ! हा वत्से ! शकुन्तले ! कथमिदानीं धैर्यमुपगमिष्यसि ? श्यामाकमुष्टिपरिवर्धितको व्रणविरोपणक्षमैरिङ्गुदीतैलैर्निषिक्तकुशसूचिविद्धमुखः कृतकतनयस्ते दीर्घापाङ्गो दिवङ्गत इदानीम् ।

गौतमी (साभ्यर्थनम्)

भगवन् ! ननु अवातेऽपि निष्कम्पा गिरयः । अद्य पुनः विप्रतीपं पश्यामि । सागरोऽपि मर्यादां विजहाति ? चन्द्रोऽपि भस्मीभवति ? भगवन् ! निखिलाश्रमभव्यं भवदधीनम् । अहं पुनः किञ्चिद् दारुणतरं दुःखं निवेदयितुमागता ।

काश्यपः: (स्थिरीभूय साश्चर्यम्)

गौतमि ! किं विवक्षसि ? स्फुटं भण ।

गौतमी भगवन् एषा भणामि ।

(नारदं प्रति)

वत्स नारद ! गच्छ त्वम् । शकुन्तला क्ववर्तते इति सम्यग् विज्ञाय द्रुतमायाहि ।

नारदः (सादरम्)
यदाज्ञापयत्यार्या ।
(इति बटुभिस्साधं गच्छति)

गौतमी भगवन् ! भवत्यनुपस्थिते सति मृगयाप्रसंगेऽत्र समागतेन राज्ञा दुष्यन्तेनाश्रमस्य महती रक्षा कृता । रक्षांसि न इष्टिविघ्नमुत्पादयन्तीति श्रुत्वैव वैखानसमुखात् समागत्य तेन वीरेण राक्षसा निहता उपप्लाविताश्च ।

काश्यपः (सपरितोषम्)
युक्तरूपमिदं पौरवाणाम् ।

गौतमी तस्मिन्नेव प्रसंगेऽस्मद्दुहितरं शकुन्तलां निर्वर्ण्यानसूयामुखाच्च तस्याः क्षत्रपरिग्रहक्षमतां परिकल्प्य तस्यां बद्धदृढतरानुरागो बभूव महीपतिः । शकुन्तलाऽपि दुष्यन्ताभावे जीवितुमक्षमामात्मानं कल्पयन्ती कलामात्रशेषा चन्द्रमूर्तिरिव अस्तप्राया समलक्ष्यत । तस्या मरणातङ्कमवलोक्य सखीभ्यां तज्जीवनं दुष्यन्तहस्ते समर्पितम् । किं बहुना,

गान्धर्वविधिना राज्ञा परिणीता शकुन्तला ।
पौरवं गर्भमाधत्ते यदिदानीं निवेद्यते ॥६

काश्यपः (सस्मितम्)
गौतमि ! प्रियं नः । शकुन्तलेदानीं राजमहिषी जातेति चिरसमीहितं मे पूर्णतामुगतम् । इदानीं महान्तं परितोषमनुभवामि । ऋषिरक्षितां तां शीघ्रमेव श्वसुरालयं प्रेषयिष्यामि ।

गौतमी (सवितर्कम्)
भगवन् ! किन्तु (इत्यर्धोक्ते)

काश्यपः गौतमि ! अलं चिन्तया । त्वं पुनरस्मच्छापं शोचसि ! तस्याप्युपायं करिष्ये । विषस्य विषमौषधम् । स्वयज्ञप्रभावेण तपोबलेन च राजर्षिं दुष्यन्तं स्थिरमतिं तेजोवन्तं चक्रवर्तिनञ्च विधास्ये । गच्छ शकुन्तलामानय तावत् । तामभिनन्दितुमुत्कण्ठितोऽस्मि ।

गौतमी (सहर्षम्)
यदाज्ञापयन्ति भगवन्तः । एषा गच्छामि ।
(इत्युत्थाय पर्णशालाभिमुखं प्रतिष्ठते)

॥ जवनिकापातः ॥

एकं सद् विप्रा बहुधा वदन्ति

(पुराणकथोत्प्रेक्षितं नव्यमेकाङ्कम्)

पात्रपरिचयः

सूत्रधारः	(नाट्यपरिचायकः)
द्वैपायनः	(महर्षिः वेदव्यासः)
द्रुपदः	(पाञ्चालनरेशः द्रौपद्याःपिता)
इन्द्रः	(अमरावतीश्वरो देवराजः)
मातलिः	(इन्द्रसारथिः)
नारदः	(देवर्षिः)
गौतमः	(महर्षिः अहल्याजानिः)
विरञ्चिः	(सृष्टिकर्ता प्रजापतिः)
कुन्ती	(पाण्डवजननी)
अहल्या	(गौतमभार्या)

कथासार

नान्दी-पाठ के अनन्तर सूत्रधार नये एकाङ्की तथा एकाङ्कीकार डॉ० राजेन्द्रमिश्र का परिचय देता है। तभी नेपथ्य से उसे भगवान् कृष्ण द्वैपायन व्यास के आने की सूचना मिलती है और वह झाँकी को रूपक प्रारंभ हो जाने की सूचना देकर नेपथ्य-गृह में चला जाता है।

स्वयंवरमें अपने धनुर्विद्या-कौशलसे द्रौपदीको वधू बनाकर अर्जुन भाइयों के साथ अपनी पर्णकुटी में लौटते हैं। युधिष्ठिर आह्लादवश माता कुन्ती को सूचित करते हैं कि वह भिक्षा लाये है। भिक्षा से उनका आशय राज-कन्या द्रौपदी से था! परन्तु माता कुन्ती बिना कुछ सोचे-विचारे भीतर से ही कह देती हैं—'सब लोग बाँटकर भोग करो।'

परन्तु सत्य के प्रकाशित होते ही कुन्ती चिन्ता में डूब जाती हैं। जीवन में उन्होंने कभी भी असत्य नहीं कहा था। परन्तु आज उनका वचन असत्य सिद्ध हो रहा था। भला एक द्रौपदी, जो धर्मतः अर्जुन की भार्या थी, सभी पाण्डवों की पत्नी कैसे बन सकती थी?

संकट की इस घड़ी में अकस्मात् भगवान् कृष्ण द्वैपायन आते हैं। वह त्रिकालदर्शी हैं, मर्मतत्त्व के पारखी हैं। वह द्रुपद तथा कुन्ती को समझाते हैं कि ईश्वरीय प्रेरणा से ही कुन्ती ने 'सत्य' कहा है। द्रौपदी पाँचों पाण्डवों की पत्नी है। महर्षि व्यास बताते हैं कि वस्तुतः द्रौपदी देवराज इन्द्र की पति-व्रता पत्नी शची है और पाँचों पाण्डव समवेत रूप में 'इन्द्र' ही हैं। वे एक ही चैतन्य की पाँच पृथक् अभिव्यक्तियाँ हैं।

दिव्यदृष्टि देकर भगवान् व्यास सबको इन्द्र के जीवन की अतीत-घटनायें दिखाते हैं। पुरोहित विश्वरूप का वध, मित्रभूत वृत्रासुर का वध और गौतम-प्रिया अहल्या के साथ कामाचार का प्रयास—इन्द्र के इन दुष्कर्मों के कारण ही धर्म, पराक्रम तथा रूप-सौन्दर्य ने उसे तिरस्कृत कर दिया था। अपनी शक्तियों का दुरुपयोग करने के कारण ही प्रजापति ने इन्द्र को मृत्युलोक पर आने का शाप दिया। पञ्च पाण्डवों के रूप में इन्द्र उसी शाप का भार ढो रहा है।

यह समाधान सुनकर द्रुपद एवं कुन्ती प्रसन्न हो उठते हैं।

एकं सद् विप्रा बहुधा वदन्ति !

(एकाङ्किरूपकम्)

बाल्यचापल्येनैव कंसं प्रबलतररिपुं क्रीडया मुष्टिकादीन्
हत्वा चार्हद्रथं तं यवनमपि जवाना जिघूर्ति निहत्य ।
नत्वा युक्त्याऽथशक्त्या द्विजसुरपृथिवीधेनुधर्मारिभूतान्
दैत्यान् हत्वा रथस्थो जयति कुरुरणे पार्थनाथो मुरारिः ॥१

अपि च

उद्धवः किं कथयामि माधवगतं सन्देशपत्रं मानवं
कालिन्द्या विनिवर्तितां सविनयं दृष्ट्वा प्रभाते चिरम् ।
यत्र पृच्छति राधिकाविषयकं वृत्तं मुदा लालयन्
काठिन्येन समागतेति वचसां पात्रं हरिः पातु नः ॥२

(नान्द्यन्ते ततः प्रविशति सूत्रधारः । पुष्पाञ्जलिं विकीर्य)

सूत्रधारः मान्याः सहृदयाः अभिराजडॉक्टरराजेन्द्रमिश्र विरचितेन नवेन लघुनाट्येन भवतां मनोरञ्जनमद्य क्रियते । सुगृहीतसत्यव्रतं सम्प्राप्तरेवाप्रसादं प्रमोदितगणपतिं मोहितव्रजमोहनं कलितकृष्णकान्तं विपूजितविश्वनाथं भावितभास्करं शंसितश्रीनिवासं राक्षितराधावल्लभं कम्रीकृतकमलेशं समीहितविद्यानिवासं वन्दितसुन्दरमूर्तिं रञ्जितरुद्रदेवं प्रह्वीकृतकमलारत्नं समर्चितशिवशेखरं लालितलक्ष्माकान्तं वन्दितचण्डिकं प्रगीतप्रभातं कलितकरुणेशं जनकीकृताद्याप्रसादं वशीकृतकमलाकान्तं सम्प्राप्तारुणोदयं कविकुलमण्डनं सहृदयाशीर्वर्धितमहर्निशं देववाणीसपर्यापर्याकुलं राजेन्द्रमिश्रं सम्प्रति को न जानाति संस्कृतपक्षधरः ? यो हि

वैदुष्या ज्ञानसन्दीप्तान रसज्ञान् काव्यसम्पदा ।
जयते राधयन्नित्यं समाजं स्वीयसद्गुणैः ॥३

(नेपथ्ये श्रूयते)

अज्ञानराशिमपहर्तुमुदारबुद्धि—
र्वेदांस्त्रिधा विशदयन्नजहत्पुराणान् ।

सारस्वत वियति योऽभ्युदियाय नव्यो
जीयात्स कृष्णतरणिर्भगवाञ्छुकात्मा ।।४

अये ! भगवतां कृष्णद्वैपायनानामागमनं निवेद्यते ? मन्ये प्रवृत्त-मेव नाट्यम् । मान्याः रसिकाः स्वयंवरमहोत्सवे स्वधनुर्विद्याकौशलेन द्रुपदात्मजां कृष्णां परिणीय यावदेव वीरोऽर्जुनः पर्णशालामाजगाम बन्धुभिस्सार्धं तावदेव युधिष्ठिरमुखादानीता भिक्षाम्बेति श्रुत्वा कुन्ती विभज्य भुङ्ग्ध्वमिति भिक्षाबुद्ध्यैव मंत्रितवती । पश्चाच्च स्फुटिते सति रहस्ये दूयमानहृदया सा स्वसत्यरक्षार्थं चिन्तयामास ।

अर्जुनस्यार्धाङ्गिनीभूता द्रौपदी कथं पञ्चपाण्डवान् भजेत इति एका चिन्ता । स्वप्नेऽप्यसत्यमभाषमाणाया पृथाया वचनं कथं सत्यं भवेदित्यपरा चिन्ता । संकटापन्नः खलु पाण्डवकुटुम्बः ? कः पुनरुपायो भवेत ? मन्ये परमकारुणिकानां महर्षिकृष्णद्वैपायनानामागमनेन प्रश्नोऽयं समाधानमेष्यति । तदहमपि प्रविशाम्यभ्यन्तरम् ।

(ततः प्रविशति भगवान् कृष्णद्वैपायनो व्यासः)

कुन्ती (सादरं चरणयोर्निपत्य)
भगवन् ! भवत्स्नुषा पाण्डवजननी कुन्ती प्रणमति ।

द्वैपायनः साध्वि ! कल्याणमस्तु । मंगलमस्तु ।

द्रुपदः भगवन् करुणावरुणालय ! भवच्चरणेन्दीवरमधुव्रतोऽयं द्रुपदः प्रणमति ।

द्वैपायनः स्वस्ति भवते । राजन् वर्धस्व ।

कुन्ती भगवन् ! इयं द्रुपदात्मजा कृष्णा सद्य एवार्जुनेन स्वयंवरमहोत्सवे परिणीता भवच्चरणसपर्यां विदधाति। वत्से! प्रणम कल्याणनिधानं स्ववंशमूलम् ।

(द्रौपदी सादरं प्रणमति)

द्वैपायनः वत्से ! सर्वसौभाग्यं लभस्व ।

कुन्ती भगवन् ! मन्येऽस्मत्कल्याणार्थमेव भवदागमनमतर्कितम् । सूर्योदये सति कुतोऽन्धकारः ? इयं चारुशीला कन्या स्वधनुर्विद्याकौशलं

प्रदर्श्य फाल्गुनेन पत्नीरूपेण सम्प्राप्ता। परन्तु रहस्यमेवदविजानत्या मया भिक्षानीतेतियुधिष्ठिरमुखात् श्रुत्वा सम्यग्विभज्य भुङ्ग्ध्वमिति पर्णशालाभ्यन्तरादेव झटित्यादिष्टम्। न मया कदाचित्स्वप्नेऽप्य-सत्यभाषणं कृतम्। प्रभो! सम्प्रति मद्वचनरक्षणं संशयापन्नं प्रतीयते। किं करवाणि भगवन्? भवन्त एव प्रमाणमत्र!

द्वैपायनः (मनस्समाधाय सस्मितम्)

वत्से! अलं चिन्तया। अदृष्टप्रेरितमेव त्वद्वचनम्। न त्वया-ऽसत्यमुदितम्। सत्यवक्त्री त्वं प्रमादेनापि मृषावादं कर्तुं न शक्नोषि। द्रुपदात्मजेयं पञ्चानामेव पाण्डवानां राजमहिषी भविष्यति।

द्रुपदः (ससम्भ्रमं प्रणम्य)

किमुच्यते भगवन्! कथमिदं सम्भवति? लोकविरुद्धमयशस्करं चैतद् भविष्यति। कथमहं प्रजाः स्वमुखं दर्शयिष्यामि?

द्वैपायनः (ससान्त्वनम्)

राजन्! विज्ञः सन्नपि प्राकृतजन इव मन्त्रयसे! उचितानुचित-बुद्धिस्तु लोकापेक्षया जायते। धर्मतत्त्वज्ञाः पुनः लोकं व्युपेक्ष्य परलोकं पश्यन्ति। पश्याम्यहं योगदृष्ट्या यत्सत्यं वर्तते। तदेव सत्यं पृथा भाषितवती।

द्रुपदः (सादरम्)

भगवन्! किं सत्यमत्र पश्यति भवान्।

द्वैपायनः (सस्मितम्)

राजन् पाञ्चालाधिपते! इमे पञ्च पाण्डवाः शरीरमात्रेण भिन्नाः। चैतन्यं तु एकमेवामीषाम्। देवराज इन्द्र एवात्मानं पञ्चधा विभज्य समवतीर्णः धरामण्डले। अयमेव पुरन्दरः पार्थविग्रहो नन्दनन्दनरूपधारिणां भगवतां नारायणानां साहाय्येन असुरान् कौरवान् समराङ्गणे हनिष्यति। पातिव्रतधर्मपरायणा शची

एव स्वपतिमनुसरन्ती कृष्णारूपेण त्वद्गृहे सम्भूता । अतएव नात्र किञ्चिदसामञ्जस्यम् ।

द्रुपदः भगवन् त्रिकालदर्शिन् ! देवी शची कृष्णारूपेण मद्गृहे जातेति सौभाग्यगर्वितोऽस्मि । परन्तु ईर्ष्याद्वेषविकलोऽयं लोकः । एतद्रहस्यं को नु खलु प्रत्येति ?

द्वैपायनः राजन् ! सम्यगुक्तवानसि । परन्तु किमेतेन ? ऋतापेक्षी समर्थोऽयं ब्रह्माण्डः । सत्यमेव जयते नानृतम् । पञ्चषैस्तत्त्वदर्शिभिरेव लोको धार्यते न खलु शतमितैः सहस्रमितैर्वा मूढैः । विद्वज्जना न वैधेयान् प्रमाणीकुर्वन्ति । पश्य तावत्,

सुधासारा ज्योत्स्ना विधुजननहेतुर्न च मलं
अलभ्यं सौरभ्यं मृगमदसमुत्थे न च जनिः ।
मधूच्छिष्टं स्वादं वितरति तरां लोकमखिलं
प्रशस्तिर्वस्तूनां भवति गुणमूलेव जगति ॥ ५

द्रुपदः (सप्रणामं सादरम्)

भगवन् पाराशर्य ! इन्द्र एवात्मानं पञ्चधा विभज्य पृथिव्यामवतीर्ण इति यदुक्तं भवद्भिस्तन्नावगतमस्माभिः । अपनयन्तु भवन्तोऽस्मन्मोहान्धकारम् ।

द्वैपायनः राजन् ! रहस्यगर्भं गूढातिगूढमेतद्देवचरितम् । तच्च प्रत्यक्षप्रमाणलुब्धैरल्पबुद्धिभिर्मानवैरवगन्तुं न शक्यते । तथापि भवत्सन्देहद्रुमं समूलमुन्मूलयितुं तत्सर्वं स्वतपःप्रभावेण दर्शयामि । सर्वेऽपि यूयं समाहितमनसो भवत । दिव्यदृष्टिं ददामि ।

(सर्वेऽपि समाधिमग्ना इव स्थिरा जायन्ते । भगवान् द्वैपायनः कमण्डलुजलेन सर्वान् पवित्रीकरोति । देवलोकदृश्यं प्रत्यक्षीभवति)

राजन् द्रुपद ! वत्से पृथे ! युधिष्ठिरप्रमुखाः पाण्डववीराः ! वत्से याज्ञसेनि !! सर्वेऽपि यूयमिदानीं देवलोके स्थ । प्रत्यक्षमेव पश्यत पुरावृत्तं देवचरितम् ।

(नेपथ्येऽनुभूयते)

भो भो अमरावतीपुरीवास्तव्या वरुणयमरुद्राष्टवसुसूर्यचन्द्रप्रमुखा देवाः ! यूयं शृणुत । योऽयमिन्द्रः शतक्रतुः सर्वदेवभक्तिसम्पन्नो रोदसीरक्षणार्थं भगवता कमलयोनिना साभिरुचिर्व्यरचि, स भजतेऽसौ सदाचारम् । स्वशक्तीनां दुरुपयोगं विदधत्स स्वमहिम्ना गरिम्णा प्रथितयशसा च परिहीयते । तत्स्वैराचारकदर्थितो भगवान् बृहस्पतिरपि तं तत्याज । निर्भङ्कुलमिदानीं वृन्दारकनगरम् । दानवाः प्रभवन्ति नितराम् । भव्यसम्पादनार्थं पुरन्दरस्त्वष्टृ-तनयं विश्वरूपं पुरोहितपदमधिरोपितवान् । पश्यन्तु तावत् यत्को जातम् ।

(ततः प्रविशति मातलिर्द्वितीय इन्द्रः)

मातलिः स्वामिन् देवराज ! अलं सन्तापेन । देवगुरुं बृहस्पतिमिवानुनीय राजधान्यां प्रत्यावर्तयन्तु भवन्तः। ब्राह्मणस्तु भक्त्यैव कोमलहृदयः । आराधितस्सन् प्रसादमेष्यति ।

इन्द्रः न खलु । मातले ! बृहस्पतिरस्मदैश्वर्यविरोधी । न मे विलास-स्तस्मै रोचते । स खलु शचीपक्षधर उर्वशीं नितरां वशीकरोति । तस्याः करणाङ्गहारसमन्वितं लास्यं द्वेष्टि । कथमहं तमानेतुं शक्नोमि ?

मातलिः प्रभो ! युक्तमाह भवान् । यतो हि

दुर्विरोधधरा भार्यासोदरारिसुहृन्मुखाः ।
विसोढुं किल शक्यन्ते न परं ब्राह्मणो गुरुः ॥६

इन्द्रः तदेहि ! विश्वरूपं पश्यावः । श्रुतम्मया गूढचरैर्यदसौ मुखेनैकेन मत्प्रशस्तिं गायति । द्वितीयेन वेदमन्त्रान् पठति । तृतीयेन पुनः मदिरापानभ्रष्टेन दानवप्ररोचनामपि प्रस्तौति ।

मातलिः स्वामिन् ! असमञ्जसमिदम् । दानवप्रशस्त्या तु भवत्तेजोऽ-पक्षीयते । तन्निवार्योऽयं नव्यपुरोहितः ।

इन्द्रः मातले ! तदेव चिन्तयामि । अयं पुनः विश्वरूपाश्रमो दृश्यते । प्रविशावस्तावत् ।

(उभौ नाट्येन प्रविशतः । विश्वरूपं मदिरापावसक्तं पश्यतः)
(विश्वरूपप्रलापः अनुश्रूयते)

हः हः हः हः ! ओम् ओम् ! मदिरापि नाम सुधातिशायि प्रकृष्टपानकम् ।

(हिक्कामभिनीय)

अये निपीतमदिरोऽहं विचित्रं रणरणकमनुभवामि । इदानीं क्व वेदमन्त्राः क्व पुरन्दरो देवराजः क्व वा वृषपर्वा ?

(स्खलितं नाटयन् मन्दं मन्दं गायति)

यो जात एव प्रथमो मनस्वान् यः पृथिवीं व्यथमानामदृंहद् ।
यो हत्वाहिमरिणात्सप्तसिन्धून् येनेमा विश्वा च्यवना कृतानि ॥

(उच्चैरट्टहासं कुर्वन्) महर्षिगृत्समदोऽपि मदिरापायी प्रतीयते य एवं स्तौति कामकीटं देवराजम् ! किमिन्द्रेण सर्वं सत्कृतमेव न दुष्कृतं किमपि ?

मातलिः (सक्रोधम्)

स्वामिन् ! असह्योऽयं वचःप्रहारः । मदिरां निपीय ब्राह्मणाधमोऽयं रोदसीचक्रवर्तिनं भवन्तं विगर्हते ।

(इन्द्रः क्रोधोद्धुरः सन् निजायुधं सन्धत्ते । पुनः श्रूयते)

स जनास इन्द्रः । इदानीं देवपुरोहितोऽहं विश्वरूपः पुरुहूतप्रशस्तिपरं नूतनं मन्त्रं सृजामि ।

(सहिक्कं गायति)

य उर्वशीं रूपसुधैककुम्भां कुम्भस्तनीं सेवते निश्शचीकः ।
बृहस्पतेरवमन्ता विलासी श्रदस्मै धत्त स जनास इन्द्रः ॥७

(इन्द्रो निजमायुधं सन्धाय सवेगमभियाति । नेपथ्ये खड्गप्रहारध्वनिः विश्वरूपचोत्कृतयश्च श्रूयन्ते । तदनु प्रवर्तते काऽप्याकाशवाणी)

भो भो अमरावतीपुरवास्तव्या वृन्दारकाः! अब्रह्मण्यम् अब्रह्मण्यम् । विवेकहीनेन पुरन्दरेण स्वपुरोहितो वेदवेदाङ्गतत्त्वदर्शी त्वष्टृतनयो विश्वरूपो निहतः । संकटापन्नमिदानी विबुधनगरम् । योऽयमिन्द्रस्त्रिलोकरक्षणाय सर्वदेवेभ्यस्तेजोंऽशं संहृत्य प्रजापतिना निर्मितः स एवाधुना तमपन्येति । पश्यन्तु तावत्

धर्माद्धर्मप्रवृत्तिं सुरमनुजहितोत्प्रेक्षिणीं भव्यभावां
ऐश्वर्यञ्चापि विष्णोः प्रसभबलमपि प्राज्यशक्तेर्मरुत्तः।
नासत्याभ्यां सुरूपं युवतिजनमनोहारि हृत्वैव धात्रा
सृष्टोऽयं धर्मतत्त्वाच्च्युत इव नितरां सीदतीन्द्रो गुरुघ्नः ॥८

अपि च,

यस्माद्धतो गुरुर्विप्रो मघोना वेदवित्तमः।
धर्महीनं विहायैति तस्माद्धर्मो यमं प्रति ॥९

(नेपथ्ये घातप्रतिघातहुङ्कारादिध्वनयः श्रूयन्ते। आकाशवाणी पुनः प्रवर्तते)

भो भो देवाः! सन्निहिता भवत देवलोकरक्षार्थं। स्वपुत्रवधार्दितो भगवान् त्वष्टा पुरन्दरविनाशार्थं दुर्धर्षकृत्यां जनयितुमुपक्रमते।

(नेपथ्ये स्वाहाध्वनिः श्रूयते)

इन्द्रशत्रोर्विवर्धस्व स्वाहा। इन्द्रशत्रोविवर्धस्व स्वाहा ऽऽ।

आः कम्पते त्रिलोकी। दन्दह्यतेऽमरावती। भो देवाः दुर्धर्षपराक्रमोऽयं वृत्रासुरस्त्वष्ट्रा समुत्पादितः शक्तिहीनमिन्द्रं भक्षयितुं धावति।

(नेपथ्ये विद्रावणपलायनवधादिसूचकाः कलरवाः श्रूयन्ते। ततः प्रविशति मातलिद्वितीयो देवराजः)

इन्द्रः (सदैन्यम्)

मातले! किमिदानीमनुष्ठातव्यम्? निखिलाऽपि देवसेना वृत्रेण समुच्छिन्ना। ममास्त्राण्यपि कुण्ठितानि। वृत्रं सम्मुखीनं सोढुं नाहं क्षमे। यतो हि

खद्योतामां शशाङ्को रविरपि तनुकां दीपदीप्तिं मरुत्वान्
आश्लेषप्रख्यसौख्यं निर्ऋतिरपि परां दुर्गतिं स प्रचेताः।
दैन्यं क्लैव्यं यमोऽपि प्रचुरतरलतां सर्वदाही हुताशः
संयाताः सांयुगीने परिभवविकला हन्त दृष्ट्वैव वृत्रम् ॥१०

तत्किमिति चिरयति प्रजापतिसन्निधौ साभ्यर्थनं प्रेषितो देवर्षिर्नारदः?

मातलिः देवराज ! अलं सन्तप्य । महाकालस्यायमकाण्डताण्डवम् । कदाचिद् गन्त्री तरण्युपरि कदाचिच्च तरणी गन्त्र्युपरि ! अयमेव कालप्रवाहः ।

इन्द्रः मातले ! स्वदुरितानामेव फलमेतत् । दुर्विवेकेन मयाऽवध्योऽपि स्वपुरोहितो निश्चेतनोऽकारणं हतः । सर्वथा धिङ् मामसाम्प्रतकारिणम् !

मातलिः स्वामिन् ! अलमात्मावमानेन ।

नारदः (सम्भ्रमं प्रविश्य)

नारायण ! नारायण !! देवराज शचीप्रणयिन् स्वस्ति ते । शुभमस्तु, मङ्गलमस्तु । राजन् ! पूर्णमनोरथोऽसि ।

इन्द्रः (सप्रणामम्)

देवर्षे ! वृत्रे जीवति क्व मे कुशलम् ?

नारदः पुरन्दर ! वृत्रे जीवत्यपि ते कुशलमेव ।

इन्द्रः (साश्चर्यम्)

देवर्षे ! न खल्ववगच्छामि ते निगूढवचनम् । कृपया स्फुटं भणतु ।

नारदः (सस्मितम्)

देवराज ! अलं भयेन । वृत्र इदानीं ते मित्रं जातः ।

इन्द्रः (सप्रमोदम्)

हन्त भो लब्धमिदानीं स्वास्थ्यम् । देवर्षे ! कथमिदमभूत् ?

नारदः पुरन्दर! इतो गत्वा मया भवन्निवेदना पितामहचरणेषु सम्प्रस्तुता । देवमण्डलीपरिभवं श्रुत्वा दूनहृदयो विरञ्चिः स्वयमेत्य वृत्रं बहुशस्तोषयामास सान्त्ववचनैः । पितामहवचनात् भगवान् त्वष्टाऽपि स्वकृत्याप्रभावं परिसमाप्य वृत्रं सह्यतेजसं कृतवान् ।

इन्द्रः प्रत्युज्जीवितोऽस्मि भगवता पद्मयोनिना । ततस्ततः ?

नारदः देवेश ! भवन्तं सुहृदं मन्यमानो वृत्र इदानीं संन्यस्तशस्त्रः सागरतटे समाधिमग्नो वर्तते । यदि न स्यात्प्रत्ययस्तर्हि स्वयमेव गत्वा पश्यतु भवान् । भवतु, साधयामस्तावत् । स्वस्ति भवते ।

(इति यानकैरुपयाति)

मातलिः (सहर्षम्)

स्वामिन् ! प्रियं नः । इदानीममरावत्यां प्रवेष्टव्यम् ।

इन्द्रः (संशयं नाटयन्)

मातले ! प्रत्यक्षमदृष्ट्वा न मे संशयच्छेदः । तर्हि समुद्रतटमेव गच्छाव ।

मातलिः यद्रोचते विबुधेश्वराय ।

(इत्युभौ प्रतिष्ठेते । सागरतटमासाद्य वृत्रं समाधिमग्नं दृष्ट्वा)

इन्द्रः (सहर्षम्)

मातले ! अवितथमाह देवर्षिः । वृत्रोऽयं समाधिमग्नः ।

मातलिः भगवन् ! पार्श्वमेत्य भवता स्नेहसमुदाचारैर्मैत्री द्रढयितव्या ।

इन्द्रः (आत्मगतम्)

समुचितोऽयमवसरः शत्रुविनाशस्य । स्वशौर्यपराक्रमाभ्यां वृत्रं हन्तुं न प्रभविष्यामि । प्रवञ्चनेनैव मारयिष्यामि । कदाचित्पुनरपि शातयेत् ।

(प्रकाशम्)

मातले ! युक्तमात्थ । एहि, वृत्रसमीपमुपगच्छावः ।

(उभौ पृष्ठतो वृत्रसमीपं गच्छतः । इन्द्रोऽतर्कितमेव दुर्धर्षवज्राघातेन वृत्रशीर्षं छिनत्ति)

मातलिः देवेश ! किमिदं भवतानुष्ठितम् ?

सख्यं नापेक्षितं हन्त ! धातृवाक्यं न सम्मतम् ।
शौर्यं कलङ्कितं नूनं वञ्चयित्वा हता त्वया ॥ ११

(इन्द्रः पापभाराक्रान्तस्सन् दैन्यं नाटयति । आकाशे श्रूयते)

यस्मात्त्वया सुहृदयो निहतस्समाधौ
वीरोचितं समरधर्ममपोह्य शश्वत् ।
तस्मादहं सततमेमि निजोत्सभूतं
क्लीबं विहाय मघवन् ! कुशलं तवास्तु ॥ १२

पापाचारपरायण ! कृतकपुरन्दर ! त्वदाश्रयेण भृशं कलङ्कितोऽहं पराक्रम इदानीं निजाभिमानिनं वायुदेवमुपगच्छामि ।

मातलिः देवराज ! विश्वरूपं निहत्य धर्मविरहितोऽसि । अद्य पुनर्वृत्रं निहत्य पराक्रमेणापि कदर्थितोऽसि !

इन्द्रः मातले ! किं करोमि मन्दभाग्यः ? विवेकहीनं चित्तं मे प्रज्ञां हरति । संकल्पेऽसत्यपि वृत्रो मया हत इति विचिन्त्य लज्जितोऽस्मि । तदिदानीं राजधानीं न गमिष्यामि ।

मातलिः क्वापरत्र गन्तुमिच्छति देवेशः ?

इन्द्रः (किञ्चिद्विचिन्त्य)

मातले ! पुरुषोत्तमलीलाविहारस्थलं भारतवर्षं विहर्तुमिच्छामि । तदेहि । तत्रैव गच्छावः ।

(उभौ नाट्येनावतरतः)

मातलिः स्वामिन् ! ब्रह्मद्रवभूतेयं भगवती भागीरथी दृश्यते । अयं पुनर्महर्षेः गौतमस्याश्रमपरिसरः । पवित्रोऽयमुद्देशः ।

इन्द्रः (प्रकृतिसौन्दर्यमवलोकयन्)

मातले ! देवलोकमप्यतिशेते भारतीसुषमा । हन्त भोः

कुवेलामोदानां दधदिह भरं खेदहरणे
पटुर्गङ्गातोयप्रविरलकणैरञ्चिततनुः ।
स्मरोन्मादी ह्लादी मदयति हृषीकोच्चयमयं
वहन्प्राचीवायुस्तरलहृदयं हन्त कुरुते ॥१२

मातले ! समुदितप्रायो भगवान् सहस्रमरीचिमाली । तदेहि भगवन्तं गौतमं समर्च्यात्मानं पावयावः ।

मातलिः यथाभिरुचितं भवताम् ।

(इत्युभौ नाट्येन आश्रमपदं प्रविशतः)

इन्द्रः मातले ! अत्रैव तिष्ठ त्वम् । यावत्पुरस्सृत्य पृच्छामि ।

(किञ्चिदग्रे गत्वा)

कः कोऽत्र भोः ?

(स्वरमाकर्ण्य गौतमभार्याऽहल्या बहिरायाति)

अहल्या (विलक्षणतेजसं देवराजमवलोक्य सस्मितम्)

भद्र ! स्वागतम् । कोऽस्ति भवान् ? किमागमनप्रयोजनम् ।

इन्द्रः (अहल्यारूपलावण्यं निर्निमेषं दृष्ट्वाभिभूतः सन् आत्मगतम्)

आश्चर्यमाश्चर्यम् । उर्वशीमपि न्यक्करोतीयं सुतनुका । इमां दृष्ट्वैव मन्मथो मे चित्तं प्रमथितुं प्रवृत्तः । किमिदानीं कर्तुं युज्यते ?

(प्रकाशम्)

देवि ! भगवन्तं गौतमं द्रष्टुमागतोऽहम् ।

अहल्या (इन्द्रदृष्टिमवलोक्य सवितर्कम्)

कामलम्पटोऽयं प्रतिभाति । कदाचिच्छन्नवेशः कोऽपि देवो दानवो वा भवेत् ।

(प्रकाशम्)

भद्र ! महर्षिप्रवरास्तु प्रातस्स्नानाय जाह्नवीतटं गताः । इदमासनं तावदास्यताम् । अहमर्घ्यमुपहरामि ।

(इति त्वरितं पर्णशालां प्रविशति)

इन्द्रः (कामव्यथां नाटयन्)

भगवन् कुसुमायुध ! रम्भोर्वशीमेनकाघृताचीतिलोत्तमासहजन्यासानुमतीभिरनिन्द्यसौन्दर्यवतीभिर्देवाङ्गनाभिर्देव्या शच्या च नखक्षतचुम्बनालिङ्गनसुरतव्यापारैराकण्ठमुपभोजितोऽपि क्षुत्क्षामकण्ठतां प्रदर्शयसीति धिक् तेऽनल्पदारिद्रयम् । हन्त भोः शल्यभूता मेऽहल्या ! किं करोमि ?

(अर्घ्यमाहरन्तीमहल्यां दृष्ट्वा सवेगं पर्णशालां प्रविशति)

अहल्या (सभयम्)

भो नेदं प्राघुणोचितो व्यवहारः ? मन्ये त्वामतिथिं मन्यमानया मया न साध्वाचरितम् । कोऽसि त्वम् ?

इन्द्रः (अहल्याया मणिबन्धमागृह्य)

देवि देवाङ्गनोपमलावण्यशालिनि ! अलं भयेन । चित्तप्रमाथि त्वल्लावण्यं मामुन्मदयति ।

अहल्या (सक्रोधं मणिबन्धं मोचयन्ती)

नीच ! कामलम्पट ! परपुरुषसंस्पर्शदूषितां मां कृतवानसि ? कोऽस त्वम् ? स्फुटं भण । अन्यथा शापाग्नौ त्वां धक्ष्यामि ।

इन्द्रः (अहल्यानेत्राग्निं दृष्ट्वा सभयम्)

देवि ! अलं मां भस्मसात्कृत्य । इन्द्रोऽहमस्मि देवेश्वरः ।

(अकस्मादेव महर्षिगौतमः प्रविशति । सर्वं श्रुत्वा दृष्ट्वा च मृगाजिनेन सरोषं देवराजं प्रहरति)

गौतमः कामलम्पट ! अहं त्वां भस्मसात्करोमि । त्रिलोकीमीशानोऽपि खण्डितवृत्तोऽसि ? शचीं सम्प्राप्यापि कामकीटायसे ? गच्छ दुर्वृत्त ! इतः प्रभृति त्वच्छरीरं सहस्रयोनिसम्पन्नं भविष्यति !

(अहल्यां पश्चात्तापसन्तप्तां कम्पमानां दृष्ट्वा)

अहल्ये ! जानामि यन्नापराद्धं त्वया । तदलं सन्तप्य । अत्रैवाश्रमे स्थिता तपसा स्वकीयं परस्पर्शधर्षितं तेजो वर्धस्व । त्रेतायां दशरथनन्दनरूपधारिणा भगवता विष्णुना सम्मानिता सती पुनरपि मदर्धाङ्गमलङ्करिष्यसि । अहं लोकान्तराणि पर्यटिष्यामि ।

इन्द्रः (गौतमचरणयोर्निपत्य)

भगवन् ! कारुण्यसागर ! क्षमस्व मां पापम् । विवेकहीनेन मया सर्वं नष्टम् । सहस्रयोनिकलंकितेन शरीरेण जीवितुं न शक्नोमि । त्राहि मां कृपालो ! त्राहि माम् ।

(इति भृशं विलपति)

गौतमः (सदयम्)

उत्तिष्ठ मघवन् ! नेदं दैन्यं समीचीनम् । मर्षयाम्यहम् तावत् । परन्तु स्वपापानां फलमवश्यं भोक्तव्यं त्वया । गच्छ, योनय इमा नेत्रचिह्नानि भविष्यन्ति । इतःप्रभृति सहस्राक्ष इति सम्बोधयिष्यसे जनैः ।

(इति पादौ परिवर्त्य प्रतीपदिशं गच्छति । अहल्या रुदती तिष्ठति)

विरञ्चिः (आकाशे स्थितः)

देवराज ! पतिव्रतामहल्यां कलङ्कपङ्के निपात्य न त्वं सुखं स्वप्स्यसि । मूढ ! पुराऽपि धर्मं खलीकृत्य त्वया पुरोहितोऽवध्यश्च ब्राह्मणो विश्वरूपो निहतः । तदनन्तरं मामप्यवधूय पराक्रमं च खलीकृत्य छलपूर्वकं मित्रभूतो वृत्रो घातितः । इदानीञ्च स्वरूपसौन्दर्याभिमानगर्वितेन त्वया कदर्थितेयं तपस्विनी । सौन्दर्यतत्त्वं त्वामपहाय सम्प्रति स्वमूलस्थानं देववैद्यं याति । शृणु मूढ ! न त्वं देवलोकमीशितुमर्हसि । सामान्यमर्त्योऽसि जातः स्वपापकर्मभिः । अतएव मृत्युलोकं गच्छ । स्वपापानां प्रायश्चित्तं कुरु । अयमेव ममाभिशापो ममादेशश्च ।

मातलिः (विरञ्चि निर्वर्ण्य तच्छापञ्च श्रुत्वा सभयम्)

आः किमिदम् । किमपराद्धमस्मत्स्वामिना ?

इन्द्रः (मातलिसमीपमेत्य सदैन्यम्)

भगवन् प्रजापते ! मर्षय माम् ।

विरञ्चिः देवराज ! न मेऽनुज्ञाऽन्यथाभवितुमर्हति । पृथग्भूतैः धर्मपराक्रमसौन्दर्यतत्त्वैः पुनरुपेतस्त्वं मर्त्यलोकं गमिष्यसि । स्वपापानां प्रायश्चित्तं विधाय पुनरपि स्वप्रकृतव्यक्तित्वं धारयिष्यसि । अयमेव मे निर्णयः ।

(नेपथ्ये कारुण्यसूचको ध्वनिः । भगवान् कृष्णद्वैपायनो दिव्यदृष्टिं प्रतिसंहरति । सर्वेऽपि जना विस्मयविमूढा जायन्ते)

द्वैपायनः राजन् द्रुपद ! वत्से पृथे ! सत्यमक्षिप्रत्यक्षीकृतं न वा ?

द्रुपदः (चरणयोर्निपत्य)

भगवन् ! समुद्धृतोऽस्मि । पाण्डवप्रिया मे तनूजा भवेत् । इदानीं न मे कापि चिन्ता लोकस्य । सौभाग्यगर्वितोऽस्मि प्रभो !

॥ जवनिकापातः ॥

रूपरुद्रीये सुभाषितानि

१ अन्धः प्रगुणीकरिष्यति महिषीडिम्भस्तावच्चर्विष्यति /१४
२ आकाशष्ठीवनमात्मशीर्षोपर्येव पतति /८५
३ उचितानुचितबुद्धिस्तु लोकापेक्षया जायते /१२१
४ ऋतापेक्षी समग्रोऽयं ब्रह्माण्डः /१२२
५ कदाचिद् गन्त्री तरण्युपरि कदाचिच्च तरणी गन्त्र्युपरि /१२६
६ काञ्चनं विना कामिनी निरर्थका /५
७ गहनं महिलामायाजालम् । क्षणेनैव हिमायन्ते क्षणेनैव प्रज्वलन्ति /४
८ दरिद्रप्रिया रोगाः /१६
९ दुर्घटनातो विलम्ब एव श्रेयष्करः /१३
१० न खदिरं न चूर्णं तथापि समाधिकतररक्तवर्णं ताम्बूलम् /१२
११ न ज्ञानं नवाऽभिज्ञानम् । महामान्योऽसि जातः /२७
१२ पलमात्रे गृहं भस्मसाद्भवति । त्वं पुनः सार्धद्विघटिकां यावत् भद्राभरणी कथयसि /७२
१३ प्रताडनैस्तु प्रेता अपि पलायन्ते /१५
१४ प्रशस्तिर्वस्तूनां भवति गुणमूलैव जगति /१२२
१५ ब्राह्मणस्तु प्रकृत्यैव कोमलहृदयः /१२३
१६ यस्मिन्नेव पात्रे भोजनं तस्मिन्नेव छेदनम् /३७
१७ विद्वज्जना न वैधेयान् प्रमाणीकुर्वन्ति /१२२
१८ विवेकहीनं चित्तं प्रज्ञां हरति /१२८
१९ शङ्काकातरैव स्त्रीजातिः /७३
२० शिशवस्तु सुलभरोदना भवन्त्येव /१७
२१ शिशुनिद्राया वृद्धरसनाया वा किं खलु प्रमाणम् /१८
२२ सर्पोऽपि म्रियतां लगुडोऽपि न त्रुट्यतु /१५
२३ स्थानानुकूलमेव विचारा जायन्ते /७
२४ स्वकर्मविपाकं भजते मानवः /१६
२५ स्वानुभवः सर्वं शिक्षयति /२४
२६ सूर्योदये सति कुतोऽन्धकारः /१२०
२७ संस्कारमूलं हि कवित्वम् /८८

विशिष्टशब्दानुक्रमणिका

अ

२६ अधरोत्तरम्—अनुचित ।

४१ अधिष्ठानाधिकारी—दरोगा ।

३ अभीष्टमुपायनम्—मनचाही भेंट । (रचना—५-१-८४)

३६ अवलेहं विधास्ये—चटनी बना दूँगा ।

आ

४२ आकाशप्रहारः—हवाई फायर ।

११९ आजिभूमिः—रणभूमि ।

२६ आदिभाक्—ऐडहॉक् (अंग्रेजी)

६ आस्थानकक्ष—बैठक (ड्राइङ्ग-रूम) ।

उ

२२ उत्स्वप्नायते—नींद में बोलना ।

१५ उदकुम्भी—घरौंच (घड़ा रखने का स्थान)

६३ उपच्छन्दितः—ललचाया गया ।

११६ उपप्लावितः—खदेड़ा गया ।

ऊ

१६ ऊष्मप्रावारकः—गर्म शाल ।

ए

११९ एकं सद् विप्रा बहुधा वदन्ति—एक ही सत्य को ऋषिगण अनेक रूपों में व्यक्त करते हैं । (रचनाकाल—७-४-८६ ई०)

कवर्ग

१५ कण्डिनी—ओखली ।

४९ कंथामाणिक्यम्—गुदड़ी का लाल । (रचनाकाल—५-४-८६)

७ कर्मशाला—कारखाना ।

१०९ काश्यपाभिशापम्—कण्व का शाप । (रचनाकाल—२३-३-८६

६१ कुटुम्बरक्षणम्—परिवार की रक्षा । (रचनाकाल—२३-५-८५

८७ कुविन्दः—जुलाहा ।

११५ कुवेलम्—कमल का फूल ।

२६ कूटव्याहरणम्—छल-छद्म भरी बात ।

८३ को विजयते नैव ज्ञातम्—कौन जीता, नहीं मालूम । (रचनाकाल—१५-१-८६ ई०)

६३ कोष्ठागारिकः—कोठारी

१५ खण्डितवितर्दिकः—टूटे चबूतरे वाला ।

२३ गोमयबुद्धयः—गोबर बुद्धिवाले ।

११ क्षुरप्रः—खुरपा

२३ क्षेत्रपुरुष इव—धोख की तरह ।

चवर्ग

१५ चुल्ली—चूल्हा ।

तवर्ग

१६ तृणकटः—कुश से बनी चटाई ।

३८ तुषीकरिष्यामि—भूसी बना दूँगा ।

८ त्रिपादी—तिपाई ।

१३ त्रिशिरःपुरी—तिरुचिरापल्ली (तमिलनाडु)

९ दन्दशूकः—साँप (चोर का नाम)
२७ दुग्धमुखः—दुधमुंहा ।
१८ दीनारसंपुटिका—अशर्फियों की थैली ।
५५ द्राग्यानम्—ट्रक ।
४४ द्विदले कालिमा—दाल में काला ।
९ नात्मानमवसादयेत्—स्वयं को निरस्त न करे ।
(रचनाकाल- ६-९-८५ ई०)
१६ निर्गृहघट्टः—न घर का न घाट का ।
६८ निर्यातयितुम्—चुकाने के लिये ।
३८ निष्कुषिता—नोची गई ।

पवर्ग

४९ पक्ववटिका—पकौड़ी ।
१२ पदलीनम्—पतलून (पैन्ट)
१५ पर्याकुलकर्परः—उखड़ी खपरैल वाला ।
१५ पलालास्तरणम्—पुआल का विछौना ।
११ पाटच्चरः—चोर ।
२२२ पाराशर्यः—पराशरपुत्र व्यास ।
३३ पुनर्मेलनम्—पुनर्मिलन ।
(रचनाकाल—१-४-८६ ई०)
१५ पेषिणी—चक्की (पीसनेवाली)
४९ प्रक्षालनद्रोणी—वॉस वेसिन (अंग्रेजो)
१२ प्रणिधिः—गुप्तचर ।
१२ प्रतिभुवा—जामिन (मध्यस्थ) द्वारा ।
२४ प्रतिरथ्यम्—गली-गली में ।
१२ प्रतिश्रृणोमि—वचन देता हूँ ।
२२ प्रतीकावलम्वि—सिम्बॉलिक (अंग्रेजी)
१२० फाल्गुनः—अर्जुन ।
२२ बलाका—बकपंक्ति ।
१६ वाहुपरिधिपरिमितम्—अँकवार भर ।
११९ वार्हद्रथः— बृहद्रथ का पुत्र जयद्रथ ।
१२ भस्मवर्णम्—खाकी रंग की ।
१५ मलिम्लुचः—चोर ।
३६ मान्यतरः—मॉनीटर (अंग्रेजी)
४० मुखवीरः—मुखविर(उर्दू)
३३ मुद्गफलानि—मूँगफली ।
३३ मुसलमृगाङ्कः—मूसलचन्द ।

यकारादि

१२२ याज्ञसेनी—द्रौपदी ।
३ यौतकम—दहेज
९७ रक्ताभिषेकम्—रक्त-स्नान ।
(रचनाकाल—४-४-८६ ई०)
४४ रक्षाधिष्ठानम्—पुलिसस्टेशन ।
७१ राजराजौदार्यम्—राजराज की उदारता ।
(रचनाकाल—१४-१-८६ई०)
८ रुधिरस्रवः—खून का वहाव ।
१२३ रोदसी—आकश एवं पृथ्वी ।
१२ वक्षोरतम्—वुश्शर्ट ।
११ वरटस्थिता—हंस पर आसीन ।
११५ वातप्रमी—हवा से वात करने वाला ।

११ वामहस्तक्रीड़ा—बायें हाथ का खेल।

१५ विघटितच्छदिः—उजाड़ छाजन वाला।

११५ विभ्रष्टसमागतः—बिछड़कर आया हुआ।

२९ विलम्बिवृहज्जरूथा—थुलथुल देह वाली।

१८ शापितस्तव शीर्षेण— तुम्हारे सिर की कसम।

९० स्थपतिः—भवनशिल्पी।

११ सन्धिभेदकः — सेंध लगाने वाला।

१२५ संयुगीनम्—युद्ध।

१२० स्नुषा—पुत्रवधू।

२१ स्वप्नाज्जागरणं वरम्— सपना देखने से जागना ही अच्छा (रचनाकाल–१२-९-८५ ई०)

२८ सांयात्रिकीभूय— खेवनहार बनकर।

११५ हृषीकचयः—इन्द्रियों का समूह।

———